shrImadbhAgavataM chaturthaskandhaH

શ્રીમદ્ભાગવતં - ચતુર્થસ્કન્ધઃ

Document Information

Text title : shrImadbhAgavatam - 04 - chaturthaskandhaH

File name : bhagpur-04.itx

Category : purana, shrimadbhagavatam, vyAsa, krishna

Location : doc_purana

Proofread by : PSA Easwaran

Latest update : July 4, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2025

sanskritdocuments.org

શ્રીમદ્ભાગવતં - ચતુર્થસ્કન્ધઃ

શ્રીમદ્ભાગવતં - ચતુર્થસ્કન્ધઃ

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ચતુર્થસ્કન્ધઃ ॥

॥ પ્રથમોઽધ્યાયઃ - ૧ ॥

મૈત્રેય ઉવાચ

મનોસ્તુ શતરૂપાયાં તિસ્રઃ કન્યાશ્ચ જજ્ઞિરે ।
આકૂતિર્દેવહૂતિશ્ચ પ્રસૂતિરિતિ વિશ્રુતાઃ ॥ ૧॥

આકૂતિં રુચયે પ્રાદાદપિ ભ્રાતૃમતીં નૃપઃ ।
પુત્રિકાધર્મમાશ્રિત્ય શતરૂપાનુમોદિતઃ ॥ ૨॥

પ્રજાપતિઃ સ ભગવાન્ રુચિસ્તસ્યામજીજનત્ ।
મિથુનં બ્રહ્મવર્ચસ્વી પરમેણ સમાધિના ॥ ૩॥

યસ્તયોઃ પુરુષઃ સાક્ષાદ્વિષ્ણુર્યજ્ઞસ્વરૂપધૃક્ ।
યા સ્ત્રી સા દક્ષિણા ભૂતેરંશભૂતાનપાયિની ॥ ૪॥

આનિન્યે સ્વગૃહં પુત્ર્યાઃ પુત્રં વિતતરોચિષમ્ ।
સ્વાયમ્ભુવો મુદા યુક્તો રુચિર્જગ્રાહ દક્ષિણામ્ ॥ ૫॥

તાં કામયાનાં ભગવાનુવાહ યજુષાં પતિઃ ।
તુષ્ટાયાં તોષમાપન્નોઽજનયદ્દ્વાદશાત્મજાન્ ॥ ૬॥

તોષઃ પ્રતોષઃ સન્તોષો ભદ્રઃ શાન્તિરિડસ્પતિઃ ।
ઇધ્મઃ કવિર્વિભુઃ સ્વહ્નઃ સુદેવો રોચનો દ્વિષટ્ ॥ ૭॥

તુષિતા નામ તે દેવા આસન્ સ્વાયમ્ભુવાન્તરે ।
મરીચિમિશ્રા ઋષયો યજ્ઞઃ સુરગણેશ્વરઃ ॥ ૮॥

પ્રિયવ્રતોત્તાનપાદૌ મનુપુત્રૌ મહૌજસૌ ।
તત્પુત્રપૌત્રનપ્તૃણામનુવૃત્તં તદન્તરમ્ ॥ ૯॥

દેવહૂતિમદાત્તાત કર્દમાયાત્મજાં મનુઃ ।
તત્સમ્બન્ધિ શ્રુતપ્રાયં ભવતા ગદતો મમ ॥ ૧૦॥

દક્ષાય બ્રહ્મપુત્રાય પ્રસૂતિં ભગવાન્ મનુઃ ।
પ્રાયચ્છદ્યત્કૃતઃ સર્ગસ્ત્રિલોક્યાં વિતતો મહાન્ ॥ ૧૧॥

યાઃ કર્દમસુતાઃ પ્રોક્તા નવ બ્રહ્મર્ષિપત્નયઃ ।
તાસાં પ્રસૂતિપ્રસવં પ્રોચ્યમાનં નિબોધ મે ॥ ૧૨॥

પત્ની મરીચેસ્તુ કલા સુષુવે કર્દમાત્મજા ।
કશ્યપં પૂર્ણિમાનં ચ યયોરાપૂરિતં જગત્ ॥ ૧૩॥

પૂર્ણિમાસૂત વિરજં વિશ્વગં ચ પરન્તપ ।
દેવકુલ્યાં હરેઃ પાદશૌચાદ્યાભૂત્સરિદ્દિવઃ ॥ ૧૪॥

અત્રેઃ પત્ન્યનસૂયા ત્રીઞ્જજ્ઞે સુયશસઃ સુતાન્ ।
દત્તં દુર્વાસસં સોમમાત્મેશબ્રહ્મસમ્ભવાન્ ॥ ૧૫॥

વિદુર ઉવાચ
અત્રેર્ગૃહે સુરશ્રેષ્ઠાઃ સ્થિત્યુત્પત્ત્યન્તહેતવઃ ।
કિઞ્ચિચ્ચિકીર્ષવો જાતા એતદાખ્યાહિ મે ગુરો ॥ ૧૬॥

મૈત્રેય ઉવાચ
બ્રહ્મણા નોદિતઃ સૃષ્ટાવત્રિર્બ્રહ્મવિદાં વરઃ ।
સહ પત્ન્યા યયાવૃક્ષં કુલાદ્રિં તપસિ સ્થિતઃ ॥ ૧૭॥

તસ્મિન્ પ્રસૂનસ્તબકપલાશાશોકકાનને ।
વાર્ભિઃ સ્રવદ્ભિરુદ્ઘુષ્ટે નિર્વિન્ધ્યાયાઃ સમન્તતઃ ॥ ૧૮॥

પ્રાણાયામેન સંયમ્ય મનો વર્ષશતં મુનિઃ ।
અતિષ્ઠદેકપાદેન નિર્દ્વન્દ્વોઽનિલભોજનઃ ॥ ૧૯॥

શરણં તં પ્રપદ્યેઽહં ય એવ જગદીશ્વરઃ ।
પ્રજામાત્મસમાં મહ્યં પ્રયચ્છત્વિતિ ચિન્તયન્ ॥ ૨૦॥

તપ્યમાનં ત્રિભુવનં પ્રાણાયામૈધસાગ્નિના ।
નિર્ગતેન મુનેર્મૂર્ધ્નઃ સમીક્ષ્ય પ્રભવસ્ત્રયઃ ॥ ૨૧॥

અપ્સરોમુનિગન્ધર્વસિદ્ધવિદ્યાધરોરગૈઃ ।
વિતાયમાનયશસસ્તદાશ્રમપદં યયુઃ ॥ ૨૨॥

તત્પ્રાદુર્ભાવસંયોગવિદ્યોતિતમના મુનિઃ ।
ઉત્તિષ્ઠન્નેકપાદેન દદર્શ વિબુધર્ષભાન્ ॥ ૨૩॥

પ્રણમ્ય દણ્ડવદ્ભૂમાવુપતસ્થેઽર્હણાઞ્જલિઃ ।
વૃષહંસસુપર્ણસ્થાન્ સ્વૈઃ સ્વૈશ્ચિહ્નૈશ્ચ ચિહ્નિતાન્ ॥ ૨૪॥

કૃપાવલોકેન હસદ્વદનેનોપલમ્ભિતાન્ ।
તદ્રોચિષા પ્રતિહતે નિમીલ્ય મુનિરક્ષિણી ॥ ૨૫॥

ચેતસ્તત્પ્રવણં યુઞ્જન્નસ્તાવીત્સંહતાઞ્જલિઃ ।
શ્લક્ષ્ણયા સૂક્તયા વાચા સર્વલોકગરીયસઃ ॥ ૨૬॥

અત્રિરુવાચ
વિશ્વોદ્ભવસ્થિતિલયેષુ વિભજ્યમાનૈ-
ર્માયાગુણૈરનુયુગં વિગૃહીતદેહાઃ ।
તે બ્રહ્મવિષ્ણુગિરિશાઃ પ્રણતોઽસ્મ્યહં વઃ
તેભ્યઃ ક એવ ભવતાં મ ઇહોપહૂતઃ ॥ ૨૭॥

એકો મયેહ ભગવાન્ વિવિધપ્રધાનૈ-
શ્ચિત્તીકૃતઃ પ્રજનનાય કથં નુ યૂયમ્ ।
અત્રાગતાસ્તનુભૃતાં મનસોઽપિ દૂરાદ્-
બ્રૂત પ્રસીદત મહાનિહ વિસ્મયો મે ॥ ૨૮॥

મૈત્રેય ઉવાચ
ઇતિ તસ્ય વચઃ શ્રુત્વા ત્રયસ્તે વિબુધર્ષભાઃ ।
પ્રત્યાહુઃ શ્લક્ષ્ણયા વાચા પ્રહસ્ય તમૃષિં પ્રભો ॥ ૨૯॥

દેવા ઊચુઃ
યથા કૃતસ્તે સઙ્કલ્પો ભાવ્યં તેનૈવ નાન્યથા ।
સત્સઙ્કલ્પસ્ય તે બ્રહ્મન્ યદ્વૈ ધ્યાયતિ તે વયમ્ ॥ ૩૦॥

અથાસ્મદંશભૂતાસ્તે આત્મજા લોકવિશ્રુતાઃ ।
ભવિતારોઽઙ્ગ ભદ્રં તે વિસ્રપ્સ્યન્તિ ચ તે યશઃ ॥ ૩૧॥

એવં કામવરં દત્ત્વા પ્રતિજગ્મુઃ સુરેશ્વરાઃ ।
સભાજિતાસ્તયોઃ સમ્યગ્દમ્પત્યોર્મિષતોસ્તતઃ ॥ ૩૨॥

સોમોઽભૂદ્બ્રહ્મણોંઽશેન દત્તો વિષ્ણોસ્તુ યોગવિત્ ।
દુર્વાસાઃ શઙ્કરસ્યાંશો નિબોધાઙ્ગિરસઃ પ્રજાઃ ॥ ૩૩॥

શ્રદ્ધા ત્વઙ્ગિરસઃ પત્ની ચતસ્રોઽસૂત કન્યકાઃ ।
સિનીવાલી કુહૂ રાકા ચતુર્થ્યનુમતિસ્તથા ॥ ૩૪॥

તત્પુત્રાવપરાવાસ્તાં ખ્યાતૌ સ્વારોચિષેઽન્તરે ।
ઉતથ્યો ભગવાન્ સાક્ષાદ્બ્રહ્મિષ્ઠશ્ચ બૃહસ્પતિઃ ॥ ૩૫॥

પુલસ્ત્યોઽજનયત્પત્ન્યામગસ્ત્યં ચ હવિર્ભુવિ ।
સોઽન્યજન્મનિ દહ્રાગ્નિર્વિશ્રવાશ્ચ મહાતપાઃ ॥ ૩૬॥

તસ્ય યક્ષપતિર્દેવઃ કુબેરસ્ત્વિડવિડા સુતઃ ।
રાવણઃ કુમ્ભકર્ણશ્ચ તથાન્યસ્યાં વિભીષણઃ ॥ ૩૭॥

પુલહસ્ય ગતિર્ભાર્યા ત્રીનસૂત સતી સુતાન્ ।
કર્મશ્રેષ્ઠં વરીયાંસં સહિષ્ણું ચ મહામતે ॥ ૩૮॥

ક્રતોરપિ ક્રિયા ભાર્યા વાલખિલ્યાનસૂયત ।
ઋષીન્ ષષ્ટિસહસ્રાણિ જ્વલતો બ્રહ્મતેજસા ॥ ૩૯॥

ઊર્જાયાં જજ્ઞિરે પુત્રા વસિષ્ઠસ્ય પરન્તપ ।
ચિત્રકેતુપ્રધાનાસ્તે સપ્ત બ્રહ્મર્ષયોઽમલાઃ ॥ ૪૦॥

ચિત્રકેતુઃ સુરોચિશ્ચ વિરજા મિત્ર એવ ચ ।
ઉલ્બણો વસુભૃદ્યાનો દ્યુમાન્ શક્ત્યાદયોઽપરે ॥ ૪૧॥

ચિત્તિસ્ત્વથર્વણઃ પત્ની લેભે પુત્રં ધૃતવ્રતમ્ ।
દધ્યઞ્ચમશ્વશિરસં ભૃગોર્વંશં નિબોધ મે ॥ ૪૨॥

ભૃગુઃ ખ્યાત્યાં મહાભાગઃ પત્ન્યાં પુત્રાનજીજનત્ ।
ધાતારં ચ વિધાતારં શ્રિયં ચ ભગવત્પરામ્ ॥ ૪૩॥

આયતિં નિયતિં ચૈવ સુતે મેરુસ્તયોરદાત્ ।
તાભ્યાં તયોરભવતાં મૃકણ્ડઃ પ્રાણ એવ ચ ॥ ૪૪॥

માર્કણ્ડેયો મૃકણ્ડસ્ય પ્રાણાદ્વેદશિરા મુનિઃ ।
કવિશ્ચ ભાર્ગવો યસ્ય ભગવાનુશના સુતઃ ॥ ૪૫॥

ત એતે મુનયઃ ક્ષત્તર્લોકાન્ સર્ગૈરભાવયન્ ।

એષ કર્દમદૌહિત્રસન્તાનઃ કથિતસ્તવ ।
શૃણ્વતઃ શ્રદ્દધાનસ્ય સદ્યઃ પાપહરઃ પરઃ ॥ ૪૬॥

પ્રસૂતિં માનવીં દક્ષ ઉપયેમે હ્યજાત્મજઃ ।
તસ્યાં સસર્જ દુહિતૄઃ ષોડશામલલોચનાઃ ॥ ૪૭॥

ત્રયોદશાદાદ્ધર્માય તથૈકામગ્નયે વિભુઃ ।
પિતૃભ્ય એકાં યુક્તેભ્યો ભવાયૈકાં ભવચ્છિદે ॥ ૪૮॥

શ્રદ્ધા મૈત્રી દયા શાન્તિસ્તુષ્ટિઃ પુષ્ટિઃ ક્રિયોન્નતિઃ ।
બુદ્ધિર્મેધા તિતિક્ષા હ્રીર્મૂર્તિર્ધર્મસ્ય પત્નયઃ ॥ ૪૯॥

શ્રદ્ધાસૂત શુભં મૈત્રી પ્રસાદમભયં દયા ।
શાન્તિઃ સુખં મુદં તુષ્ટિઃ સ્મયં પુષ્ટિરસૂયત ॥ ૫૦॥

યોગં ક્રિયોન્નતિર્દર્પમર્થં બુદ્ધિરસૂયત ।
મેધા સ્મૃતિં તિતિક્ષા તુ ક્ષેમં હ્રીઃ પ્રશ્રયં સુતમ્ ॥ ૫૧॥

મૂર્તિઃ સર્વગુણોત્પત્તિર્નરનારાયણાવૃષી ॥ ૫૨॥

યયોર્જન્મન્યદો વિશ્વમભ્યનન્દત્સુનિર્વૃતમ્ ।
મનાંસિ કકુભો વાતાઃ પ્રસેદુઃ સરિતોઽદ્રયઃ ॥ ૫૩॥

દિવ્યવાદ્યન્ત તૂર્યાણિ પેતુઃ કુસુમવૃષ્ટયઃ ।
મુનયસ્તુષ્ટુવુસ્તુષ્ટા જગુર્ગન્ધર્વકિન્નરાઃ ॥ ૫૪॥

નૃત્યન્તિ સ્મ સ્ત્રિયો દેવ્ય આસીત્પરમમઙ્ગલમ્ ।
દેવા બ્રહ્માદયઃ સર્વે ઉપતસ્થુરભિષ્ટવૈઃ ॥ ૫૫॥

દેવા ઊચુઃ
યો માયયા વિરચિતં નિજયાઽઽત્મનીદં
ખે રૂપભેદમિવ તત્પ્રતિચક્ષણાય ।
એતેન ધર્મસદને ઋષિમૂર્તિનાદ્ય
પ્રાદુશ્ચકાર પુરુષાય નમઃ પરસ્મૈ ॥ ૫૬॥

સોઽયં સ્થિતિવ્યતિકરોપશમાય સૃષ્ટાન્
સત્ત્વેન નઃ સુરગણાનનુમેયતત્ત્વઃ ।
દૃશ્યાદદભ્રકરુણેન વિલોકનેન
યચ્છ્રીનિકેતમમલં ક્ષિપતારવિન્દમ્ ॥ ૫૭॥

એવં સુરગણૈસ્તાત ભગવન્તાવભિષ્ટુતૌ ।
લબ્ધાવલોકૈર્યયતુરર્ચિતૌ ગન્ધમાદનમ્ ॥ ૫૮॥

તાવિમૌ વૈ ભગવતો હરેરંશાવિહાગતૌ ।
ભારવ્યયાય ચ ભુવઃ કૃષ્ણૌ યદુકુરૂદ્વહૌ ॥ ૫૯॥

સ્વાહાભિમાનિનશ્ચાગ્નેરાત્મજાંસ્ત્રીનજીજનત્ ।
પાવકં પવમાનં ચ શુચિં ચ હુતભોજનમ્ ॥ ૬૦॥

તેભ્યોઽગ્નયઃ સમભવન્ ચત્વારિંશચ્ચ પઞ્ચ ચ ।
ત એવૈકોનપઞ્ચાશત્સાકં પિતૃપિતામહૈઃ ॥ ૬૧॥

વૈતાનિકે કર્મણિ યન્નામભિર્બ્રહ્મવાદિભિઃ ।
આગ્નેય્ય ઇષ્ટયો યજ્ઞે નિરૂપ્યન્તેઽગ્નયસ્તુ તે ॥ ૬૨॥

અગ્નિષ્વાત્તા બર્હિષદઃ સૌમ્યાઃ પિતર આજ્યપાઃ ।
સાગ્નયોઽનગ્નયસ્તેષાં પત્ની દાક્ષાયણી સ્વધા ॥ ૬૩॥

તેભ્યો દધાર કન્યે દ્વે વયુનાં ધારિણીં સ્વધા ।
ઉભે તે બ્રહ્મવાદિન્યૌ જ્ઞાનવિજ્ઞાનપારગે ॥ ૬૪॥

ભવસ્ય પત્ની તુ સતી ભવં દેવમનુવ્રતા ।
આત્મનઃ સદૃશં પુત્રં ન લેભે ગુણશીલતઃ ॥ ૬૫॥

પિતર્યપ્રતિરૂપે સ્વે ભવાયાનાગસે રુષા ।
અપ્રૌઢૈવાત્મનાઽઽત્માનમજહાદ્યોગસંયુતા ॥ ૬૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે વિદુરમૈત્રેયસંવાદે પ્રથમોઽધ્યાયઃ ॥ ૧॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ દ્વિતીયોઽધ્યાયઃ - ૨ ॥

વિદુર ઉવાચ
ભવે શીલવતાં શ્રેષ્ઠે દક્ષો દુહિતૃવત્સલઃ ।
વિદ્વેષમકરોત્કસ્માદનાદૃત્યાત્મજાં સતીમ્ ॥ ૧॥

કસ્તં ચરાચરગુરું નિર્વૈરં શાન્તવિગ્રહમ્ ।
આત્મારામં કથં દ્વેષ્ટિ જગતો દૈવતં મહત્ ॥ ૨॥

એતદાખ્યાહિ મે બ્રહ્મન્ જામાતુઃ શ્વશુરસ્ય ચ ।
વિદ્વેષસ્તુ યતઃ પ્રાણાંસ્તત્યજે દુસ્ત્યજાન્ સતી ॥ ૩॥

મૈત્રેય ઉવાચ
પુરા વિશ્વસૃજાં સત્રે સમેતાઃ પરમર્ષયઃ ।
તથામરગણાઃ સર્વે સાનુગા મુનયોઽગ્નયઃ ॥ ૪॥

તત્ર પ્રવિષ્ટમૃષયો દૃષ્ટ્વાર્કમિવ રોચિષા ।
ભ્રાજમાનં વિતિમિરં કુર્વન્તં તન્મહત્સદઃ ॥ ૫॥

ઉદતિષ્ઠન્સદસ્યાસ્તે સ્વધિષ્ણ્યેભ્યઃ સહાગ્નયઃ ।
ઋતે વિરિઞ્ચં શર્વં ચ તદ્ભાસાક્ષિપ્તચેતસઃ ॥ ૬॥

સદસસ્પતિભિર્દક્ષો ભગવાન્ સાધુ સત્કૃતઃ ।
અજં લોકગુરું નત્વા નિષસાદ તદાજ્ઞયા ॥ ૭॥

પ્રાઙ્નિષણ્ણં મૃડં દૃષ્ટ્વા નામૃષ્યત્તદનાદૃતઃ ।
ઉવાચ વામં ચક્ષુર્ભ્યામભિવીક્ષ્ય દહન્નિવ ॥ ૮॥

શ્રૂયતાં બ્રહ્મર્ષયો મે સહ દેવાઃ સહાગ્નયઃ ।
સાધૂનાં બ્રુવતો વૃત્તં નાજ્ઞાનાન્ન ચ મત્સરાત્ ॥ ૯॥

અયં તુ લોકપાલાનાં યશોઘ્નો નિરપત્રપઃ ।
સદ્ભિરાચરિતઃ પન્થા યેન સ્તબ્ધેન દૂષિતઃ ॥ ૧૦॥

એષ મે શિષ્યતાં પ્રાપ્તો યન્મે દુહિતુરગ્રહીત્ ।
પાણિં વિપ્રાગ્નિમુખતઃ સાવિત્ર્યા ઇવ સાધુવત્ ॥ ૧૧॥

ગૃહીત્વા મૃગશાવાક્ષ્યાઃ પાણિં મર્કટલોચનઃ ।
પ્રત્યુત્થાનાભિવાદાર્હે વાચાપ્યકૃત નોચિતમ્ ॥ ૧૨॥

લુપ્તક્રિયાયાશુચયે માનિને ભિન્નસેતવે ।
અનિચ્છન્નપ્યદાં બાલાં શૂદ્રાયેવોશતીં ગિરમ્ ॥ ૧૩॥

પ્રેતાવાસેષુ ઘોરેષુ પ્રેતૈર્ભૂતગણૈર્વૃતઃ ।
અટત્યુન્મત્તવન્નગ્નો વ્યુપ્તકેશો હસન્ રુદન્ ॥ ૧૪॥

ચિતાભસ્મકૃતસ્નાનઃ પ્રેતસ્રઙ્ન્રસ્થિભૂષણઃ ।
શિવાપદેશો હ્યશિવો મત્તો મત્તજનપ્રિયઃ ।
પતિઃ પ્રમથભૂતાનાં તમોમાત્રાત્મકાત્મનામ્ ॥ ૧૫॥

તસ્મા ઉન્માદનાથાય નષ્ટશૌચાય દુર્હૃદે ।
દત્તા બત મયા સાધ્વી ચોદિતે પરમેષ્ઠિના ॥ ૧૬॥

મૈત્રેય ઉવાચ
વિનિન્દ્યૈવં સ ગિરિશમપ્રતીપમવસ્થિતમ્ ।
દક્ષોઽથાપ ઉપસ્પૃશ્ય ક્રુદ્ધઃ શપ્તું પ્રચક્રમે ॥ ૧૭॥

અયં તુ દેવયજન ઇન્દ્રોપેન્દ્રાદિભિર્ભવઃ ।
સહ ભાગં ન લભતાં દેવૈર્દેવગણાધમઃ ॥ ૧૮॥

નિષિધ્યમાનઃ સ સદસ્યમુખ્યૈ-
ર્દક્ષો ગિરિત્રાય વિસૃજ્ય શાપમ્ ।
તસ્માદ્વિનિષ્ક્રમ્ય વિવૃદ્ધમન્યુ-
ર્જગામકૌરવ્ય નિજં નિકેતનમ્ ॥ ૧૯॥

વિજ્ઞાય શાપં ગિરિશાનુગાગ્રણીઃ
નન્દીશ્વરો રોષકષાયદૂષિતઃ ।
દક્ષાય શાપં વિસસર્જ દારુણં
યે ચાન્વમોદંસ્તદવાચ્યતાં દ્વિજાઃ ॥ ૨૦॥

ય એતન્મર્ત્યમુદ્દિશ્ય ભગવત્યપ્રતિદ્રુહિ ।
દ્રુહ્યત્યજ્ઞઃ પૃથગ્દૃષ્ટિસ્તત્ત્વતો વિમુખો ભવેત્ ॥ ૨૧॥

ગૃહેષુ કૂટધર્મેષુ સક્તો ગ્રામ્યસુખેચ્છયા ।
કર્મતન્ત્રં વિતનુતે વેદવાદવિપન્નધીઃ ॥ ૨૨॥

બુદ્ધ્યા પરાભિધ્યાયિન્યા વિસ્મૃતાત્મગતિઃ પશુઃ ।
સ્ત્રીકામઃ સોઽસ્ત્વતિતરાં દક્ષો બસ્તમુખોઽચિરાત્ ॥ ૨૩॥

વિદ્યાબુદ્ધિરવિદ્યાયાં કર્મમય્યામસૌ જડઃ ।
સંસરન્ત્વિહ યે ચામુમનુ શર્વાવમાનિનમ્ ॥ ૨૪॥

ગિરઃ શ્રુતાયાઃ પુષ્પિણ્યા મધુગન્ધેન ભૂરિણા ।
મથ્ના ચોન્મથિતાત્માનઃ સમ્મુહ્યન્તુ હરદ્વિષઃ ॥ ૨૫॥

સર્વભક્ષા દ્વિજા વૃત્ત્યૈ ધૃતવિદ્યા તપોવ્રતાઃ ।
વિત્તદેહેન્દ્રિયારામા યાચકા વિચરન્ત્વિહ ॥ ૨૬॥

તસ્યૈવં દદતઃ શાપં શ્રુત્વા દ્વિજકુલાય વૈ ।
ભૃગુઃ પ્રત્યસૃજચ્છાપં બ્રહ્મદણ્ડં દુરત્યયમ્ ॥ ૨૭॥

ભવવ્રતધરા યે ચ યે ચ તાન્ સમનુવ્રતાઃ
પાખણ્ડિનસ્તે ભવન્તુ સચ્છાસ્ત્રપરિપન્થિનઃ ॥ ૨૮॥

નષ્ટશૌચા મૂઢધિયો જટાભસ્માસ્થિધારિણઃ ।
વિશન્તુ શિવદીક્ષાયાં યત્ર દૈવં સુરાસવમ્ ॥ ૨૯॥

બ્રહ્મ ચ બ્રાહ્મણાંશ્ચૈવ યદ્યૂયં પરિનિન્દથ ।
સેતું વિધારણં પુંસામતઃ પાખણ્ડમાશ્રિતાઃ ॥ ૩૦॥

એષ એવ હિ લોકાનાં શિવઃ પન્થાઃ સનાતનઃ ।
યં પૂર્વે ચાનુસન્તસ્થુર્યત્પ્રમાણં જનાર્દનઃ ॥ ૩૧॥

તદ્બ્રહ્મ પરમં શુદ્ધં સતાં વર્ત્મ સનાતનમ્ ।
વિગર્હ્ય યાત પાખણ્ડં દૈવં વો યત્ર ભૂતરાટ્ ॥ ૩૨॥

મૈત્રેય ઉવાચ
તસ્યૈવં વદતઃ શાપં ભૃગોઃ સ ભગવાન્ ભવઃ ।
નિશ્ચક્રામ તતઃ કિઞ્ચિદ્વિમના ઇવ સાનુગઃ ॥ ૩૩॥

તેઽપિ વિશ્વસૃજઃ સત્રં સહસ્રપરિવત્સરાન્ ।
સંવિધાય મહેષ્વાસ યત્રેજ્ય ઋષભો હરિઃ ॥ ૩૪॥

આપ્લુત્યાવભૃથં યત્ર ગઙ્ગા યમુનયાન્વિતા ।
વિરજેનાત્મના સર્વે સ્વં સ્વં ધામ યયુસ્તતઃ ॥ ૩૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે દક્ષશાપો નામ દ્વિતીયોધ્યાયઃ ॥ ૨॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ તૃતીયોઽધ્યાયઃ - ૩ ॥

મૈત્રેય ઉવાચ
સદા વિદ્વિષતોરેવં કાલો વૈ ધ્રિયમાણયોઃ ।
જામાતુઃ શ્વશુરસ્યાપિ સુમહાનતિચક્રમે ॥ ૧॥

યદાભિષિક્તો દક્ષસ્તુ બ્રહ્મણા પરમેષ્ઠિના ।
પ્રજાપતીનાં સર્વેષામાધિપત્યે સ્મયોઽભવત્ ॥ ૨॥

ઇષ્ટ્વા સ વાજપેયેન બ્રહ્મિષ્ઠાનભિભૂય ચ ।
બૃહસ્પતિસવં નામ સમારેભે ક્રતૂત્તમમ્ ॥ ૩॥

તસ્મિન્ બ્રહ્મર્ષયઃ સર્વે દેવર્ષિપિતૃદેવતાઃ ।
આસન્ કૃતસ્વસ્ત્યયનાસ્તત્પત્ન્યશ્ચ સભર્તૃકાઃ ॥ ૪॥

તદુપશ્રુત્ય નભસિ ખેચરાણાં પ્રજલ્પતામ્ ।
સતી દાક્ષાયણી દેવી પિતુર્યજ્ઞમહોત્સવમ્ ॥ ૫॥

વ્રજન્તીઃ સર્વતો દિગ્ભ્ય ઉપદેવવરસ્ત્રિયઃ ।
વિમાનયાનાઃ સપ્રેષ્ઠા નિષ્કકણ્ઠીઃ સુવાસસઃ ॥ ૬॥

દૃષ્ટ્વા સ્વનિલયાભ્યાશે લોલાક્ષીર્મૃષ્ટકુણ્ડલાઃ ।
પતિં ભૂતપતિં દેવમૌત્સુક્યાદભ્યભાષત ॥ ૭॥

સત્યુવાચ
પ્રજાપતેસ્તે શ્વશુરસ્ય સામ્પ્રતં
નિર્યાપિતો યજ્ઞમહોત્સવઃ કિલ ।
વયં ચ તત્રાભિસરામ વામ તે
યદ્યર્થિતામી વિબુધા વ્રજન્તિ હિ ॥ ૮॥

તસ્મિન્ ભગિન્યો મમ ભર્તૃભિઃ સ્વકૈ-
ર્ધ્રુવં ગમિષ્યન્તિ સુહૃદ્દિદૃક્ષવઃ ।
અહં ચ તસ્મિન્ ભવતાભિકામયે
સહોપનીતં પરિબર્હમર્હિતુમ્ ॥ ૯॥

તત્ર સ્વસૄર્મે નનુ ભર્તૃસમ્મિતા
માતૃષ્વસૄઃ ક્લિન્નધિયં ચ માતરમ્ ।
દ્રક્ષ્યે ચિરોત્કણ્ઠમના મહર્ષિભિ-
રુન્નીયમાનં ચ મૃડાધ્વરધ્વજમ્ ॥ ૧૦॥

ત્વય્યેતદાશ્ચર્યમજાત્મમાયયા
વિનિર્મિતં ભાતિ ગુણત્રયાત્મકમ્ ।
તથાપ્યહં યોષિદતત્ત્વવિચ્ચ તે
દીના દિદૃક્ષે ભવ મે ભવક્ષિતિમ્ ॥ ૧૧॥

પશ્ય પ્રયાન્તીરભવાન્યયોષિતો-
ઽપ્યલઙ્કૃતાઃ કાન્તસખા વરૂથશઃ ।
યાસાં વ્રજદ્ભિઃ શિતિકણ્ઠમણ્ડિતં
નભો વિમાનૈઃ કલહંસપાણ્ડુભિઃ ॥ ૧૨॥

કથં સુતાયાઃ પિતૃગેહકૌતુકં
નિશમ્ય દેહઃ સુરવર્ય નેઙ્ગતે ।
અનાહુતા અપ્યભિયન્તિ સૌહૃદં
ભર્તુર્ગુરોર્દેહકૃતશ્ચ કેતનમ્ ॥ ૧૩॥

તન્મે પ્રસીદેદમમર્ત્યવાઞ્છિતં
કર્તું ભવાન્ કારુણિકો બતાર્હતિ ।
ત્વયાઽઽત્મનોઽર્ધેઽહમદભ્રચક્ષુષા
નિરૂપિતા માનુગૃહાણ યાચિતઃ ॥ ૧૪॥

ઋષિરુવાચ
એવં ગિરિત્રઃ પ્રિયયાભિભાષિતઃ
પ્રત્યભ્યધત્ત પ્રહસન્ સુહૃત્પ્રિયઃ ।
સંસ્મારિતો મર્મભિદઃ કુવાગિષૂન્
યાનાહ કો વિશ્વસૃજાં સમક્ષતઃ ॥ ૧૫॥

શ્રીભગવાનુવાચ
ત્વયોદિતં શોભનમેવ શોભને
અનાહુતા અપ્યભિયન્તિ બન્ધુષુ ।
તે યદ્યનુત્પાદિતદોષદૃષ્ટયો
બલીયસાનાત્મ્યમદેન મન્યુના ॥ ૧૬॥

વિદ્યાતપોવિત્તવપુર્વયઃકુલૈઃ
સતાં ગુણૈઃ ષડ્ભિરસત્તમેતરૈઃ ।
સ્મૃતૌ હતાયાં ભૃતમાનદુર્દૃશઃ

સ્તબ્ધા ન પશ્યન્તિ હિ ધામ ભૂયસામ્ ॥ ૧૭॥

નૈતાદૃશાનાં સ્વજનવ્યપેક્ષયા
ગૃહાન્ પ્રતીયાદનવસ્થિતાત્મનામ્ ।
યેઽભ્યાગતાન્ વક્રધિયાભિચક્ષતે
આરોપિતભ્રૂભિરમર્ષણાક્ષિભિઃ ॥ ૧૮॥

તથારિભિર્ન વ્યથતે શિલીમુખૈઃ
શેતેઽર્દિતાઙ્ગો હૃદયેન દૂયતા ।
સ્વાનાં યથા વક્રધિયાં દુરુક્તિભિ-
ર્દિવાનિશં તપ્યતિ મર્મતાડિતઃ ॥ ૧૯॥

વ્યક્તં ત્વમુત્કૃષ્ટગતેઃ પ્રજાપતેઃ
પ્રિયાઽઽત્મજાનામસિ સુભ્રુ સમ્મતા ।
અથાપિ માનં ન પિતુઃ પ્રપત્સ્યસે
મદાશ્રયાત્કઃ પરિતપ્યતે યતઃ ॥ ૨૦॥

પાપચ્યમાનેન હૃદાઽઽતુરેન્દ્રિયઃ
સમૃદ્ધિભિઃ પૂરુષબુદ્ધિસાક્ષિણામ્ ।
અકલ્પ એષામધિરોઢુમઞ્જસા
પદં પરં દ્વેષ્ટિ યથાસુરા હરિમ્ ॥ ૨૧॥

પ્રત્યુદ્ગમપ્રશ્રયણાભિવાદનં
વિધીયતે સાધુ મિથઃ સુમધ્યમે ।
પ્રાજ્ઞૈઃ પરસ્મૈ પુરુષાય ચેતસા
ગુહાશયાયૈવ ન દેહમાનિને ॥ ૨૨॥

સત્ત્વં વિશુદ્ધં વસુદેવશબ્દિતં
યદીયતે તત્ર પુમાનપાવૃતઃ ।
સત્ત્વે ચ તસ્મિન્ ભગવાન્ વાસુદેવો
હ્યધોક્ષજો મે નમસા વિધીયતે ॥ ૨૩॥

તત્તે નિરીક્ષ્યો ન પિતાપિ દેહકૃ-
દ્દક્ષો મમ દ્વિટ્ તદનુવ્રતાશ્ચ યે ।
યો વિશ્વસૃગ્યજ્ઞગતં વરોરુ મા-
મનાગસં દુર્વચસાકરોત્તિરઃ ॥ ૨૪॥

યદિ વ્રજિષ્યસ્યતિહાય મદ્વચો
ભદ્રં ભવત્યા ન તતો ભવિષ્યતિ ।
સમ્ભાવિતસ્ય સ્વજનાત્પરાભવો
યદા સ સદ્યો મરણાય કલ્પતે ॥ ૨૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે સતીરુદ્રસંવાદે તૃતીયોઽધ્યાયઃ ॥ ૩॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ચતુર્થોઽધ્યાયઃ - ૪ ॥

મૈત્રેય ઉવાચ
એતાવદુક્ત્વા વિરરામ શઙ્કરઃ
પત્ન્યઙ્ગનાશં હ્યુભયત્ર ચિન્તયન્ ।
સુહૃદ્દિદૃક્ષુઃ પરિશઙ્કિતા ભવા-
ન્નિષ્ક્રામતી નિર્વિશતી દ્વિધાઽઽસ સા ॥ ૧॥

સુહૃદ્દિદૃક્ષાપ્રતિઘાતદુર્મનાઃ
સ્નેહાદ્રુદત્યશ્રુકલાતિવિહ્વલા ।
ભવં ભવાન્યપ્રતિપૂરુષં રુષા
પ્રધક્ષ્યતીવૈક્ષત જાતવેપથુઃ ॥ ૨॥

તતો વિનિઃશ્વસ્ય સતી વિહાય તં
શોકેન રોષેણ ચ દૂયતા હૃદા ।
પિત્રોરગાત્સ્ત્રૈણવિમૂઢધીર્ગૃહાન્
પ્રેમ્ણાઽઽત્મનો યોઽર્ધમદાત્સતાં પ્રિયઃ ॥ ૩॥

તામન્વગચ્છન્દ્રુતવિક્રમાં સતી-
મેકાં ત્રિનેત્રાનુચરાઃ સહસ્રશઃ ।
સપાર્ષદયક્ષા મણિમન્મદાદયઃ
પુરો વૃષેન્દ્રાસ્તરસા ગતવ્યથાઃ ॥ ૪॥

તાં સારિકાકન્દુકદર્પણામ્બુજ-

શ્વેતાતપત્રવ્યજનસ્રગાદિભિઃ ।
ગીતાયનૈર્દુન્દુભિશઙ્ખવેણુભિ-
ર્વૃષેન્દ્રમારોપ્ય વિટઙ્કિતા યયુઃ ॥ ૫॥

આબ્રહ્મઘોષોર્જિતયજ્ઞવૈશસં
વિપ્રર્ષિજુષ્ટં વિબુધૈશ્ચ સર્વશઃ ।
મૃદ્દાર્વયઃકાઞ્ચનદર્ભચર્મભિ-
ર્નિસૃષ્ટભાણ્ડં યજનં સમાવિશત્ ॥ ૬॥

તામાગતાં તત્ર ન કશ્ચનાદ્રિય-
દ્વિમાનિતાં યજ્ઞકૃતો ભયાજ્જનઃ ।
ઋતે સ્વસૄર્વૈ જનનીં ચ સાદરાઃ
પ્રેમાશ્રુકણ્ઠ્યઃ પરિષસ્વજુર્મુદા ॥ ૭॥

સૌદર્યસમ્પ્રશ્નસમર્થવાર્તયા
માત્રા ચ માતૃષ્વસૃભિશ્ચ સાદરમ્ ।
દત્તાં સપર્યાં વરમાસનં ચ સા
નાદત્ત પિત્રાઽપ્રતિનન્દિતા સતી ॥ ૮॥

અરુદ્રભાગં તમવેક્ષ્ય ચાધ્વરં
પિત્રા ચ દેવે કૃતહેલનં વિભૌ ।
અનાદૃતા યજ્ઞસદસ્યધીશ્વરી
ચુકોપ લોકાનિવ ધક્ષ્યતી રુષા ॥ ૯॥

જગર્હ સામર્ષવિપન્નયા ગિરા
શિવદ્વિષં ધૂમપથશ્રમસ્મયમ્ ।
સ્વતેજસા ભૂતગણાન્ સમુત્થિતાન્
નિગૃહ્ય દેવી જગતોઽભિશ◌ૃણ્વતઃ ॥ ૧૦॥

દેવ્યુવાચ
ન યસ્ય લોકેઽસ્ત્યતિશાયનઃ પ્રિયઃ
તથાપ્રિયો દેહભૃતાં પ્રિયાત્મનઃ ।
તસ્મિન્ સમસ્તાત્મનિ મુક્તવૈરકે
ઋતે ભવન્તં કતમઃ પ્રતીપયેત્ ॥ ૧૧॥

દોષાન્ પરેષાં હિ ગુણેષુ સાધવો
ગૃહ્ણન્તિ કેચિન્ન ભવાદૃશા દ્વિજ ।

ગુણાંશ્ચ ફલ્ગૂન્ બહુલીકરિષ્ણવો
મહત્તમાસ્તેષ્વવિદદ્ભવાનઘમ્ ॥ ૧૨॥

નાશ્ચર્યમેતદ્યદસત્સુ સર્વદા
મહદ્વિનિન્દા કુણપાત્મવાદિષુ ।
સેર્ષ્યં મહાપૂરુષપાદપાંસુભિઃ
નિરસ્તતેજઃસુ તદેવ શોભનમ્ ॥ ૧૩॥

યદ્ દ્વ્યક્ષરં નામ ગિરેરિતં નૃણાં
સકૃત્પ્રસઙ્ગાદઘમાશુ હન્તિ તત્ ।
પવિત્રકીર્તિં તમલઙ્ઘ્યશાસનં
ભવાનહો દ્વેષ્ટિ શિવં શિવેતરઃ ॥ ૧૪॥

યત્પાદપદ્મં મહતાં મનોઽલિભિઃ
નિષેવિતં બ્રહ્મરસાસવાર્થિભિઃ ।
લોકસ્ય યદ્વર્ષતિ ચાશિષોઽર્થિનઃ
તસ્મૈ ભવાન્ દ્રુહ્યતિ વિશ્વબન્ધવે ॥ ૧૫॥

કિં વા શિવાખ્યમશિવં ન વિદુસ્ત્વદન્યે
બ્રહ્માદયસ્તમવકીર્ય જટાઃ શ્મશાને ।
તન્માલ્યભસ્મનૃકપાલ્યવસત્પિશાચૈ-
ર્યે મૂર્ધભિર્દધતિ તચ્ચરણાવસૃષ્ટમ્ ॥ ૧૬॥

કર્ણૌ પિધાય નિરયાદ્યદકલ્પ ઈશે
ધર્માવિતર્યસૃણિભિર્નૃભિરસ્યમાને ।
છિન્દ્યાત્પ્રસહ્ય રુશતીમસતીં પ્રભુશ્ચે-
જ્જિહ્વામસૂનપિ તતો વિસૃજેત્સ ધર્મઃ ॥ ૧૭॥

અતસ્તવોત્પન્નમિદં કલેવરં
ન ધારયિષ્યે શિતિકણ્ઠગર્હિણઃ ।
જગ્ધસ્ય મોહાદ્ધિ વિશુદ્ધિમન્ધસો
જુગુપ્સિતસ્યોદ્ધરણં પ્રચક્ષતે ॥ ૧૮॥

ન વેદવાદાનનુવર્તતે મતિઃ
સ્વ એવ લોકે રમતો મહામુનેઃ ।
યથા ગતિર્દેવમનુષ્યયોઃ પૃથક્
સ્વ એવ ધર્મે ન પરં ક્ષિપેત્સ્થિતઃ ॥ ૧૯॥

કર્મપ્રવૃત્તં ચ નિવૃત્તમપ્યૃતં
વેદે વિવિચ્યોભયલિઙ્ગમાશ્રિતમ્ ।
વિરોધિ તદ્યૌગપદૈકકર્તરિ
દ્વયં તથા બ્રહ્મણિ કર્મ નર્ચ્છતિ ॥ ૨૦॥

મા વઃ પદવ્યઃ પિતરસ્મદાસ્થિતા
યા યજ્ઞશાલાસુ ન ધૂમવર્ત્મભિઃ ।
તદન્નતૃપ્તૈરસુભૃદ્ભિરીડિતા
અવ્યક્તલિઙ્ગા અવધૂતસેવિતાઃ ॥ ૨૧॥

નૈતેન દેહેન હરે કૃતાગસો
દેહોદ્ભવેનાલમલં કુજન્મના ।
વ્રીડા મમાભૂત્કુજનપ્રસઙ્ગતઃ
તજ્જન્મ ધિગ્યો મહતામવદ્યકૃત્ ॥ ૨૨॥

ગોત્રં ત્વદીયં ભગવાન્ વૃષધ્વજો
દાક્ષાયણીત્યાહ યદા સુદુર્મનાઃ ।
વ્યપેતનર્મસ્મિતમાશુ તદ્ધ્યહં
વ્યુત્સ્રક્ષ્ય એતત્કુણપં ત્વદઙ્ગજમ્ ॥ ૨૩॥

મૈત્રેય ઉવાચ
ઇત્યધ્વરે દક્ષમનૂદ્ય શત્રુહન્
ક્ષિતાવુદીચીં નિષસાદ શાન્તવાક્ ।
સ્પૃષ્ટ્વા જલં પીતદુકૂલસંવૃતા
નિમીલ્ય દૃગ્યોગપથં સમાવિશત્ ॥ ૨૪॥

કૃત્વા સમાનાવનિલૌ જિતાસના
સોદાનમુત્થાપ્ય ચ નાભિચક્રતઃ ।
શનૈર્હૃદિ સ્થાપ્ય ધિયોરસિ સ્થિતં
કણ્ઠાદ્ભ્રુવોર્મધ્યમનિન્દિતાનયત્ ॥ ૨૫॥

એવં સ્વદેહં મહતાં મહીયસા
મુહુઃ સમારોપિતમઙ્કમાદરાત્ ।
જિહાસતી દક્ષરુષા મનસ્વિની
દધાર ગાત્રેષ્વનિલાગ્નિધારણામ્ ॥ ૨૬॥

તતઃ સ્વભર્તુશ્ચરણામ્બુજાસવં
જગદ્ગુરોશ્ચિન્તયતી ન ચાપરમ્ ।
દદર્શ દેહો હતકલ્મષઃ સતી
સદ્યઃ પ્રજજ્વાલ સમાધિજાગ્નિના ॥ ૨૭॥

તત્પશ્યતાં ખે ભુવિ ચાદ્ભુતં મહત્
હા હેતિ વાદઃ સુમહાનજાયત ।
હન્ત પ્રિયા દૈવતમસ્ય દેવી
જહાવસૂન્ કેન સતી પ્રકોપિતા ॥ ૨૮॥

અહો અનાત્મ્યં મહદસ્ય પશ્યત
પ્રજાપતેર્યસ્ય ચરાચરં પ્રજાઃ ।
જહાવસૂન્ યદ્વિમતાઽઽત્મજા સતી
મનસ્વિની માનમભીક્ષ્ણમર્હતિ ॥ ૨૯॥

સોઽયં દુર્મર્ષહૃદયો બ્રહ્મધ્રુક્ ચ
લોકેઽપકીર્તિં મહતીમવાપ્સ્યતિ ।
યદઙ્ગજાં સ્વાં પુરુષદ્વિડુદ્યતાં
ન પ્રત્યષેધન્મૃતયેઽપરાધતઃ ॥ ૩૦॥

વદત્યેવં જને સત્યા દૃષ્ટ્વાસુત્યાગમદ્ભુતમ્ ।
દક્ષં તત્પાર્ષદા હન્તુમુદતિષ્ઠન્નુદાયુધાઃ ॥ ૩૧॥

તેષામાપતતાં વેગં નિશામ્ય ભગવાન્ ભૃગુઃ ।
યજ્ઞઘ્નઘ્નેન યજુષા દક્ષિણાગ્નૌ જુહાવ હ ॥ ૩૨॥

અધ્વર્યુણા હૂયમાને દેવા ઉત્પેતુરોજસા ।
ઋભવો નામ તપસા સોમં પ્રાપ્તાઃ સહસ્રશઃ ॥ ૩૩॥

તૈરલાતાયુધૈઃ સર્વે પ્રમથાઃ સહ ગુહ્યકાઃ ।
હન્યમાના દિશો ભેજુરુશદ્ભિર્બ્રહ્મતેજસા ॥ ૩૪॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે સતીદેહોત્સર્ગો નામ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ પઞ્ચમોઽધ્યાયઃ - ૫ ॥

મૈત્રેય ઉવાચ
ભવો ભવાન્યા નિધનં પ્રજાપતે-
રસત્કૃતાયા અવગમ્ય નારદાત્ ।
સ્વપાર્ષદસૈન્યં ચ તદધ્વરર્ભુભિ-
ર્વિદ્રાવિતં ક્રોધમપારમાદધે ॥ ૧॥

ક્રુદ્ધઃ સુદષ્ટૌષ્ઠપુટઃ સ ધૂર્જટિ-
ર્જટાં તડિદ્વહ્નિસટોગ્રરોચિષમ્ ।
ઉત્કૃત્ય રુદ્રઃ સહસોત્થિતો હસન્
ગમ્ભીરનાદો વિસસર્જ તાં ભુવિ ॥ ૨॥

તતોઽતિકાયસ્તનુવા સ્પૃશન્ દિવં
સહસ્રબાહુર્ઘનરુક્ ત્રિસૂર્યદૃક્ ।
કરાલદંષ્ટ્રો જ્વલદગ્નિમૂર્ધજઃ
કપાલમાલી વિવિધોદ્યતાયુધઃ ॥ ૩॥

તં કિં કરોમીતિ ગૃણન્તમાહ
બદ્ધાઞ્જલિં ભગવાન્ ભૂતનાથઃ ।
દક્ષં સયજ્ઞં જહિ મદ્ભટાનાં
ત્વમગ્રણી રુદ્રભટાંશકો મે ॥ ૪॥

આજ્ઞપ્ત એવં કુપિતેન મન્યુના
સ દેવદેવં પરિચક્રમે વિભુમ્ ।
મેને તદાત્માનમસઙ્ગરંહસા
મહીયસાં તાત સહઃ સહિષ્ણુમ્ ॥ ૫॥

અન્વીયમાનઃ સ તુ રુદ્ર પાર્ષદૈ-
ર્ભૃશન્નદદ્ભિર્વ્યનદત્સુભૈરવમ્ ।
ઉદ્યમ્ય શૂલં જગદન્તકાન્તકં
સ પ્રાદ્રવદ્ઘોષણભૂષણાઙ્ઘ્રિઃ ॥ ૬॥

અથર્ત્વિજો યજમાનઃ સદસ્યાઃ

કકુદ્ભ્યુદીચ્યાં પ્રસમીક્ષ્ય રેણુમ્ ।
તમઃ કિમેતત્કુત એતદ્રજોઽભૂ-
દિતિ દ્વિજા દ્વિજપત્ન્યશ્ચ દધ્યુઃ ॥ ૭॥

વાતા ન વાન્તિ ન હિ સન્તિ દસ્યવઃ
પ્રાચીનબર્હિર્જીવતિ હોગ્રદણ્ડઃ ।
ગાવો ન કાલ્યન્ત ઇદં કુતો રજો
લોકોઽધુના કિં પ્રલયાય કલ્પતે ॥ ૮॥

પ્રસૂતિમિશ્રાઃ સ્ત્રિય ઉદ્વિગ્નચિત્તા
ઊચુર્વિપાકો વૃજિનસ્યૈવ તસ્ય ।
યત્પશ્યન્તીનાં દુહિતૃણાં પ્રજેશઃ
સુતાં સતીમવદધ્યાવનાગામ્ ॥ ૯॥

યસ્ત્વન્તકાલે વ્યુપ્તજટાકલાપઃ
સ્વશૂલસૂચ્યર્પિતદિગ્ગજેન્દ્રઃ ।
વિતત્ય નૃત્યત્યુદિતાસ્ત્રદોર્ધ્વજા-
નુચ્ચાટ્ટહાસસ્તનયિત્નુભિન્નદિક્ ॥ ૧૦॥

અમર્ષયિત્વા તમસહ્યતેજસં
મન્યુપ્લુતં દુર્વિષહં ભ્રુકુટ્યા ।
કરાલદંષ્ટ્રાભિરુદસ્તભાગણં
સ્યાત્સ્વસ્તિ કિં કોપયતો વિધાતુઃ ॥ ૧૧॥

બહ્વેવમુદ્વિગ્નદૃશોચ્યમાને
જનેન દક્ષસ્ય મુહુર્મહાત્મનઃ ।
ઉત્પેતુરુત્પાતતમાઃ સહસ્રશો
ભયાવહા દિવિ ભૂમૌ ચ પર્યક્ ॥ ૧૨॥

તાવત્સ રુદ્રાનુચરૈર્મખો મહાન્
નાનાયુધૈર્વામનકૈરુદાયુધૈઃ ।
પિઙ્ગૈઃ પિશઙ્ગૈર્મકરોદરાનનૈઃ
પર્યાદ્રવદ્ભિર્વિદુરાન્વરુધ્યત ॥ ૧૩॥

કેચિદ્બભઞ્જુઃ પ્રાગ્વંશં પત્નીશાલાં તથાપરે ।
સદ આગ્નીધ્રશાલાં ચ તદ્વિહારં મહાનસમ્ ॥ ૧૪॥

રુરુજુર્યજ્ઞપાત્રાણિ તથૈકેઽગ્નીનનાશયન્ ।
કુણ્ડેષ્વમૂત્રયન્ કેચિદ્બિભિદુર્વેદિમેખલાઃ ॥ ૧૫॥

અબાધન્ત મુનીનન્યે એકે પત્નીરતર્જયન્ ।
અપરે જગૃહુર્દેવાન્ પ્રત્યાસન્નાન્ પલાયિતાન્ ॥ ૧૬॥

ભૃગું બબન્ધ મણિમાન્ વીરભદ્રઃ પ્રજાપતિમ્ ।
ચણ્ડેશઃ પૂષણં દેવં ભગં નન્દીશ્વરોઽગ્રહીત્ ॥ ૧૭॥

સર્વ એવર્ત્વિજો દૃષ્ટ્વા સદસ્યાઃ સદિવૌકસઃ ।
તૈરર્દ્યમાનાઃ સુભૃશં ગ્રાવભિર્નૈકધાદ્રવન્ ॥ ૧૮॥

જુહ્વતઃ સ્રુવહસ્તસ્ય શ્મશ્રૂણિ ભગવાન્ ભવઃ ।
ભૃગોર્લુલુઞ્ચે સદસિ યોઽહસચ્છ્મશ્રુ દર્શયન્ ॥ ૧૯॥

ભગસ્ય નેત્રે ભગવાન્ પાતિતસ્ય રુષા ભુવિ ।
ઉજ્જહાર સદઃસ્થોઽક્ષ્ણા યઃ શપન્તમસૂસુચત્ ॥ ૨૦॥

પૂષ્ણશ્ચાપાતયદ્દન્તાન્ કાલિઙ્ગસ્ય યથા બલઃ ।
શપ્યમાને ગરિમણિ યોઽહસદ્દર્શયન્ દતઃ ॥ ૨૧॥

આક્રમ્યોરસિ દક્ષસ્ય શિતધારેણ હેતિના ।
છિન્દન્નપિ તદુદ્ધર્તું નાશક્નોત્ત્ર્યમ્બકસ્તદા ॥ ૨૨॥

શસ્ત્રૈરસ્ત્રાન્વિતૈરેવમનિર્ભિન્નત્વચં હરઃ ।
વિસ્મયં પરમાપન્નો દધ્યૌ પશુપતિશ્ચિરમ્ ॥ ૨૩॥

દૃષ્ટ્વા સંજ્ઞપનં યોગં પશૂનાં સ પતિર્મખે ।
યજમાનપશોઃ કસ્ય કાયાત્તેનાહરચ્છિરઃ ॥ ૨૪॥

સાધુવાદસ્તદા તેષાં કર્મ તત્તસ્ય પશ્યતામ્ ।
ભૂતપ્રેતપિશાચાનામન્યેષાં તદ્વિપર્યયઃ ॥ ૨૫॥

જુહાવૈતચ્છિરસ્તસ્મિન્ દક્ષિણાગ્નાવમર્ષિતઃ ।
તદ્દેવયજનં દગ્ધ્વા પ્રાતિષ્ઠદ્ગુહ્યકાલયમ્ ॥ ૨૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે દક્ષયજ્ઞવિધ્વંસો નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ષષ્ઠોઽધ્યાયઃ - ૬ ॥

મૈત્રેય ઉવાચ
અથ દેવગણાઃ સર્વે રુદ્રાનીકૈઃ પરાજિતાઃ ।
શૂલપટ્ટિશનિસ્ત્રિંશગદાપરિઘમુદ્ગરૈઃ ॥ ૧॥

સઞ્છિન્નભિન્નસર્વાઙ્ગાઃ સર્ત્વિક્સભ્યા ભયાકુલાઃ ।
સ્વયમ્ભુવે નમસ્કૃત્ય કાર્ત્સ્ન્યેનૈતન્ન્યવેદયન્ ॥ ૨॥

ઉપલભ્ય પુરૈવૈતદ્ભગવાનબ્જસમ્ભવઃ ।
નારાયણશ્ચ વિશ્વાત્મા ન કસ્યાધ્વરમીયતુઃ ॥ ૩॥

તદાકર્ણ્ય વિભુઃ પ્રાહ તેજીયસિ કૃતાગસિ ।
ક્ષેમાય તત્ર સા ભૂયાન્ન પ્રાયેણ બુભૂષતામ્ ॥ ૪॥

અથાપિ યૂયં કૃતકિલ્બિષા ભવં
યે બર્હિષો ભાગભાજં પરાદુઃ ।
પ્રસાદયધ્વં પરિશુદ્ધચેતસા
ક્ષિપ્રપ્રસાદં પ્રગૃહીતાઙ્ઘ્રિપદ્મમ્ ॥ ૫॥

આશાસાના જીવિતમધ્વરસ્ય
લોકઃ સપાલઃ કુપિતે ન યસ્મિન્ ।
તમાશુ દેવં પ્રિયયા વિહીનં
ક્ષમાપયધ્વં હૃદિ વિદ્ધં દુરુક્તૈઃ ॥ ૬॥

નાહં ન યજ્ઞો ન ચ યૂયમન્યે
યે દેહભાજો મુનયશ્ચ તત્ત્વમ્ ।
વિદુઃ પ્રમાણં બલવીર્યયોર્વા
યસ્યાત્મતન્ત્રસ્ય ક ઉપાયં વિધિત્સેત્ ॥ ૭॥

સ ઇત્થમાદિશ્ય સુરાનજસ્તૈઃ
સમન્વિતઃ પિતૃભિઃ સપ્રજેશૈઃ ।
યયૌ સ્વધિષ્ણ્યાન્નિલયં પુરદ્વિષઃ
કૈલાસમદ્રિપ્રવરં પ્રિયં પ્રભોઃ ॥ ૮॥

જન્મૌષધિતપોમન્ત્રયોગસિદ્ધૈર્નરેતરૈઃ ।
જુષ્ટં કિન્નરગન્ધર્વૈરપ્સરોભિર્વૃતં સદા ॥ ૯॥

નાનામણિમયૈઃ શ‍ૃઙ્ગૈર્નાનાધાતુવિચિત્રિતૈઃ ।
નાનાદ્રુમલતાગુલ્મૈર્નાનામૃગગણાવૃતૈઃ ॥ ૧૦॥

નાનામલપ્રસ્રવણૈર્નાનાકન્દરસાનુભિઃ ।
રમણં વિહરન્તીનાં રમણૈઃ સિદ્ધયોષિતામ્ ॥ ૧૧॥

મયૂરકેકાભિરુતં મદાન્ધાલિવિમૂર્ચ્છિતમ્ ।
પ્લાવિતૈ રક્તકણ્ઠાનાં કૂજિતૈશ્ચ પતત્રિણામ્ ॥ ૧૨॥

આહ્વયન્તમિવોદ્ધસ્તૈર્દ્વિજાન્ કામદુઘૈર્દ્રુમૈઃ ।
વ્રજન્તમિવ માતઙ્ગૈર્ગૃણન્તમિવ નિર્ઝરૈઃ ॥ ૧૩॥

મન્દારૈઃ પારિજાતૈશ્ચ સરલૈશ્ચોપશોભિતમ્ ।
તમાલૈઃ શાલતાલૈશ્ચ કોવિદારાસનાર્જુનૈઃ ॥ ૧૪॥

ચૂતૈઃ કદમ્બૈર્નીપૈશ્ચ નાગપુન્નાગચમ્પકૈઃ ।
પાટલાશોકબકુલૈઃ કુન્દૈઃ કુરબકૈરપિ ॥ ૧૫॥

સ્વર્ણાર્ણશતપત્રૈશ્ચ વરરેણુકજાતિભિઃ ।
કુબ્જકૈર્મલ્લિકાભિશ્ચ માધવીભિશ્ચ મણ્ડિતમ્ ॥ ૧૬॥

પનસોદુમ્બરાશ્વત્થપ્લક્ષન્યગ્રોધહિઙ્ગુભિઃ ।
ભૂર્જૈરોષધિભિઃ પૂગૈ રાજપૂગૈશ્ચ જમ્બુભિઃ ॥ ૧૭॥

ખર્જૂરામ્રાતકામ્રાદ્યૈઃ પ્રિયાલમધુકેઙ્ગુદૈઃ ।
દ્રુમજાતિભિરન્યૈશ્ચ રાજિતં વેણુકીચકૈઃ ॥ ૧૮॥

કુમુદોત્પલકહ્લારશતપત્રવનર્દ્ધિભિઃ ।
નલિનીષુ કલં કૂજત્ખગવૃન્દોપશોભિતમ્ ॥ ૧૯॥

મૃગૈઃ શાખામૃગૈઃ ક્રોડૈર્મૃગેન્દ્રૈરૃક્ષશલ્યકૈઃ
ગવયૈઃ શરભૈર્વ્યાઘ્રૈ રુરુભિર્મહિષાદિભિઃ ॥ ૨૦॥

કર્ણાન્ત્રૈકપદાશ્વાસ્યૈર્નિર્જુષ્ટં વૃકનાભિભિઃ ।
કદલીખણ્ડસંરુદ્ધનલિનીપુલિનશ્રિયમ્ ॥ ૨૧॥

પર્યસ્તં નન્દયા સત્યાઃ સ્નાનપુણ્યતરોદયા ।
વિલોક્ય ભૂતેશગિરિં વિબુધા વિસ્મયં યયુઃ ॥ ૨૨॥

દદૃશુસ્તત્ર તે રમ્યામલકાં નામ વૈ પુરીમ્ ।
વનં સૌગન્ધિકં ચાપિ યત્ર તન્નામપઙ્કજમ્ ॥ ૨૩॥

નન્દા ચાલકનન્દા ચ સરિતૌ બાહ્યતઃ પુરઃ ।
તીર્થપાદપદામ્ભોજરજસાતીવ પાવને ॥ ૨૪॥

યયોઃ સુરસ્ત્રિયઃ ક્ષત્તરવરુહ્ય સ્વધિષ્ણ્યતઃ ।
ક્રીડન્તિ પુંસઃ સિઞ્ચન્ત્યો વિગાહ્ય રતિકર્શિતાઃ ॥ ૨૫॥

યયોસ્તત્સ્નાનવિભ્રષ્ટનવકુઙ્કુમપિઞ્જરમ્ ।
વિતૃષોઽપિ પિબન્ત્યમ્ભઃ પાયયન્તો ગજા ગજીઃ ॥ ૨૬॥

તારહેમમહારત્નવિમાનશતસઙ્કુલામ્ ।
જુષ્ટાં પુણ્યજનસ્ત્રીભિર્યથા ખં સતડિદ્ઘનમ્ ॥ ૨૭॥

હિત્વા યક્ષેશ્વરપુરીં વનં સૌગન્ધિકં ચ તત્ ।
દ્રુમૈઃ કામદુઘૈર્હૃદ્યં ચિત્રમાલ્યફલચ્છદૈઃ ॥ ૨૮॥

રક્તકણ્ઠખગાનીકસ્વરમણ્ડિતષટ્પદમ્ ।
કલહંસકુલપ્રેષ્ઠં ખરદણ્ડજલાશયમ્ ॥ ૨૯॥

વનકુઞ્જરસઙ્ઘૃષ્ટહરિચન્દનવાયુના ।
અધિ પુણ્યજનસ્ત્રીણાં મુહુરુન્મથયન્ મનઃ ॥ ૩૦॥

વૈદૂર્યકૃતસોપાના વાપ્ય ઉત્પલમાલિનીઃ ।
પ્રાપ્તં કિમ્પુરુષૈર્દૃષ્ટ્વા ત આરાદ્દદૃશુર્વટમ્ ॥ ૩૧॥

સ યોજનશતોત્સેધઃ પાદોનવિટપાયતઃ ।
પર્યક્કૃતાચલચ્છાયો નિર્નીડસ્તાપવર્જિતઃ ॥ ૩૨॥

તસ્મિન્ મહાયોગમયે મુમુક્ષુશરણે સુરાઃ ।
દદૃશુઃ શિવમાસીનં ત્યક્તામર્ષમિવાન્તકમ્ ॥ ૩૩॥

(હર હર નમઃ પાર્વતીપતયે હર હર મહાદેવ)
સનન્દનાદ્યૈર્મહાસિદ્ધૈઃ શાન્તૈઃ સંશાન્તવિગ્રહમ્ ।
ઉપાસ્યમાનં સખ્યા ચ ભર્ત્રા ગુહ્યકરક્ષસામ્ ॥ ૩૪॥

વિદ્યાતપોયોગપથમાસ્થિતં તમધીશ્વરમ્ ।
ચરન્તં વિશ્વસુહૃદં વાત્સલ્યાલ્લોકમઙ્ગલમ્ ॥ ૩૫॥

લિઙ્ગં ચ તાપસાભીષ્ટં ભસ્મદણ્ડજટાજિનમ્ ।
અઙ્ગેન સન્ધ્યાભ્રરુચા ચન્દ્રલેખાં ચ બિભ્રતમ્ ॥ ૩૬॥

ઉપવિષ્ટં દર્ભમય્યાં બૃસ્યાં બ્રહ્મ સનાતનમ્ ।
નારદાય પ્રવોચન્તં પૃચ્છતે શ‍ૃણ્વતાં સતામ્ ॥ ૩૭॥

કૃત્વોરૌ દક્ષિણે સવ્યં પાદપદ્મં ચ જાનુનિ ।
બાહું પ્રકોષ્ઠેઽક્ષમાલામાસીનં તર્કમુદ્રયા ॥ ૩૮॥

તં બ્રહ્મનિર્વાણસમાધિમાશ્રિતં
વ્યુપાશ્રિતં ગિરિશં યોગકક્ષામ્ ।
સલોકપાલા મુનયો મનૂના-
માદ્યમ્મનું પ્રાઞ્જલયઃ પ્રણેમુઃ ॥ ૩૯॥

સ તૂપલભ્યાગતમાત્મયોનિં
સુરાસુરેશૈરભિવન્દિતાઙ્ઘ્રિઃ ।
ઉત્થાય ચક્રે શિરસાભિવન્દન-
મર્હત્તમઃ કસ્ય યથૈવ વિષ્ણુઃ ॥ ૪૦॥

તથાપરે સિદ્ધગણા મહર્ષિભિ-
ર્યેવૈ સમન્તાદનુ નીલલોહિતમ્ ।
નમસ્કૃતઃ પ્રાહ શશાઙ્કશેખરં
કૃતપ્રણામં પ્રહસન્નિવાત્મભૂઃ ॥ ૪૧॥

બ્રહ્મોવાચ
જાને ત્વામીશં વિશ્વસ્ય જગતો યોનિબીજયોઃ ।
શક્તેઃ શિવસ્ય ચ પરં યત્તદ્બ્રહ્મ નિરન્તરમ્ ॥ ૪૨॥

ત્વમેવ ભગવન્નેતચ્છિવશક્ત્યોઃ સ્વરૂપયોઃ ।
વિશ્વં સૃજસિ પાસ્યત્સિ ક્રીડન્નૂર્ણપટો યથા ॥ ૪૩॥

ત્વમેવ ધર્માર્થદુઘાભિપત્તયે
દક્ષેણ સૂત્રેણ સસર્જિથાધ્વરમ્ ।
ત્વયૈવ લોકેઽવસિતાશ્ચ સેતવો
યાન્ બ્રાહ્મણાઃ શ્રદ્દધતે ધૃતવ્રતાઃ ॥ ૪૪॥

ત્વં કર્મણાં મઙ્ગલમઙ્ગલાનાં
કર્તુઃ સ્મ લોકં તનુષે સ્વઃ પરં વા ।

અમઙ્ગલાનાં ચ તમિસ્રમુલ્બણં
વિપર્યયઃ કેન તદેવ કસ્યચિત્ ॥ ૪૫॥

ન વૈ સતાં ત્વચ્ચરણાર્પિતાત્મનાં
ભૂતેષુ સર્વેષ્વભિપશ્યતાં તવ ।
ભૂતાનિ ચાત્મન્યપૃથગ્દિદૃક્ષતાં
પ્રાયેણ રોષોઽભિભવેદ્યથા પશુમ્ ॥ ૪૬॥

પૃથગ્ધિયઃ કર્મદૃશો દુરાશયાઃ
પરોદયેનાર્પિતહૃદ્રુજોઽનિશમ્ ।
પરાન્ દુરુક્તૈર્વિતુદન્ત્યરુન્તુદાઃ
તાન્ માવધીદ્દૈવવધાન્ ભવદ્વિધઃ ॥ ૪૭॥

યસ્મિન્ યદા પુષ્કરનાભમાયયા
દુરન્તયા સ્પૃષ્ટધિયઃ પૃથગ્દૃશઃ ।
કુર્વન્તિ તત્ર હ્યનુકમ્પયા કૃપાં
ન સાધવો દૈવબલાત્કૃતે ક્રમમ્ ॥ ૪૮॥

ભવાંસ્તુ પુંસઃ પરમસ્ય માયયા
દુરન્તયાસ્પૃષ્ટમતિઃ સમસ્તદૃક્ ।
તયા હતાત્મસ્વનુકર્મચેતઃ-
સ્વનુગ્રહં કર્તુમિહાર્હસિ પ્રભો ॥ ૪૯॥

કુર્વધ્વરસ્યોદ્ધરણં હતસ્ય ભોઃ
ત્વયાસમાપ્તસ્ય મનો પ્રજાપતેઃ ।
ન યત્ર ભાગં તવ ભાગિનો દદુઃ
કુયજ્વિનો યેન મખો નિનીયતે ॥ ૫૦॥

જીવતાદ્યજમાનોઽયં પ્રપદ્યેતાક્ષિણી ભગઃ ।
ભૃગોઃ શ્મશ્રૂણિ રોહન્તુ પૂષ્ણો દન્તાશ્ચ પૂર્વવત્ ॥ ૫૧॥

દેવાનાં ભગ્નગાત્રાણાં ઋત્વિજાં ચાયુધાશ્મભિઃ ।
ભવતાનુગૃહીતાનામાશુ મન્યોઽસ્ત્વનાતુરમ્ ॥ ૫૨॥

એષ તે રુદ્ર ભાગોઽસ્તુ યદુચ્છિષ્ટોઽધ્વરસ્ય વૈ ।
યજ્ઞસ્તે રુદ્રભાગેન કલ્પતામદ્ય યજ્ઞહન્ ॥ ૫૩॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં

ચતુર્થસ્કન્ધે રુદ્રસાન્ત્વનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૬॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ સપ્તમોઽધ્યાયઃ - ૭ ॥

મૈત્રેય ઉવાચ
ઇત્યજેનાનુનીતેન ભવેન પરિતુષ્યતા ।
અભ્યધાયિ મહાબાહો પ્રહસ્ય શ્રૂયતામિતિ ॥ ૧॥

મહાદેવ ઉવાચ
નાઘં પ્રજેશ બાલાનાં વર્ણયે નાનુચિન્તયે ।
દેવમાયાભિભૂતાનાં દણ્ડસ્તત્ર ધૃતો મયા ॥ ૨॥

પ્રજાપતેર્દગ્ધશીર્ષ્ણો ભવત્વજમુખં શિરઃ ।
મિત્રસ્ય ચક્ષુષેક્ષેત ભાગં સ્વં બર્હિષો ભગઃ ॥ ૩॥

પૂષા તુ યજમાનસ્ય દદ્ભિર્જક્ષતુ પિષ્ટભુક્ ।
દેવાઃ પ્રકૃતસર્વાઙ્ગા યે મ ઉચ્છેષણં દદુઃ ॥ ૪॥

બાહુભ્યામશ્વિનોઃ પૂષ્ણો હસ્તાભ્યાં કૃતબાહવઃ ।
ભવન્ત્વધ્વર્યવશ્ચાન્યે બસ્તશ્મશ્રુર્ભૃગુર્ભવેત્ ॥ ૫॥

મૈત્રેય ઉવાચ
તદા સર્વાણિ ભૂતાનિ શ્રુત્વા મીઢુષ્ટમોદિતમ્ ।
પરિતુષ્ટાત્મભિસ્તાત સાધુ સાધ્વિત્યથાબ્રુવન્ ॥ ૬॥

તતો મીઢ્વાંસમામન્ત્ર્ય શુનાસીરાઃ સહર્ષિભિઃ ।
ભૂયસ્તદ્દેવયજનં સમીઢ્વદ્વેધસો યયુઃ ॥ ૭॥

વિધાય કાર્ત્સ્ન્યેન ચ તદ્યદાહ ભગવાન્ ભવઃ ।
સન્દધુઃ કસ્ય કાયેન સવનીયપશોઃ શિરઃ ॥ ૮॥

સન્ધીયમાને શિરસિ દક્ષો રુદ્રાભિવીક્ષિતઃ ।
સદ્યઃ સુપ્ત ઇવોત્તસ્થૌ દદૃશે ચાગ્રતો મૃડમ્ ॥ ૯॥

તદા વૃષધ્વજદ્વેષકલિલાત્મા પ્રજાપતિઃ ।

શિવાવલોકાદભવચ્છરદ્ધ્રદ ઇવામલઃ ॥ ૧૦॥

ભવસ્તવાય કૃતધીર્નાશક્નોદનુરાગતઃ ।
ઔત્કણ્ઠ્યાદ્બાષ્પકલયા સમ્પરેતાં સુતાં સ્મરન્ ॥ ૧૧॥

કૃચ્છ્રાત્સંસ્તભ્ય ચ મનઃ પ્રેમવિહ્વલિતઃ સુધીઃ ।
શશંસ નિર્વ્યલીકેન ભાવેનેશં પ્રજાપતિઃ ॥ ૧૨॥

દક્ષ ઉવાચ
ભૂયાનનુગ્રહ અહો ભવતા કૃતો મે
દણ્ડસ્ત્વયા મયિ ભૃતો યદપિ પ્રલબ્ધઃ ।
ન બ્રહ્મબન્ધુષુ ચ વાં ભગવન્નવજ્ઞા
તુભ્યં હરેશ્ચ કુત એવ ધૃતવ્રતેષુ ॥ ૧૩॥

વિદ્યાતપોવ્રતધરાન્ મુખતઃ સ્મ વિપ્રાન્
બ્રહ્માત્મતત્ત્વમવિતું પ્રથમં ત્વમસ્રાક્ ।
તદ્બ્રાહ્મણાન્ પરમ સર્વવિપત્સુ પાસિ
પાલઃ પશૂનિવ વિભો પ્રગૃહીતદણ્ડઃ ॥ ૧૪॥

યોઽસૌ મયાવિદિતતત્ત્વદૃશા સભાયાં
ક્ષિપ્તો દુરુક્તિવિશિખૈર્વિગણય્ય તન્મામ્ ।
અર્વાક્પતન્તમર્હત્તમ નિન્દયાપા-
દ્દૃષ્ટ્યાઽઽર્દ્રયા સ ભગવાન્ સ્વકૃતેન તુષ્યેત્ ॥ ૧૫॥

મૈત્રેય ઉવાચ
ક્ષમાપ્યૈવં સ મીઢ્વાંસં બ્રહ્મણા ચાનુમન્ત્રિતઃ ।
કર્મ સન્તાનયામાસ સોપાધ્યાયર્ત્વિગાદિભિઃ ॥ ૧૬॥

વૈષ્ણવં યજ્ઞસન્તત્યૈ ત્રિકપાલં દ્વિજોત્તમાઃ ।
પુરોડાશં નિરવપન્ વીરસંસર્ગશુદ્ધયે ॥ ૧૭॥

અધ્વર્યુણાઽઽત્તહવિષા યજમાનો વિશામ્પતે ।
ધિયા વિશુદ્ધયા દધ્યૌ તથા પ્રાદુરભૂદ્ધરિઃ ॥ ૧૮॥

તદા સ્વપ્રભયા તેષાં દ્યોતયન્ત્યા દિશો દશ ।
મુષ્ણંસ્તેજ ઉપાનીતસ્તાર્ક્ષ્યેણ સ્તોત્રવાજિના ॥ ૧૯॥

શ્યામો હિરણ્યરશનોઽર્કકિરીટજુષ્ટો
નીલાલકભ્રમરમણ્ડિતકુણ્ડલાસ્યઃ ।

કમ્બ્વબ્જચક્રશરચાપગદાસિચર્મ-
વ્યગ્રૈર્હિરણ્મયભુજૈરિવ કર્ણિકારઃ ॥ ૨૦॥

વક્ષસ્યધિશ્રિતવધૂર્વનમાલ્યુદાર-
હાસાવલોકકલયા રમયંશ્ચ વિશ્વમ્ ।
પાર્શ્વભ્રમદ્વ્યજનચામરરાજહંસઃ
શ્વેતાતપત્રશશિનોપરિ રજ્યમાનઃ ॥ ૨૧॥

તમુપાગતમાલક્ષ્ય સર્વે સુરગણાદયઃ ।
પ્રણેમુઃ સહસોત્થાય બ્રહ્મેન્દ્રત્ર્યક્ષનાયકાઃ ॥ ૨૨॥

તત્તેજસા હતરુચઃ સન્નજિહ્વાઃ સસાધ્વસાઃ ।
મૂર્ધ્ના ધૃતાઞ્જલિપુટા ઉપતસ્થુરધોક્ષજમ્ ॥ ૨૩॥

અપ્યર્વાગ્વૃત્તયો યસ્ય મહિ ત્વાત્મભુવાદયઃ ।
યથામતિ ગૃણન્તિ સ્મ કૃતાનુગ્રહવિગ્રહમ્ ॥ ૨૪॥

દક્ષો ગૃહીતાર્હણસાદનોત્તમં
યજ્ઞેશ્વરં વિશ્વસૃજાં પરં ગુરુમ્ ।
સુનન્દનન્દાદ્યનુગૈર્વૃતં મુદા
ગૃણન્ પ્રપેદે પ્રયતઃ કૃતાઞ્જલિઃ ॥ ૨૫॥

દક્ષ ઉવાચ
શુદ્ધં સ્વધામ્ન્યુપરતાખિલબુદ્ધ્યવસ્થં
ચિન્માત્રમેકમભયં પ્રતિષિધ્ય માયામ્ ।
તિષ્ઠંસ્તયૈવ પુરુષત્વમુપેત્ય તસ્યા-
માસ્તેભવાનપરિશુદ્ધ ઇવાત્મતન્ત્રઃ ॥ ૨૬॥

ઋત્વિજ ઊચુઃ
તત્ત્વં ન તે વયમનઞ્જન રુદ્રશાપાત્
કર્મણ્યવગ્રહધિયો ભગવન્ વિદામઃ ।
ધર્મોપલક્ષણમિદં ત્રિવૃદધ્વરાખ્યં
જ્ઞાતં યદર્થમધિદૈવમદો વ્યવસ્થાઃ ॥ ૨૭॥

સદસ્યા ઊચુઃ
ઉત્પત્ત્યધ્વન્યશરણ ઉરુક્લેશદુર્ગેઽન્તકોગ્ર-
વ્યાલાન્વિષ્ટે વિષયમૃગતૃષ્ણાઽઽત્મગેહોરુભારઃ ।

દ્વન્દ્વશ્વભ્રે ખલમૃગભયે શોકદાવેઽજ્ઞસાર્થઃ
પાદૌકસ્તે શરણદ કદા યાતિ કામોપસૃષ્ટઃ ॥ ૨૮॥

રુદ્ર ઉવાચ
તવ વરદ વરાઙ્ઘ્રાવાશિષેહાખિલાર્થે
હ્યપિ મુનિભિરસક્તૈરાદરેણાર્હણીયે ।
યદિ રચિતધિયં માવિદ્યલોકોઽપવિદ્ધં
જપતિ ન ગણયે તત્ત્વત્પરાનુગ્રહેણ ॥ ૨૯॥

ભૃગુરુવાચ
યન્માયયા ગહનયાપહૃતાત્મબોધા
બ્રહ્માદયસ્તનુભૃતસ્તમસિ સ્વપન્તઃ ।
નાત્મન્ શ્રિતં તવ વિદન્ત્યધુનાપિ તત્ત્વં
સોઽયં પ્રસીદતુ ભવાન્ પ્રણતાત્મબન્ધુઃ ॥ ૩૦॥

બ્રહ્મોવાચ
નૈતત્સ્વરૂપં ભવતોઽસૌ પદાર્થ-
ભેદગ્રહૈઃ પુરુષો યાવદીક્ષેત્ ।
જ્ઞાનસ્ય ચાર્થસ્ય ગુણસ્ય ચાશ્રયો
માયામયાદ્વ્યતિરિક્તો યતસ્ત્વમ્ ॥ ૩૧॥

ઇન્દ્ર ઉવાચ
ઇદમપ્યચ્યુત વિશ્વભાવનં વપુરાનન્દકરં મનોદૃશામ્ ।
સુરવિદ્વિટ્ક્ષપણૈરુદાયુધૈર્ભુજદણ્ડૈરુપપન્નમષ્ટભિઃ ॥ ૩૨॥

પત્ન્ય ઊચુઃ
યજ્ઞોઽયં તવ યજનાય કેન સૃષ્ટો
વિધ્વસ્તઃ પશુપતિનાદ્ય દક્ષકોપાત્ ।
તં નસ્ત્વં શવશયનાભશાન્તમેધં
યજ્ઞાત્મન્ નલિનરુચા દૃશા પુનીહિ ॥ ૩૩॥

ઋષય ઊચુઃ
અનન્વિતં તે ભગવન્ વિચેષ્ટિતં
યદાત્મના ચરસિ હિ કર્મ નાજ્યસે ।
વિભૂતયે યત ઉપસેદુરીશ્વરીં
ન મન્યતે સ્વયમનુવર્તતીં ભવાન્ ॥ ૩૪॥

સિદ્ધા ઊચુઃ
અયં ત્વત્કથામૃષ્ટપીયૂષનદ્યાં
મનોવારણઃ ક્લેશદાવાગ્નિદગ્ધઃ ।
તૃષાર્તોઽવગાઢો ન સસ્માર દાવં
ન નિષ્ક્રામતિ બ્રહ્મસમ્પન્નવન્નઃ ॥ ૩૫॥

યજમાન્યુવાચ
સ્વાગતં તે પ્રસીદેશ તુભ્યં નમઃ
શ્રીનિવાસ શ્રિયા કાન્તયા ત્રાહિ નઃ ।
ત્વામૃતેઽધીશ નાઙ્ગૈર્મખઃ શોભતે
શીર્ષહીનઃ કબન્ધો યથા પૂરુષઃ ॥ ૩૬॥

લોકપાલા ઊચુઃ
દૃષ્ટઃ કિં નો દૃગ્ભિરસદ્ગ્રહૈસ્ત્વં
પ્રત્યગ્દ્રષ્ટા દૃશ્યતે યેન દૃશ્યમ્ ।
માયા હ્યેષા ભવદીયા હિ ભૂમન્
યસ્ત્વં ષષ્ઠઃ પઞ્ચભિર્ભાસિ ભૂતૈઃ ॥ ૩૭॥

યોગેશ્વરા ઊચુઃ
પ્રેયાન્ન તેઽન્યોઽસ્ત્યમુતસ્ત્વયિ પ્રભો
વિશ્વાત્મનીક્ષેન્ન પૃથગ્ય આત્મનઃ ।
અથાપિ ભક્ત્યેશ તયોપધાવતા-
મનન્યવૃત્ત્યાનુગૃહાણ વત્સલ ॥ ૩૮॥

જગદુદ્ભવસ્થિતિલયેષુ દૈવતો
બહુભિદ્યમાન ગુણયાઽઽત્મમાયયા ।
રચિતાત્મભેદમતયે સ્વસંસ્થયા
વિનિવર્તિતભ્રમગુણાત્મને નમઃ ॥ ૩૯॥

બ્રહ્મોવાચ
નમસ્તે શ્રિતસત્ત્વાય ધર્માદીનાં ચ સૂતયે ।
નિર્ગુણાય ચ યત્કાષ્ઠાં નાહં વેદાપરેઽપિ ચ ॥ ૪૦॥

અગ્નિરુવાચ
યત્તેજસાહં સુસમિદ્ધતેજા
હવ્યં વહે સ્વધ્વર આજ્યસિક્તમ્ ।

તં યજ્ઞિયં પઞ્ચવિધં ચ પઞ્ચભિઃ
સ્વિષ્ટં યજુર્ભિઃ પ્રણતોઽસ્મિ યજ્ઞમ્ ॥ ૪૧॥

દેવા ઊચુઃ
પુરા કલ્પાપાયે સ્વકૃતમુદરીકૃત્ય વિકૃતં
ત્વમેવાદ્યસ્તસ્મિન્ સલિલ ઉરગેન્દ્રાધિશયને ।
પુમાન્ શેષે સિદ્ધૈર્હૃદિ વિમૃશિતાધ્યાત્મપદવિઃ
સ એવાદ્યાક્ષ્ણોર્યઃ પથિ ચરસિ ભૃત્યાનવસિ નઃ ॥ ૪૨॥

ગન્ધર્વા ઊચુઃ
અંશાંશાસ્તે દેવ મરીચ્યાદય એતે
બ્રહ્મેન્દ્રાદ્યા દેવગણા રુદ્રપુરોગાઃ ।
ક્રીડાભાણ્ડં વિશ્વમિદં યસ્ય વિભૂમન્
તસ્મૈ નિત્યં નાથ નમસ્તે કરવામ ॥ ૪૩॥

વિદ્યાધરા ઊચુઃ
ત્વન્માયયાર્થમભિપદ્ય કલેવરેઽસ્મિન્
કૃત્વા મમાહમિતિ દુર્મતિરુત્પથૈઃ સ્વૈઃ ।
ક્ષિપ્તોઽપ્યસદ્વિષયલાલસ આત્મમોહં
યુષ્મત્કથામૃતનિષેવક ઉદ્વ્યુદસ્યેત્ ॥ ૪૪॥

બ્રાહ્મણા ઊચુઃ
ત્વં ક્રતુસ્ત્વં હવિસ્ત્વં હુતાશઃ સ્વયં
ત્વં હિ મન્ત્રઃ સમિદ્દર્ભ પાત્રાણિ ચ ।
ત્વં સદસ્યર્ત્વિજો દમ્પતી દેવતા
અગ્નિહોત્રં સ્વધા સોમ આજ્યં પશુઃ ॥ ૪૫॥

ત્વં પુરા ગાં રસાયા મહાસૂકરો
દંષ્ટ્રયા પદ્મિનીં વારણેન્દ્રો યથા ।
સ્તૂયમાનો નદઁલ્લીલયા યોગિભિ-
ર્વ્યુજ્જહર્થ ત્રયીગાત્ર યજ્ઞક્રતુઃ ॥ ૪૬॥

સ પ્રસીદ ત્વમસ્માકમાકાઙ્ક્ષતાં
દર્શનં તે પરિભ્રષ્ટસત્કર્મણામ્ ।
કીર્ત્યમાને નૃભિર્નામ્નિ યજ્ઞેશ તે
યજ્ઞવિઘ્નાઃ ક્ષયં યાન્તિ તસ્મૈ નમઃ ॥ ૪૭॥

મૈત્રેય ઉવાચ
ઇતિ દક્ષઃ કવિર્યજ્ઞં ભદ્ર રુદ્રાભિમર્શિતમ્ ।
કીર્ત્યમાને હૃષીકેશે સન્નિન્યે યજ્ઞભાવને ॥ ૪૮॥

ભગવાન્ સ્વેન ભાગેન સર્વાત્મા સર્વભાગભુક્ ।
દક્ષં બભાષ આભાષ્ય પ્રીયમાણ ઇવાનઘ ॥ ૪૯॥

શ્રીભગવાનુવાચ
અહં બ્રહ્મા ચ શર્વશ્ચ જગતઃ કારણં પરમ્ ।
આત્મેશ્વર ઉપદ્રષ્ટા સ્વયન્દૃગવિશેષણઃ ॥ ૫૦॥

આત્મમાયાં સમાવિશ્ય સોઽહં ગુણમયીં દ્વિજ ।
સૃજન્ રક્ષન્ હરન્ વિશ્વં દધ્રે સંજ્ઞાં ક્રિયોચિતામ્ ॥ ૫૧॥

તસ્મિન્ બ્રહ્મણ્યદ્વિતીયે કેવલે પરમાત્મનિ ।
બ્રહ્મરુદ્રૌ ચ ભૂતાનિ ભેદેનાજ્ઞોઽનુપશ્યતિ ॥ ૫૨॥

યથા પુમાન્ ન સ્વાઙ્ગેષુ શિરઃ પાણ્યાદિષુ ક્વચિત્ ।
પારક્યબુદ્ધિં કુરુતે એવં ભૂતેષુ મત્પરઃ ॥ ૫૩॥

ત્રયાણામેકભાવાનાં યો ન પશ્યતિ વૈ ભિદામ્ ।
સર્વભૂતાત્મનાં બ્રહ્મન્ સ શાન્તિમધિગચ્છતિ ॥ ૫૪॥

મૈત્રેય ઉવાચ
એવં ભગવતાઽઽદિષ્ટઃ પ્રજાપતિપતિર્હરિમ્ ।
અર્ચિત્વા ક્રતુના સ્વેન દેવાનુભયતોઽયજત્ ॥ ૫૫॥

રુદ્રં ચ સ્વેન ભાગેન હ્યુપાધાવત્સમાહિતઃ ।
કર્મણોદવસાનેન સોમપાનિતરાનપિ ।
ઉદવસ્ય સહર્ત્વિગ્ભિઃ સસ્નાવવભૃથં તતઃ ॥ ૫૬॥

તસ્મા અપ્યનુભાવેન સ્વેનૈવાવાપ્તરાધસે ।
ધર્મ એવ મતિં દત્ત્વા ત્રિદશાસ્તે દિવં યયુઃ ॥ ૫૭॥

એવં દાક્ષાયણી હિત્વા સતી પૂર્વકલેવરમ્ ।
જજ્ઞે હિમવતઃ ક્ષેત્રે મેનાયામિતિ શુશ્રુમ ॥ ૫૮॥

તમેવ દયિતં ભૂય આવૃઙ્ક્તે પતિમમ્બિકા ।
અનન્યભાવૈકગતિં શક્તિઃ સુપ્તેવ પૂરુષમ્ ॥ ૫૯॥

એતદ્ભગવતઃ શમ્ભોઃ કર્મ દક્ષાધ્વરદ્રુહઃ ।
શ્રુતં ભાગવતાચ્છિષ્યાદુદ્ધવાન્મે બૃહસ્પતેઃ ॥ ૬૦॥

ઇદં પવિત્રં પરમીશચેષ્ટિતં
યશસ્યમાયુષ્યમઘૌઘમર્ષણમ્ ।
યો નિત્યદાઽઽકર્ણ્ય નરોઽનુકીર્તયે-
દ્ધુનોત્યઘં કૌરવ ભક્તિભાવતઃ ॥ ૬૧॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે દક્ષયજ્ઞસન્ધાનં નામ સપ્તમોઽધ્યાયઃ ॥ ૭॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ અષ્ટમોઽધ્યાયઃ - ૮ ॥

મૈત્રેય ઉવાચ
સનકાદ્યા નારદશ્ચ ઋભુર્હંસોઽરુણિર્યતિઃ ।
નૈતે ગૃહાન્ બ્રહ્મસુતા હ્યાવસન્નૂર્ધ્વરેતસઃ ॥ ૧॥

મૃષાધર્મસ્ય ભાર્યાસીદ્દમ્ભં માયાં ચ શત્રુહન્ ।
અસૂત મિથુનં તત્તુ નિરૃતિર્જગૃહેઽપ્રજઃ ॥ ૨॥

તયોઃ સમભવલ્લોભો નિકૃતિશ્ચ મહામતે ।
તાભ્યાં ક્રોધશ્ચ હિંસા ચ યદ્દુરુક્તિઃ સ્વસા કલિઃ ॥ ૩॥

દુરુક્તૌ કલિરાધત્ત ભયં મૃત્યું ચ સત્તમ ।
તયોશ્ચ મિથુનં જજ્ઞે યાતના નિરયસ્તથા ॥ ૪॥

સઙ્ગ્રહેણ મયાઽઽખ્યાતઃ પ્રતિસર્ગસ્તવાનઘ ।
ત્રિઃ શ્રુત્વૈતત્પુમાન્ પુણ્યં વિધુનોત્યાત્મનો મલમ્ ॥ ૫॥

અથાતઃ કીર્તયે વંશં પુણ્યકીર્તેઃ કુરૂદ્વહ ।
સ્વાયમ્ભુવસ્યાપિ મનોર્હરેરંશાંશજન્મનઃ ॥ ૬॥

પ્રિયવ્રતોત્તાનપાદૌ શતરૂપાપતેઃ સુતૌ ।
વાસુદેવસ્ય કલયા રક્ષાયાં જગતઃ સ્થિતૌ ॥ ૭॥

જાયે ઉત્તાનપાદસ્ય સુનીતિઃ સુરુચિસ્તયોઃ ।
સુરુચિઃ પ્રેયસી પત્યુર્નેતરા યત્સુતો ધ્રુવઃ ॥ ૮॥

એકદા સુરુચેઃ પુત્રમઙ્કમારોપ્ય લાલયન્ ।
ઉત્તમં નારુરુક્ષન્તં ધ્રુવં રાજાભ્યનન્દત ॥ ૯॥

તથા ચિકીર્ષમાણં તં સપત્ન્યાસ્તનયં ધ્રુવમ્ ।
સુરુચિઃ શૃણ્વતો રાજ્ઞઃ સેર્ષ્યમાહાતિગર્વિતા ॥ ૧૦॥

ન વત્સ નૃપતેર્ધિષ્ણ્યં ભવાનારોઢુમર્હતિ ।
ન ગૃહીતો મયા યત્ત્વં કુક્ષાવપિ નૃપાત્મજઃ ॥ ૧૧॥

બાલોઽસિ બત નાત્માનમન્યસ્ત્રીગર્ભસમ્ભૃતમ્ ।
નૂનં વેદ ભવાન્ યસ્ય દુર્લભેઽર્થે મનોરથઃ ॥ ૧૨॥

તપસાઽઽરાધ્ય પુરુષં તસ્યૈવાનુગ્રહેણ મે ।
ગર્ભે ત્વં સાધયાત્માનં યદીચ્છસિ નૃપાસનમ્ ॥ ૧૩॥

મૈત્રેય ઉવાચ
માતુઃ સપત્ન્યાઃ સ દુરુક્તિવિદ્ધઃ
શ્વસન્ રુષા દણ્ડહતો યથાહિઃ ।
હિત્વા મિષન્તં પિતરં સન્નવાચં
જગામ માતુઃ પ્રરુદન્ સકાશમ્ ॥ ૧૪॥

તં નિઃશ્વસન્તં સ્ફુરિતાધરોષ્ઠં
સુનીતિરુત્સઙ્ગ ઉદૂહ્ય બાલમ્ ।
નિશમ્ય તત્પૌરમુખાન્નિતાન્તં
સા વિવ્યથે યદ્ગદિતં સપત્ન્યા ॥ ૧૫॥

સોત્સૃજ્ય ધૈર્યં વિલલાપ શોક-
દાવાગ્નિના દાવલતેવ બાલા ।
વાક્યં સપત્ન્યાઃ સ્મરતી સરોજ-
શ્રિયા દૃશા બાષ્પકલામુવાહ ॥ ૧૬॥

દીર્ઘં શ્વસન્તી વૃજિનસ્ય પાર-
મપશ્યતી બાલકમાહ બાલા ।
મામઙ્ગલં તાત પરેષુ મંસ્થા
ભુઙ્ક્તે જનો યત્પરદુઃખદસ્તત્ ॥ ૧૭॥

સત્યં સુરુચ્યાભિહિતં ભવાન્ મે
યદ્દુર્ભગાયા ઉદરે ગૃહીતઃ ।
સ્તન્યેન વૃદ્ધશ્ચ વિલજ્જતે યાં
ભાર્યેતિ વા વોઢુમિડસ્પતિર્મામ્ ॥ ૧૮॥

આતિષ્ઠ તત્તાત વિમત્સરસ્ત્વ-
મુક્તં સમાત્રાપિ યદવ્યલીકમ્ ।
આરાધયાધોક્ષજપાદપદ્મં
યદીચ્છસેઽધ્યાસનમુત્તમો યથા ॥ ૧૯॥

યસ્યાઙ્ઘ્રિપદ્મં પરિચર્ય વિશ્વ-
વિભાવનાયાત્તગુણાભિપત્તેઃ ।
અજોઽધ્યતિષ્ઠત્ખલુ પારમેષ્ઠ્યં
પદં જિતાત્મશ્વસનાભિવન્દ્યમ્ ॥ ૨૦॥

તથા મનુર્વો ભગવાન્ પિતામહો
યમેકમત્યા પુરુદક્ષિણૈર્મખૈઃ ।
ઇષ્ટ્વાભિપેદે દુરવાપમન્યતો
ભૌમં સુખં દિવ્યમથાપવર્ગ્યમ્ ॥ ૨૧॥

તમેવ વત્સાશ્રય ભૃત્યવત્સલં
મુમુક્ષુભિર્મૃગ્યપદાબ્જપદ્ધતિમ્ ।
અનન્યભાવે નિજધર્મભાવિતે
મનસ્યવસ્થાપ્ય ભજસ્વ પૂરુષમ્ ॥ ૨૨॥

નાન્યં તતઃ પદ્મપલાશલોચના-
દ્દુઃખચ્છિદં તે મૃગયામિ કઞ્ચન ।
યો મૃગ્યતે હસ્તગૃહીતપદ્મયા
શ્રિયેતરૈરઙ્ગ વિમૃગ્યમાણયા ॥ ૨૩॥

મૈત્રેય ઉવાચ
એવં સઞ્જલ્પિતં માતુરાકર્ણ્યાર્થાગમં વચઃ ।
સન્નિયમ્યાત્મનાઽઽત્માનં નિશ્ચક્રામ પિતુઃ પુરાત્ ॥ ૨૪॥

નારદસ્તદુપાકર્ણ્ય જ્ઞાત્વા તસ્ય ચિકીર્ષિતમ્ ।
સ્પૃષ્ટ્વા મૂર્ધન્યઘઘ્નેન પાણિના પ્રાહ વિસ્મિતઃ ॥ ૨૫॥

અહો તેજઃ ક્ષત્રિયાણાં માનભઙ્ગમમૃષ્યતામ્ ।
બાલોઽપ્યયં હૃદા ધત્તે યત્સમાતુરસદ્વચઃ ॥ ૨૬॥

નારદ ઉવાચ
નાધુનાપ્યવમાનં તે સમ્માનં વાપિ પુત્રક ।
લક્ષયામઃ કુમારસ્ય સક્તસ્ય ક્રીડનાદિષુ ॥ ૨૭॥

વિકલ્પે વિદ્યમાનેઽપિ ન હ્યસન્તોષહેતવઃ ।
પુંસો મોહમૃતે ભિન્ના યલ્લોકે નિજકર્મભિઃ ॥ ૨૮॥

પરિતુષ્યેત્તતસ્તાત તાવન્માત્રેણ પૂરુષઃ ।
દૈવોપસાદિતં યાવદ્વીક્ષ્યેશ્વરગતિં બુધઃ ॥ ૨૯॥

અથ માત્રોપદિષ્ટેન યોગેનાવરુરુત્સસિ ।
યત્પ્રસાદં સ વૈ પુંસાં દુરારાધ્યો મતો મમ ॥ ૩૦॥

મુનયઃ પદવીં યસ્ય નિઃસઙ્ગેનોરુજન્મભિઃ ।
ન વિદુર્મૃગયન્તોઽપિ તીવ્રયોગસમાધિના ॥ ૩૧॥

અતો નિવર્તતામેષ નિર્બન્ધસ્તવ નિષ્ફલઃ ।
યતિષ્યતિ ભવાન્ કાલે શ્રેયસાં સમુપસ્થિતે ॥ ૩૨॥

યસ્ય યદ્દૈવવિહિતં સ તેન સુખદુઃખયોઃ ।
આત્માનં તોષયન્ દેહી તમસઃ પારમૃચ્છતિ ॥ ૩૩॥

ગુણાધિકાન્મુદં લિપ્સેદનુક્રોશં ગુણાધમાત્ ।
મૈત્રીં સમાનાદન્વિચ્છેન્ન તાપૈરભિભૂયતે ॥ ૩૪॥

ધ્રુવ ઉવાચ
સોઽયં શમો ભગવતા સુખદુઃખહતાત્મનામ્ ।
દર્શિતઃ કૃપયા પુંસાં દુર્દર્શોઽસ્મદ્વિધૈસ્તુ યઃ ॥ ૩૫॥

અથાપિ મેઽવિનીતસ્ય ક્ષાત્રં ઘોરમુપેયુષઃ ।
સુરુચ્યા દુર્વચો બાણૈર્ન ભિન્ને શ્રયતે હૃદિ ॥ ૩૬॥

પદં ત્રિભુવનોત્કૃષ્ટં જિગીષોઃ સાધુ વર્ત્મ મે ।
બ્રૂહ્યસ્મત્પિતૃભિર્બ્રહ્મન્નન્યૈરપ્યનધિષ્ઠિતમ્ ॥ ૩૭॥

નૂનં ભવાન્ ભગવતો યોઽઙ્ગજઃ પરમેષ્ઠિનઃ ।
વિતુદન્નટતે વીણાં હિતાર્થં જગતોઽર્કવત્ ॥ ૩૮॥

મૈત્રેય ઉવાચ
ઇત્યુદાહૃતમાકર્ણ્ય ભગવાન્નારદસ્તદા ।
પ્રીતઃ પ્રત્યાહ તં બાલં સદ્વાક્યમનુકમ્પયા ॥ ૩૯॥

નારદ ઉવાચ
જનન્યાભિહિતઃ પન્થાઃ સ વૈ નિઃશ્રેયસસ્ય તે ।
ભગવાન્ વાસુદેવસ્તં ભજ તત્પ્રવણાત્મના ॥ ૪૦॥

ધર્માર્થકામમોક્ષાખ્યં ય ઇચ્છેચ્છ્રેય આત્મનઃ ।
એકમેવ હરેસ્તત્ર કારણં પાદસેવનમ્ ॥ ૪૧॥

તત્તાત ગચ્છ ભદ્રં તે યમુનાયાસ્તટં શુચિ ।
પુણ્યં મધુવનં યત્ર સાન્નિધ્યં નિત્યદા હરેઃ ॥ ૪૨॥

સ્નાત્વાનુસવનં તસ્મિન્ કાલિન્દ્યાઃ સલિલે શિવે ।
કૃત્વોચિતાનિ નિવસન્નાત્મનઃ કલ્પિતાસનઃ ॥ ૪૩॥

પ્રાણાયામેન ત્રિવૃતા પ્રાણેન્દ્રિયમનોમલમ્ ।
શનૈર્વ્યુદસ્યાભિધ્યાયેન્મનસા ગુરુણા ગુરુમ્ ॥ ૪૪॥

પ્રસાદાભિમુખં શશ્વત્પ્રસન્નવદનેક્ષણમ્ ।
સુનાસં સુભ્રુવં ચારુકપોલં સુરસુન્દરમ્ ॥ ૪૫॥

તરુણં રમણીયાઙ્ગમરુણોષ્ઠેક્ષણાધરમ્ ।
પ્રણતાશ્રયણં નૃમ્ણં શરણ્યં કરુણાર્ણવમ્ ॥ ૪૬॥

શ્રીવત્સાઙ્કં ઘનશ્યામં પુરુષં વનમાલિનમ્ ।
શઙ્ખચક્રગદાપદ્મૈરભિવ્યક્તચતુર્ભુજમ્ ॥ ૪૭॥

કિરીટિનં કુણ્ડલિનં કેયૂરવલયાન્વિતમ્ ।
કૌસ્તુભાભરણગ્રીવં પીતકૌશેયવાસસમ્ ॥ ૪૮॥

કાઞ્ચીકલાપપર્યસ્તં લસત્કાઞ્ચનનૂપુરમ્ ।
દર્શનીયતમં શાન્તં મનોનયનવર્ધનમ્ ॥ ૪૯॥

પદ્ભ્યાં નખમણિશ્રેણ્યા વિલસદ્ભ્યાં સમર્ચતામ્ ।
હૃત્પદ્મકર્ણિકાધિષ્ણ્યમાક્રમ્યાત્મન્યવસ્થિતમ્ ॥ ૫૦॥

સ્મયમાનમભિધ્યાયેત્સાનુરાગાવલોકનમ્ ।
નિયતેનૈકભૂતેન મનસા વરદર્ષભમ્ ॥ ૫૧॥

એવં ભગવતો રૂપં સુભદ્રં ધ્યાયતો મનઃ ।
નિર્વૃત્યા પરયા તૂર્ણં સમ્પન્નં ન નિવર્તતે ॥ ૫૨॥

જપ્યશ્ચ પરમો ગુહ્યઃ શ્રૂયતાં મે નૃપાત્મજ ।
યં સપ્તરાત્રં પ્રપઠન્ પુમાન્ પશ્યતિ ખેચરાન્ ॥ ૫૩॥

ઓં નમો ભગવતે વાસુદેવાય ।
મન્ત્રેણાનેન દેવસ્ય કુર્યાદ્દ્રવ્યમયીં બુધઃ ।
સપર્યાં વિવિધૈર્દ્રવ્યૈર્દેશકાલવિભાગવિત્ ॥ ૫૪॥

સલિલૈઃ શુચિભિર્માલ્યૈર્વન્યૈર્મૂલફલાદિભિઃ ।
શસ્તાઙ્કુરાંશુકૈશ્ચાર્ચેત્તુલસ્યા પ્રિયયા પ્રભુમ્ ॥ ૫૫॥

લબ્ધ્વા દ્રવ્યમયીમર્ચાં ક્ષિત્યમ્બ્વાદિષુ વાર્ચયેત્ ।
આભૃતાત્મા મુનિઃ શાન્તો યતવાઙ્મિતવન્યભુક્ ॥ ૫૬॥

સ્વેચ્છાવતારચરિતૈરચિન્ત્યનિજમાયયા ।
કરિષ્યત્યુત્તમશ્લોકસ્તદ્ધ્યાયેદ્ધૃદયઙ્ગમમ્ ॥ ૫૭॥

પરિચર્યા ભગવતો યાવત્યઃ પૂર્વસેવિતાઃ ।
તા મન્ત્રહૃદયેનૈવ પ્રયુઞ્જ્યાન્મન્ત્રમૂર્તયે ॥ ૫૮॥

એવં કાયેન મનસા વચસા ચ મનોગતમ્ ।
પરિચર્યમાણો ભગવાન્ ભક્તિમત્પરિચર્યયા ॥ ૫૯॥

પુંસામમાયિનાં સમ્યગ્ભજતાં ભાવવર્ધનઃ ।
શ્રેયો દિશત્યભિમતં યદ્ધર્માદિષુ દેહિનામ્ ॥ ૬૦॥

વિરક્તશ્ચેન્દ્રિયરતૌ ભક્તિયોગેન ભૂયસા ।
તં નિરન્તરભાવેન ભજેતાદ્ધા વિમુક્તયે ॥ ૬૧॥

ઇત્યુક્તસ્તં પરિક્રમ્ય પ્રણમ્ય ચ નૃપાર્ભકઃ ।
યયૌ મધુવનં પુણ્યં હરેશ્ચરણચર્ચિતમ્ ॥ ૬૨॥

તપોવનં ગતે તસ્મિન્ પ્રવિષ્ટોઽન્તઃપુરં મુનિઃ ।
અર્હિતાર્હણકો રાજ્ઞા સુખાસીન ઉવાચ તમ્ ॥ ૬૩॥

નારદ ઉવાચ
રાજન્ કિં ધ્યાયસે દીર્ઘં મુખેન પરિશુષ્યતા ।
કિં વા ન રિષ્યતે કામો ધર્મો વાર્થેન સંયુતઃ ॥ ૬૪॥

રાજોવાચ
સુતો મે બાલકો બ્રહ્મન્ સ્ત્રૈણેનાકરુણાત્મના ।
નિર્વાસિતઃ પઞ્ચવર્ષઃ સહ માત્રા મહાન્ કવિઃ ॥ ૬૫॥

અપ્યનાથં વને બ્રહ્મન્ મા સ્માદન્ત્યર્ભકં વૃકાઃ ।
શ્રાન્તં શયાનં ક્ષુધિતં પરિમ્લાનમુખામ્બુજમ્ ॥ ૬૬॥

અહો મે બત દૌરાત્મ્યં સ્ત્રીજિતસ્યોપધારય ।
યોઽઙ્કં પ્રેમ્ણાઽઽરુરુક્ષન્તં નાભ્યનન્દમસત્તમઃ ॥ ૬૭॥

નારદ ઉવાચ
મા મા શુચઃ સ્વતનયં દેવગુપ્તં વિશામ્પતે ।
તત્પ્રભાવમવિજ્ઞાય પ્રાવૃઙ્ક્તે યદ્યશો જગત્ ॥ ૬૮॥

સુદુષ્કરં કર્મ કૃત્વા લોકપાલૈરપિ પ્રભુઃ ।
એષ્યત્યચિરતો રાજન્ યશો વિપુલયંસ્તવ ॥ ૬૯॥

મૈત્રેય ઉવાચ
ઇતિ દેવર્ષિણા પ્રોક્તં વિશ્રુત્ય જગતીપતિઃ ।
રાજલક્ષ્મીમનાદૃત્ય પુત્રમેવાન્વચિન્તયત્ ॥ ૭૦॥

તત્રાભિષિક્તઃ પ્રયતસ્તામુપોષ્ય વિભાવરીમ્ ।
સમાહિતઃ પર્યચરદૃષ્યાદેશેન પૂરુષમ્ ॥ ૭૧॥

ત્રિરાત્રાન્તે ત્રિરાત્રાન્તે કપિત્થબદરાશનઃ ।
આત્મવૃત્ત્યનુસારેણ માસં નિન્યેઽર્ચયન્ હરિમ્ ॥ ૭૨॥

દ્વિતીયં ચ તથા માસં ષષ્ઠે ષષ્ઠેઽર્ભકો દિને ।
તૃણપર્ણાદિભિઃ શીર્ણૈઃ કૃતાન્નોઽભ્યર્ચયદ્વિભુમ્ ॥ ૭૩॥

તૃતીયં ચાનયન્માસં નવમે નવમેઽહનિ ।
અબ્ભક્ષ ઉત્તમશ્લોકમુપાધાવત્સમાધિના ॥ ૭૪॥

ચતુર્થમપિ વૈ માસં દ્વાદશે દ્વાદશેઽહનિ ।
વાયુભક્ષો જિતશ્વાસો ધ્યાયન્ દેવમધારયત્ ॥ ૭૫॥

પઞ્ચમે માસ્યનુપ્રાપ્તે જિતશ્વાસો નૃપાત્મજઃ ।
ધ્યાયન્ બ્રહ્મ પદૈકેન તસ્થૌ સ્થાણુરિવાચલઃ ॥ ૭૬॥

સર્વતો મન આકૃષ્ય હૃદિ ભૂતેન્દ્રિયાશયમ્ ।

ધ્યાયન્ ભગવતો રૂપં નાદ્રાક્ષીત્કિઞ્ચનાપરમ્ ॥ ૭૭॥

આધારં મહદાદીનાં પ્રધાનપુરુષેશ્વરમ્ ।
બ્રહ્મ ધારયમાણસ્ય ત્રયો લોકાશ્ચકમ્પિરે ॥ ૭૮॥

યદૈકપાદેન સ પાર્થિવાર્ભક-
સ્તસ્થૌ તદઙ્ગુષ્ઠનિપીડિતા મહી ।
નનામ તત્રાર્ધમિભેન્દ્રધિષ્ઠિતા
તરીવ સવ્યેતરતઃ પદે પદે ॥ ૭૯॥

તસ્મિન્નભિધ્યાયતિ વિશ્વમાત્મનો
દ્વારં નિરુધ્યાસુમનન્યયા ધિયા ।
લોકા નિરુચ્છ્વાસનિપીડિતા ભૃશં
સલોકપાલાઃ શરણં યયુર્હરિમ્ ॥ ૮૦॥

દેવા ઊચુઃ
નૈવં વિદામો ભગવન્ પ્રાણરોધં
ચરાચરસ્યાખિલસત્ત્વધામ્નઃ ।
વિધેહિ તન્નો વૃજિનાદ્વિમોક્ષં
પ્રાપ્તા વયં ત્વાં શરણં શરણ્યમ્ ॥ ૮૧॥

શ્રીભગવાનુવાચ
મા ભૈષ્ટ બાલં તપસો દુરત્યયા-
ન્નિવર્તયિષ્યે પ્રતિયાત સ્વધામ ।
યતો હિ વઃ પ્રાણનિરોધ આસી-
દૌત્તાનપાદિર્મયિ સઙ્ગતાત્મા ॥ ૮૨॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ચતુર્થસ્કન્ધે ધ્રુવચરિતે અષ્ટમોઽધ્યાયઃ ॥ ૮॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ નવમોઽધ્યાયઃ - ૯ ॥

મૈત્રેય ઉવાચ
ત એવમુત્સન્નભયા ઉરુક્રમે
કૃતાવનામાઃ પ્રયયુસ્ત્રિવિષ્ટપમ્ ।
સહસ્રશીર્ષાપિ તતો ગરુત્મતા
મધોર્વનં ભૃત્યદિદૃક્ષયા ગતઃ ॥ ૧॥

સ વૈ ધિયા યોગવિપાકતીવ્રયા
હૃત્પદ્મકોશે સ્ફુરિતં તડિત્પ્રભમ્ ।
તિરોહિતં સહસૈવોપલક્ષ્ય
બહિઃસ્થિતં તદવસ્થં દદર્શ ॥ ૨॥

તદ્દર્શનેનાગતસાધ્વસઃ ક્ષિતા-
વવન્દતાઙ્ગં વિનમય્ય દણ્ડવત્ ।
દૃગ્ભ્યાં પ્રપશ્યન્ પ્રપિબન્નિવાર્ભકઃ
ચુમ્બન્નિવાસ્યેન ભુજૈરિવાશ્લિષન્ ॥ ૩॥

સ તં વિવક્ષન્તમતદ્વિદં હરિઃ
જ્ઞાત્વાસ્ય સર્વસ્ય ચ હૃદ્યવસ્થિતઃ ।
કૃતાઞ્જલિં બ્રહ્મમયેન કમ્બુના
પસ્પર્શ બાલં કૃપયા કપોલે ॥ ૪॥

સ વૈ તદૈવ પ્રતિપાદિતાં ગિરં
દૈવીં પરિજ્ઞાતપરાત્મનિર્ણયઃ ।
તં ભક્તિભાવોઽભ્યગૃણાદસત્વરં
પરિશ્રુતોરુશ્રવસં ધ્રુવક્ષિતિઃ ॥ ૫॥

ધ્રુવ ઉવાચ
યોઽન્તઃપ્રવિશ્ય મમ વાચમિમાં પ્રસુપ્તાં
સઞ્જીવયત્યખિલશક્તિધરઃ સ્વધામ્ના ।
અન્યાંશ્ચ હસ્તચરણશ્રવણત્વગાદીન્
પ્રાણાન્ નમો ભગવતે પુરુષાય તુભ્યમ્ ॥ ૬॥

એકસ્ત્વમેવ ભગવન્નિદમાત્મશક્ત્યા
માયાખ્યયોરુગુણયા મહદાદ્યશેષમ્ ।
સૃષ્ટ્વાનુવિશ્ય પુરુષસ્તદસદ્ગુણેષુ

નાનેવ દારુષુ વિભાવસુવદ્વિભાસિ ॥ ૭॥

ત્વદ્દત્તયા વયુનયેદમચષ્ટ વિશ્વં
સુપ્તપ્રબુદ્ધ ઇવ નાથ ભવત્પ્રપન્નઃ ।
તસ્યાપવર્ગ્યશરણં તવ પાદમૂલં
વિસ્મર્યતે કૃતવિદા કથમાર્તબન્ધો ॥ ૮॥

નૂનં વિમુષ્ટમતયસ્તવ માયયા તે
યે ત્વાં ભવાપ્યયવિમોક્ષણમન્યહેતોઃ ।
અર્ચન્તિ કલ્પકતરું કુણપોપભોગ્ય-
મિચ્છન્તિ યત્સ્પર્શજં નિરયેઽપિ નૃણામ્ ॥ ૯॥

યા નિર્વૃતિસ્તનુભૃતાં તવ પાદપદ્મ-
ધ્યાનાદ્ભવજ્જનકથાશ્રવણેન વા સ્યાત્ ।
સા બ્રહ્મણિ સ્વમહિમન્યપિ નાથ મા ભૂત્
કિં ત્વન્તકાસિલુલિતાત્પતતાં વિમાનાત્ ॥ ૧૦॥

ભક્તિં મુહુઃ પ્રવહતાં ત્વયિ મે પ્રસઙ્ગો
ભૂયાદનન્ત મહતામમલાશયાનામ્ ।
યેનાઞ્જસોલ્બણમુરુવ્યસનં ભવાબ્ધિં
નેષ્યે ભવદ્ગુણકથામૃતપાનમત્તઃ ॥ ૧૧॥

તે ન સ્મરન્ત્યતિતરાં પ્રિયમીશ મર્ત્યં
યે ચાન્વદઃ સુતસુહૃદ્ગૃહવિત્તદારાઃ ।
યે ત્વબ્જનાભ ભવદીયપદારવિન્દ-
સૌગન્ધ્યલુબ્ધહૃદયેષુ કૃતપ્રસઙ્ગાઃ ॥ ૧૨॥

તિર્યઙ્નગદ્વિજસરીસૃપદેવદૈત્ય-
મર્ત્યાદિભિઃ પરિચિતં સદસદ્વિશેષમ્ ।
રૂપં સ્થવિષ્ઠમજ તે મહદાદ્યનેકં
નાતઃ પરં પરમ વેદ્મિ ન યત્ર વાદઃ ॥ ૧૩॥

કલ્પાન્ત એતદખિલં જઠરેણ ગૃહ્ણન્
શેતે પુમાન્ સ્વદૃગનન્તસખસ્તદઙ્કે ।
યન્નાભિસિન્ધુરુહકાઞ્ચનલોકપદ્મ-
ગર્ભે દ્યુમાન્ ભગવતે પ્રણતોઽસ્મિ તસ્મૈ ॥ ૧૪॥

ત્વં નિત્યમુક્તપરિશુદ્ધવિબુદ્ધ આત્મા
કૂટસ્થ આદિપુરુષો ભગવાંસ્ત્ર્યધીશઃ ।
યદ્બુદ્ધ્યવસ્થિતિમખણ્ડિતયા સ્વદૃષ્ટ્યા
દ્રષ્ટા સ્થિતાવધિમખો વ્યતિરિક્ત આસ્સે ॥ ૧૫॥

યસ્મિન્ વિરુદ્ધગતયો હ્યનિશં પતન્તિ
વિદ્યાદયો વિવિધશક્તય આનુપૂર્વ્યાત્ ।
તદ્બ્રહ્મવિશ્વભવમેકમનન્તમાદ્ય-
માનન્દમાત્રમવિકારમહં પ્રપદ્યે ॥ ૧૬॥

સત્યાશિષો હિ ભગવંસ્તવ પાદપદ્મ-
માશીસ્તથાનુભજતઃ પુરુષાર્થમૂર્તેઃ ।
અપ્યેવમાર્ય ભગવાન્ પરિપાતિ દીનાન્
વાશ્રેવ વત્સકમનુગ્રહકાતરોઽસ્માન્ ॥ ૧૭॥

મૈત્રેય ઉવાચ
અથાભિષ્ટુત એવં વૈ સત્સઙ્કલ્પેન ધીમતા ।
ભૃત્યાનુરક્તો ભગવાન્ પ્રતિનન્દ્યેદમબ્રવીત્ ॥ ૧૮॥

શ્રીભગવાનુવાચ
વેદાહં તે વ્યવસિતં હૃદિ રાજન્યબાલક ।
તત્પ્રયચ્છામિ ભદ્રં તે દુરાપમપિ સુવ્રત ॥ ૧૯॥

નાન્યૈરધિષ્ઠિતં ભદ્ર યદ્ભ્રાજિષ્ણુ ધ્રુવક્ષિતિ ।
યત્ર ગ્રહર્ક્ષતારાણાં જ્યોતિષાં ચક્રમાહિતમ્ ॥ ૨૦॥

મેઢ્યાં ગોચક્રવત્સ્થાસ્નુ પરસ્તાત્કલ્પવાસિનામ્ ।
ધર્મોઽગ્નિઃ કશ્યપઃ શુક્રો મુનયો યે વનૌકસઃ ।
ચરન્તિ દક્ષિણીકૃત્ય ભ્રમન્તો યત્સતારકાઃ ॥ ૨૧॥

પ્રસ્થિતે તુ વનં પિત્રા દત્ત્વા ગાં ધર્મસંશ્રયઃ ।
ષટ્ત્રિંશદ્વર્ષસાહસ્રં રક્ષિતાવ્યાહતેન્દ્રિયઃ ॥ ૨૨॥

ત્વદ્ભ્રાતર્યુત્તમે નષ્ટે મૃગયાયાં તુ તન્મનાઃ ।
અન્વેષન્તી વનં માતા દાવાગ્નિં સા પ્રવેક્ષ્યતિ ॥ ૨૩॥

ઇષ્ટ્વા માં યજ્ઞહૃદયં યજ્ઞૈઃ પુષ્કલદક્ષિણૈઃ ।
ભુક્ત્વા ચેહાશિષઃ સત્યા અન્તે માં સંસ્મરિષ્યસિ ॥ ૨૪॥

તતો ગન્તાસિ મત્સ્થાનં સર્વલોકનમસ્કૃતમ્ ।
ઉપરિષ્ટાદૃષિભ્યસ્ત્વં યતો નાવર્તતે ગતઃ ॥ ૨૫॥

મૈત્રેય ઉવાચ
ઇત્યર્ચિતઃ સ ભગવાનતિદિશ્યાત્મનઃ પદમ્ ।
બાલસ્ય પશ્યતો ધામ સ્વમગાદ્ગરુડધ્વજઃ ॥ ૨૬॥

સોઽપિ સઙ્કલ્પજં વિષ્ણોઃ પાદસેવોપસાદિતમ્ ।
પ્રાપ્ય સઙ્કલ્પનિર્વાણં નાતિપ્રીતોભ્યગાત્પુરમ્ ॥ ૨૭॥

વિદુર ઉવાચ
સુદુર્લભં યત્પરમં પદં હરે-
ર્માયાવિનસ્તચ્ચરણાર્ચનાર્જિતમ્ ।
લબ્ધ્વાપ્યસિદ્ધાર્થમિવૈકજન્મના
કથં સ્વમાત્માનમમન્યતાર્થવિત્ ॥ ૨૮॥

મૈત્રેય ઉવાચ
માતુઃ સપત્ન્યા વાગ્બાણૈર્હૃદિ વિદ્ધસ્તુ તાન્ સ્મરન્ ।
નૈચ્છન્મુક્તિપતેર્મુક્તિં તસ્માત્તાપમુપેયિવાન્ ॥ ૨૯॥

ધ્રુવ ઉવાચ
સમાધિના નૈકભવેન યત્પદં
વિદુઃ સનન્દાદય ઊર્ધ્વરેતસઃ ।
માસૈરહં ષડ્ભિરમુષ્યપાદયોઃ
છાયામુપેત્યાપગતઃ પૃથઙ્મતિઃ ॥ ૩૦॥

અહો બત મમાનાત્મ્યં મન્દભાગ્યસ્ય પશ્યત ।
ભવચ્છિદઃ પાદમૂલં ગત્વા યાચે યદન્તવત્ ॥ ૩૧॥

મતિર્વિદૂષિતા દેવૈઃ પતદ્ભિરસહિષ્ણુભિઃ ।
યો નારદવચસ્તથ્યં નાગ્રાહિષમસત્તમઃ ॥ ૩૨॥

દૈવીં માયામુપાશ્રિત્ય પ્રસુપ્ત ઇવ ભિન્નદૃક્ ।
તપ્યે દ્વિતીયેઽપ્યસતિ ભ્રાતૃભ્રાતૃવ્યહૃદ્રુજા ॥ ૩૩॥

મયૈતત્પ્રાર્થિતં વ્યર્થં ચિકિત્સેવ ગતાયુષિ ।
પ્રસાદ્ય જગદાત્માનં તપસા દુષ્પ્રસાદનમ્ ।
ભવચ્છિદમયાચેઽહં ભવં ભાગ્યવિવર્જિતઃ ॥ ૩૪॥

સ્વારાજ્યં યચ્છતો મૌઢ્યાન્માનો મે ભિક્ષિતો બત ।
ઈશ્વરાત્ક્ષીણપુણ્યેન ફલીકારાનિવાધનઃ ॥ ૩૫॥

મૈત્રેય ઉવાચ
ન વૈ મુકુન્દસ્ય પદારવિન્દયોઃ
રજોજુષસ્તાત ભવાદૃશા જનાઃ ।
વાઞ્છન્તિ તદ્દાસ્યમૃતેઽર્થમાત્મનો
યદૃચ્છયા લબ્ધમનઃ સમૃદ્ધયઃ ॥ ૩૬॥

આકર્ણ્યાત્મજમાયાન્તં સમ્પરેત્ય યથાગતમ્ ।
રાજા ન શ્રદ્દધે ભદ્રમભદ્રસ્ય કુતો મમ ॥ ૩૭॥

શ્રદ્ધાય વાક્યં દેવર્ષેર્હર્ષવેગેન ધર્ષિતઃ ।
વાર્તાહર્તુરતિપ્રીતો હારં પ્રાદાન્મહાધનમ્ ॥ ૩૮॥

સદશ્વં રથમારુહ્ય કાર્તસ્વરપરિષ્કૃતમ્ ।
બ્રાહ્મણૈઃ કુલવૃદ્ધૈશ્ચ પર્યસ્તોઽમાત્યબન્ધુભિઃ ॥ ૩૯॥

શઙ્ખદુન્દુભિનાદેન બ્રહ્મઘોષેણ વેણુભિઃ ।
નિશ્ચક્રામ પુરાત્તૂર્ણમાત્મજાભીક્ષણોત્સુકઃ ॥ ૪૦॥

સુનીતિઃ સુરુચિશ્ચાસ્ય મહિષ્યૌ રુક્મભૂષિતે ।
આરુહ્ય શિબિકાં સાર્ધમુત્તમેનાભિજગ્મતુઃ ॥ ૪૧॥

તં દૃષ્ટ્વોપવનાભ્યાશ આયાન્તં તરસા રથાત્ ।
અવરુહ્ય નૃપસ્તૂર્ણમાસાદ્ય પ્રેમવિહ્વલઃ ॥ ૪૨॥

પરિરેભેઽઙ્ગજં દોર્ભ્યાં દીર્ઘોત્કણ્ઠમનાઃ શ્વસન્ ।
વિષ્વક્સેનાઙ્ઘ્રિસંસ્પર્શહતાશેષાઘબન્ધનમ્ ॥ ૪૩॥

અથાજિઘ્રન્મુહુર્મૂર્ધ્નિ શીતૈર્નયનવારિભિઃ ।
સ્નાપયામાસ તનયં જાતોદ્દામમનોરથઃ ॥ ૪૪॥

અભિવન્દ્ય પિતુઃ પાદાવાશીર્ભિશ્ચાભિમન્ત્રિતઃ ।
નનામ માતરૌ શીર્ષ્ણા સત્કૃતઃ સજ્જનાગ્રણીઃ ॥ ૪૫॥

સુરુચિસ્તં સમુત્થાપ્ય પાદાવનતમર્ભકમ્ ।
પરિષ્વજ્યાહ જીવેતિ બાષ્પગદ્ગદયા ગિરા ॥ ૪૬॥

યસ્ય પ્રસન્નો ભગવાન્ ગુણૈર્મૈત્ર્યાદિભિર્હરિઃ ।

તસ્મૈ નમન્તિ ભૂતાનિ નિમ્નમાપ ઇવ સ્વયમ્ ॥ ૪૭॥

ઉત્તમશ્ચ ધ્રુવશ્ચોભાવન્યોન્યં પ્રેમવિહ્વલૌ ।
અઙ્ગસઙ્ગાદુત્પુલકાવસ્રૌઘં મુહુરૂહતુઃ ॥ ૪૮॥

સુનીતિરસ્ય જનની પ્રાણેભ્યોઽપિ પ્રિયં સુતમ્ ।
ઉપગુહ્ય જહાવાધિં તદઙ્ગસ્પર્શનિર્વૃતા ॥ ૪૯॥

પયઃ સ્તનાભ્યાં સુસ્રાવ નેત્રજૈઃ સલિલૈઃ શિવૈઃ ।
તદાભિષિચ્યમાનાભ્યાં વીર વીરસુવો મુહુઃ ॥ ૫૦॥

તાં શશંસુર્જના રાજ્ઞીં દિષ્ટ્યા તે પુત્ર આર્તિહા ।
પ્રતિલબ્ધશ્ચિરં નષ્ટો રક્ષિતા મણ્ડલં ભુવઃ ॥ ૫૧॥

અભ્યર્ચિતસ્ત્વયા નૂનં ભગવાન્ પ્રણતાર્તિહા ।
યદનુધ્યાયિનો ધીરા મૃત્યું જિગ્યુઃ સુદુર્જયમ્ ॥ ૫૨॥

લાલ્યમાનં જનૈરેવં ધ્રુવં સભ્રાતરં નૃપઃ ।
આરોપ્ય કરિણીં હૃષ્ટઃ સ્તૂયમાનોઽવિશત્પુરમ્ ॥ ૫૩॥

તત્ર તત્રોપસઙ્ક્લૃપ્તૈર્લસન્મકરતોરણૈઃ ।
સવૃન્દૈઃ કદલીસ્તમ્ભૈઃ પૂગપોતૈશ્ચ તદ્વિધૈઃ ॥ ૫૪॥

ચૂતપલ્લવવાસઃસ્રઙ્ મુક્તાદામવિલમ્બિભિઃ ।
ઉપસ્કૃતં પ્રતિદ્વારમપાં કુમ્ભૈઃ સદીપકૈઃ ॥ ૫૫॥

પ્રાકારૈર્ગોપુરાગારૈઃ શાતકુમ્ભપરિચ્છદૈઃ ।
સર્વતોઽલઙ્કૃતં શ્રીમદ્વિમાનશિખરદ્યુભિઃ ॥ ૫૬॥

મૃષ્ટચત્વરરથ્યાટ્ટમાર્ગં ચન્દનચર્ચિતમ્ ।
લાજાક્ષતૈઃ પુષ્પફલૈસ્તણ્ડુલૈર્બલિભિર્યુતમ્ ॥ ૫૭॥

ધ્રુવાય પથિ દૃષ્ટાય તત્ર તત્ર પુરસ્ત્રિયઃ
સિદ્ધાર્થાક્ષતદધ્યમ્બુદૂર્વાપુષ્પફલાનિ ચ ॥ ૫૮॥

ઉપજહ્રુઃ પ્રયુઞ્જાના વાત્સલ્યાદાશિષઃ સતીઃ ।
શ઼ૃણ્વંસ્તદ્વલ્ગુગીતાનિ પ્રાવિશદ્ભવનં પિતુઃ ॥ ૫૯॥

મહામણિવ્રાતમયે સ તસ્મિન્ ભવનોત્તમે ।
લાલિતો નિતરાં પિત્રા ન્યવસદ્દિવિ દેવવત્ ॥ ૬૦॥

પયઃફેનનિભાઃ શય્યા દાન્તા રુક્મપરિચ્છદાઃ ।
આસનાનિ મહાર્હાણિ યત્ર રૌક્મા ઉપસ્કરાઃ ॥ ૬૧॥

યત્ર સ્ફટિકકુડ્યેષુ મહામારકતેષુ ચ ।
મણિપ્રદીપા આભાન્તિ લલનારત્નસંયુતાઃ ॥ ૬૨॥

ઉદ્યાનાનિ ચ રમ્યાણિ વિચિત્રૈરમરદ્રુમૈઃ ।
કૂજદ્વિહઙ્ગમિથુનૈર્ગાયન્ મત્તમધુવ્રતૈઃ ॥ ૬૩॥

વાપ્યો વૈદૂર્યસોપાનાઃ પદ્મોત્પલકુમુદ્વતીઃ ।
હંસકારણ્ડવકુલૈર્જુષ્ટાશ્ચક્રાહ્વસારસૈઃ ॥ ૬૪॥

ઉત્તાનપાદો રાજર્ષિઃ પ્રભાવં તનયસ્ય તમ્ ।
શ્રુત્વા દૃષ્ટ્વાદ્ભુતતમં પ્રપેદે વિસ્મયં પરમ્ ॥ ૬૫॥

વીક્ષ્યોઢવયસં તં ચ પ્રકૃતીનાં ચ સમ્મતમ્ ।
અનુરક્તપ્રજં રાજા ધ્રુવં ચક્રે ભુવઃ પતિમ્ ॥ ૬૬॥

આત્માનં ચ પ્રવયસમાકલય્ય વિશામ્પતિઃ ।
વનં વિરક્તઃ પ્રાતિષ્ઠદ્વિમૃશન્નાત્મનો ગતિમ્ ॥ ૬૭॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે ધ્રુવરાજ્યાભિષેકવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૯॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ દશમોઽધ્યાયઃ - ૧૦ ॥

મૈત્રેય ઉવાચ
પ્રજાપતેર્દુહિતરં શિશુમારસ્ય વૈ ધ્રુવઃ ।
ઉપયેમે ભ્રમિં નામ તત્સુતૌ કલ્પવત્સરૌ ॥ ૧॥

ઇલાયામપિ ભાર્યાયાં વાયોઃ પુત્ર્યાં મહાબલઃ ।
પુત્રમુત્કલનામાનં યોષિદ્રત્નમજીજનત્ ॥ ૨॥

ઉત્તમસ્ત્વકૃતોદ્વાહો મૃગયાયાં બલીયસા ।
હતઃ પુણ્યજનેનાદ્રૌ તન્માતાસ્ય ગતિં ગતા ॥ ૩॥

ધ્રુવો ભ્રાતૃવધં શ્રુત્વા કોપામર્ષઃ શુચાર્પિતઃ ।
જૈત્રં સ્યન્દનમાસ્થાય ગતઃ પુણ્યજનાલયમ્ ॥ ૪॥

ગત્વોદીચીં દિશં રાજા રુદ્રાનુચરસેવિતામ્ ।
દદર્શ હિમવદ્દ્રોણ્યાં પુરીં ગુહ્યકસઙ્કુલામ્ ॥ ૫॥

દધ્મૌ શઙ્ખં બૃહદ્બાહુઃ ખં દિશશ્ચાનુનાદયન્ ।
યેનોદ્વિગ્નદૃશઃ ક્ષત્તરુપદેવ્યોઽત્રસન્ ભૃશમ્ ॥ ૬॥

તતો નિષ્ક્રમ્ય બલિન ઉપદેવમહાભટાઃ ।
અસહન્તસ્તન્નિનાદમભિપેતુરુદાયુધાઃ ॥ ૭॥

સ તાનાપતતો વીર ઉગ્રધન્વા મહારથઃ ।
એકૈકં યુગપત્સર્વાનહન્ બાણૈસ્ત્રિભિસ્ત્રિભિઃ ॥ ૮॥

તે વૈ લલાટલગ્નૈસ્તૈરિષુભિઃ સર્વ એવ હિ ।
મત્વા નિરસ્તમાત્માનમાશંસન્ કર્મ તસ્ય તત્ ॥ ૯॥

તેઽપિ ચામુમમૃષ્યન્તઃ પાદસ્પર્શમિવોરગાઃ ।
શરૈરવિધ્યન્ યુગપદ્દ્વિગુણં પ્રચિકીર્ષવઃ ॥ ૧૦॥

તતઃ પરિઘનિસ્ત્રિંશૈઃ પ્રાસશૂલપરશ્વધૈઃ ।
શક્ત્યૃષ્ટિભિર્ભુશુણ્ડીભિશ્ચિત્રવાજૈઃ શરૈરપિ ॥ ૧૧॥

અભ્યવર્ષન્ પ્રકુપિતાઃ સરથં સહ સારથિમ્ ।
ઇચ્છન્તસ્તત્પ્રતીકર્તુમયુતાનિ ત્રયોદશ ॥ ૧૨॥

ઔત્તાનપાદિઃ સ તદા શસ્ત્રવર્ષેણ ભૂરિણા ।
ન ઉપાદૃશ્યતચ્છન્ન આસારેણ યથા ગિરિઃ ॥ ૧૩॥

હાહાકારસ્તદૈવાસીત્સિદ્ધાનાં દિવિ પશ્યતામ્ ।
હતોઽયં માનવઃ સૂર્યો મગ્નઃ પુણ્યજનાર્ણવે ॥ ૧૪॥

નદત્સુ યાતુધાનેષુ જયકાશિષ્વથો મૃધે ।
ઉદતિષ્ઠદ્રથસ્તસ્ય નીહારાદિવ ભાસ્કરઃ ॥ ૧૫॥

ધનુર્વિસ્ફૂર્જયન્ દિવ્યં દ્વિષતાં ખેદમુદ્વહન્ ।
અસ્ત્રૌઘં વ્યધમદ્બાણૈર્ઘનાનીકમિવાનિલઃ ॥ ૧૬॥

તસ્ય તે ચાપનિર્મુક્તા ભિત્ત્વા વર્માણિ રક્ષસામ્ ।

કાયાનાવિવિશુસ્તિગ્મા ગિરીનશનયો યથા ॥ ૧૭॥

ભલ્લૈઃ સઞ્છિદ્યમાનાનાં શિરોભિશ્ચારુકુણ્ડલૈઃ ।
ઊરુભિર્હેમતાલાભૈર્દોર્ભિર્વલયવલ્ગુભિઃ ॥ ૧૮॥

હારકેયૂરમુકુટૈરુષ્ણીષૈશ્ચ મહાધનૈઃ ।
આસ્તૃતાસ્તા રણભુવો રેજુર્વીર મનોહરાઃ ॥ ૧૯॥

હતાવશિષ્ટા ઇતરે રણાજિરા-
દ્રક્ષોગણાઃ ક્ષત્રિયવર્યસાયકૈઃ ।
પ્રાયો વિવૃક્ણાવયવા વિદુદ્રુવુઃ
મૃગેન્દ્રવિક્રીડિતયૂથપા ઇવ ॥ ૨૦॥

અપશ્યમાનઃ સ તદાતતાયિનં
મહામૃધે કઞ્ચન માનવોત્તમઃ ।
પુરીં દિદૃક્ષન્નપિ નાવિશદ્દ્વિષાં
ન માયિનાં વેદ ચિકીર્ષિતં જનઃ ॥ ૨૧॥

ઇતિ બ્રુવંશ્ચિત્રરથઃ સ્વસારથિં
યત્તઃ પરેષાં પ્રતિયોગશઙ્કિતઃ ।
શુશ્રાવ શબ્દં જલધેરિવેરિતં
નભસ્વતો દિક્ષુ રજોઽન્વદૃશ્યત ॥ ૨૨॥

ક્ષણેનાચ્છાદિતં વ્યોમ ઘનાનીકેન સર્વતઃ ।
વિસ્ફુરત્તડિતા દિક્ષુ ત્રાસયત્સ્તનયિત્નુના ॥ ૨૩॥

વવૃષૂ રુધિરૌઘાસૃક્પૂયવિણ્મૂત્રમેદસઃ ।
નિપેતુર્ગગનાદસ્ય કબન્ધાન્યગ્રતોઽનઘ ॥ ૨૪॥

તતઃ ખેઽદૃશ્યત ગિરિર્નિપેતુઃ સર્વતોદિશમ્ ।
ગદાપરિઘનિસ્ત્રિંશમુસલાઃ સાશ્મવર્ષિણઃ ॥ ૨૫॥

અહયોઽશનિનિઃશ્વાસા વમન્તોઽગ્નિં રુષાક્ષિભિઃ ।
અભ્યધાવન્ ગજા મત્તાઃ સિંહવ્યાઘ્રાશ્ચ યૂથશઃ ॥ ૨૬॥

સમુદ્ર ઊર્મિભિર્ભીમઃ પ્લાવયન્ સર્વતોભુવમ્ ।
આસસાદ મહાહ્રાદઃ કલ્પાન્ત ઇવ ભીષણઃ ॥ ૨૭॥

એવં વિધાન્યનેકાનિ ત્રાસનાન્યમનસ્વિનામ્ ।

સસૃજુસ્તિગ્મગતય આસુર્યા માયયાસુરાઃ ॥ ૨૮॥

ધ્રુવે પ્રયુક્તામસુરૈસ્તાં માયામતિદુસ્તરામ્ ।
નિશામ્ય તસ્ય મુનયઃ સમાશંસન્ સમાગતાઃ ॥ ૨૯॥

મુનય ઊચુઃ
ઔત્તાનપાદે ભગવાંસ્તવ શાર્ઙ્ગધન્વા
દેવઃ ક્ષિણોત્વવનતાર્તિહરો વિપક્ષાન્ ।
યન્નામધેયમભિધાય નિશમ્ય ચાદ્ધા
લોકોઽઞ્જસા તરતિ દુસ્તરમઙ્ગ મૃત્યુમ્ ॥ ૩૦॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ચતુર્થસ્કન્ધે દશમોઽધ્યાયઃ ॥ ૧૦॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ એકાદશોઽધ્યાયઃ - ૧૧ ॥

મૈત્રેય ઉવાચ
નિશમ્ય ગદતામેવં ઋષીણાં ધનુષિ ધ્રુવઃ ।
સન્દધેઽસ્ત્રમુપસ્પૃશ્ય યન્નારાયણનિર્મિતમ્ ॥ ૧॥

સન્ધીયમાન એતસ્મિન્ માયા ગુહ્યકનિર્મિતાઃ ।
ક્ષિપ્રં વિનેશુર્વિદુર ક્લેશા જ્ઞાનોદયે યથા ॥ ૨॥

તસ્યાર્ષાસ્ત્રં ધનુષિ પ્રયુઞ્જતઃ
સુવર્ણપુઙ્ખાઃ કલહંસવાસસઃ ।
વિનિઃસૃતા આવિવિશુર્દ્વિષદ્બલં
યથા વનં ભીમરવાઃ શિખણ્ડિનઃ ॥ ૩॥

તૈસ્તિગ્મધારૈઃ પ્રધને શિલીમુખૈ-
રિતસ્તતઃ પુણ્યજના ઉપદ્રુતાઃ ।
તમભ્યધાવન્ કુપિતા ઉદાયુધાઃ
સુપર્ણમુન્નદ્ધફણા ઇવાહયઃ ॥ ૪॥

સ તાન્ પૃષત્કૈરભિધાવતો મૃધે
નિકૃત્તબાહૂરુશિરોધરોદરાન્ ।
નિનાય લોકં પરમર્કમણ્ડલં
વ્રજન્તિ નિર્ભિદ્ય યમૂર્ધ્વરેતસઃ ॥ ૫॥

તાન્ હન્યમાનાનભિવીક્ષ્ય ગુહ્યકા-
નનાગસશ્ચિત્રરથેન ભૂરિશઃ ।
ઔત્તાનપાદિં કૃપયા પિતામહો
મનુર્જગાદોપગતઃ સહર્ષિભિઃ ॥ ૬॥

મનુરુવાચ
અલં વત્સાતિરોષેણ તમોદ્વારેણ પાપ્મના ।
યેન પુણ્યજનાનેતાનવધીસ્ત્વમનાગસઃ ॥ ૭॥

નાસ્મત્કુલોચિતં તાત કર્મૈતત્સદ્વિગર્હિતમ્ ।
વધો યદુપદેવાનામારબ્ધસ્તેઽકૃતૈનસામ્ ॥ ૮॥

નન્વેકસ્યાપરાધેન પ્રસઙ્ગાદ્બહવો હતાઃ ।
ભ્રાતુર્વધાભિતપ્તેન ત્વયાઙ્ગ ભ્રાતૃવત્સલ ॥ ૯॥

નાયં માર્ગો હિ સાધૂનાં હૃષીકેશાનુવર્તિનામ્ ।
યદાત્માનં પરાગ્ગૃહ્ય પશુવદ્ભૂતવૈશસમ્ ॥ ૧૦॥

સર્વભૂતાત્મભાવેન ભૂતાવાસં હરિં ભવાન્ ।
આરાધ્યાપ દુરારાધ્યં વિષ્ણોસ્તત્પરમં પદમ્ ॥ ૧૧॥

સ ત્વં હરેરનુધ્યાતસ્તત્પુંસામપિ સમ્મતઃ ।
કથં ત્વવદ્યં કૃતવાનનુશિક્ષન્ સતાં વ્રતમ્ ॥ ૧૨॥

તિતિક્ષયા કરુણયા મૈત્ર્યા ચાખિલજન્તુષુ ।
સમત્વેન ચ સર્વાત્મા ભગવાન્ સમ્પ્રસીદતિ ॥ ૧૩॥

સમ્પ્રસન્ને ભગવતિ પુરુષઃ પ્રાકૃતૈર્ગુણૈઃ ।
વિમુક્તો જીવનિર્મુક્તો બ્રહ્મનિર્વાણમૃચ્છતિ ॥ ૧૪॥

ભૂતૈઃ પઞ્ચભિરારબ્ધૈર્યોષિત્પુરુષ એવ હિ ।
તયોર્વ્યવાયાત્સમ્ભૂતિર્યોષિત્પુરુષયોરિહ ॥ ૧૫॥

એવં પ્રવર્તતે સર્ગઃ સ્થિતિઃ સંયમ એવ ચ ।

ગુણવ્યતિકરાદ્રાજન્ માયયા પરમાત્મનઃ ॥ ૧૬॥

નિમિત્તમાત્રં તત્રાસીન્નિર્ગુણઃ પુરુષર્ષભઃ ।
વ્યક્તાવ્યક્તમિદં વિશ્વં યત્ર ભ્રમતિ લોહવત્ ॥ ૧૭॥

સ ખલ્વિદં ભગવાન્ કાલશક્ત્યા
ગુણપ્રવાહેણ વિભક્તવીર્યઃ ।
કરોત્યકર્તૈવ નિહન્ત્યહન્તા
ચેષ્ટા વિભૂમ્નઃ ખલુ દુર્વિભાવ્યા ॥ ૧૮॥

સોઽનન્તોઽન્તકરઃ કાલોઽનાદિરાદિકૃદવ્યયઃ ।
જનં જનેન જનયન્ મારયન્ મૃત્યુનાન્તકમ્ ॥ ૧૯॥

ન વૈ સ્વપક્ષોઽસ્ય વિપક્ષ એવ વા
પરસ્ય મૃત્યોર્વિશતઃ સમં પ્રજાઃ ।
તં ધાવમાનમનુધાવન્ત્યનીશા
યથા રજાંસ્યનિલં ભૂતસઙ્ઘાઃ ॥ ૨૦॥

આયુષોઽપચયં જન્તોસ્તથૈવોપચયં વિભુઃ ।
ઉભાભ્યાં રહિતઃ સ્વસ્થો દુઃસ્થસ્ય વિદધાત્યસૌ ॥ ૨૧॥

કેચિત્કર્મ વદન્ત્યેનં સ્વભાવમપરે નૃપ ।
એકે કાલં પરે દૈવં પુંસઃ કામમુતાપરે ॥ ૨૨॥

અવ્યક્તસ્યાપ્રમેયસ્ય નાનાશક્ત્યુદયસ્ય ચ ।
ન વૈ ચિકીર્ષિતં તાત કો વેદાથ સ્વસમ્ભવમ્ ॥ ૨૩॥

ન ચૈતે પુત્રક ભ્રાતુર્હન્તારો ધનદાનુગાઃ ।
વિસર્ગાદાનયોસ્તાત પુંસો દૈવં હિ કારણમ્ ॥ ૨૪॥

સ એવ વિશ્વં સૃજતિ સ એવાવતિ હન્તિ ચ ।
અથાપિ હ્યનહઙ્કારાન્નાજ્યતે ગુણકર્મભિઃ ॥ ૨૫॥

એષ ભૂતાનિ ભૂતાત્મા ભૂતેશો ભૂતભાવનઃ ।
સ્વશક્ત્યા માયયા યુક્તઃ સૃજત્યત્તિ ચ પાતિ ચ ॥ ૨૬॥

તમેવ મૃત્યુમમૃતં તાત દૈવં
સર્વાત્મનોપેહિ જગત્પરાયણમ્ ।
યસ્મૈ બલિં વિશ્વસૃજો હરન્તિ

ગાવો યથા વૈ નસિ દામયન્ત્રિતાઃ ॥ ૨૭॥

યઃ પઞ્ચવર્ષો જનનીં ત્વં વિહાય
માતુઃ સપત્ન્યા વચસા ભિન્નમર્મા ।
વનં ગતસ્તપસા પ્રત્યગક્ષ-
મારાધ્ય લેભે મૂર્ધ્નિ પદં ત્રિલોક્યાઃ ॥ ૨૮॥

તમેનમઙ્ગાત્મનિ મુક્તવિગ્રહે
વ્યપાશ્રિતં નિર્ગુણમેકમક્ષરમ્ ।
આત્માનમન્વિચ્છ વિમુક્તમાત્મદૃ-
ગ્યસ્મિન્નિદં ભેદમસત્પ્રતીયતે ॥ ૨૯॥

ત્વં પ્રત્યગાત્મનિ તદા ભગવત્યનન્ત
આનન્દમાત્ર ઉપપન્નસમસ્તશક્તૌ ।
ભક્તિં વિધાય પરમાં શનકૈરવિદ્યા-
ગ્રન્થિં વિભેત્સ્યસિ મમાહમિતિ પ્રરૂઢમ્ ॥ ૩૦॥

સંયચ્છ રોષં ભદ્રં તે પ્રતીપં શ્રેયસાં પરમ્ ।
શ્રુતેન ભૂયસા રાજન્નગદેન યથાऽऽમયમ્ ॥ ૩૧॥

યેનોપસૃષ્ટાત્પુરુષાલ્લોક ઉદ્વિજતે ભૃશમ્ ।
ન બુધસ્તદ્વશં ગચ્છેદિચ્છન્નભયમાત્મનઃ ॥ ૩૨॥

હેલનં ગિરિશભ્રાતુર્ધનદસ્ય ત્વયા કૃતમ્ ।
યજ્જઘ્નિવાન્ પુણ્યજનાન્ ભ્રાતૃઘ્નાનિત્યમર્ષિતઃ ॥ ૩૩॥

તં પ્રસાદય વત્સાશુ સન્નત્યા પ્રશ્રયોક્તિભિઃ ।
ન યાવન્મહતાં તેજઃ કુલં નોऽભિભવિષ્યતિ ॥ ૩૪॥

એવં સ્વાયમ્ભુવઃ પૌત્રમનુશાસ્ય મનુર્ધ્રુવમ્ ।
તેનાભિવન્દિતઃ સાકમૃષિભિઃ સ્વપુરં યયૌ ॥ ૩૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ચતુર્થસ્કન્ધે એકાદશોऽધ્યાયઃ ॥ ૧૧॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ દ્વાદશોઽધ્યાયઃ - ૧૨ ॥

મૈત્રેય ઉવાચ
ધ્રુવં નિવૃત્તં પ્રતિબુદ્ધ્ય વૈશસા-
દપેતમન્યું ભગવાન્ ધનેશ્વરઃ ।
તત્રાગતશ્ચારણયક્ષકિન્નરૈઃ
સંસ્તૂયમાનોઽભ્યવદત્કૃતાઞ્જલિમ્ ॥ ૧॥

ધનદ ઉવાચ
ભો ભોઃ ક્ષત્રિયદાયાદ પરિતુષ્ટોઽસ્મિ તેઽનઘ ।
યત્ત્વં પિતામહાદેશાદ્વૈરં દુસ્ત્યજમત્યજઃ ॥ ૨॥

ન ભવાનવધીદ્યક્ષાન્ ન યક્ષા ભ્રાતરં તવ ।
કાલ એવ હિ ભૂતાનાં પ્રભુરપ્યયભાવયોઃ ॥ ૩॥

અહં ત્વમિત્યપાર્થા ધીરજ્ઞાનાત્પુરુષસ્ય હિ ।
સ્વાપ્નીવાભાત્યતદ્ધ્યાનાદ્યયા બન્ધવિપર્યયૌ ॥ ૪॥

તદ્ગચ્છ ધ્રુવ ભદ્રં તે ભગવન્તમધોક્ષજમ્ ।
સર્વભૂતાત્મભાવેન સર્વભૂતાત્મવિગ્રહમ્ ॥ ૫॥

ભજસ્વ ભજનીયાઙ્ઘ્રિમભવાય ભવચ્છિદમ્ ।
યુક્તં વિરહિતં શક્ત્યા ગુણમય્યાઽઽત્મમાયયા ॥ ૬॥

વૃણીહિ કામં નૃપ યન્મનોગતં
મત્તસ્ત્વમૌત્તાનપદેઽવિશઙ્કિતઃ ।
વરં વરાર્હોઽમ્બુજનાભપાદયો-
રનન્તરં ત્વાં વયમઙ્ગ શુશ્રુમ ॥ ૭॥

મૈત્રેય ઉવાચ
સ રાજરાજેન વરાય ચોદિતો
ધ્રુવો મહાભાગવતો મહામતિઃ ।
હરૌ સ વવ્રેઽચલિતાં સ્મૃતિં યયા
તરત્યયત્નેન દુરત્યયં તમઃ ॥ ૮॥

તસ્ય પ્રીતેન મનસા તાં દત્ત્વૈડવિડસ્તતઃ ।
પશ્યતોઽન્તર્દધે સોઽપિ સ્વપુરં પ્રત્યપદ્યત ॥ ૯॥

અથાયજત યજ્ઞેશં ક્રતુભિર્ભૂરિદક્ષિણૈઃ ।
દ્રવ્યક્રિયાદેવતાનાં કર્મ કર્મફલપ્રદમ્ ॥ ૧૦॥

સર્વાત્મન્યચ્યુતેઽસર્વે તીવ્રૌઘાં ભક્તિમુદ્વહન્ ।
દદર્શાત્મનિ ભૂતેષુ તમેવાવસ્થિતં વિભુમ્ ॥ ૧૧॥

તમેવં શીલસમ્પન્નં બ્રહ્મણ્યં દીનવત્સલમ્ ।
ગોપ્તારં ધર્મસેતૂનાં મેનિરે પિતરં પ્રજાઃ ॥ ૧૨॥

ષટ્ત્રિંશદ્વર્ષસાહસ્રં શશાસ ક્ષિતિમણ્ડલમ્ ।
ભોગૈઃ પુણ્યક્ષયં કુર્વન્નભોગૈરશુભક્ષયમ્ ॥ ૧૩॥

એવં બહુસવં કાલં મહાત્માવિચલેન્દ્રિયઃ ।
ત્રિવર્ગૌપયિકં નીત્વા પુત્રાયાદાન્નૃપાસનમ્ ॥ ૧૪॥

મન્યમાન ઇદં વિશ્વં માયારચિતમાત્મનિ ।
અવિદ્યારચિતસ્વપ્નગન્ધર્વનગરોપમમ્ ॥ ૧૫॥

આત્મસ્ત્ર્યપત્યસુહૃદો બલમૃદ્ધકોશ-
મન્તઃપુરં પરિવિહારભુવશ્ચ રમ્યાઃ ।
ભૂમણ્ડલં જલધિમેખલમાકલય્ય
કાલોપસૃષ્ટમિતિ સ પ્રયયૌ વિશાલામ્ ॥ ૧૬॥

તસ્યાં વિશુદ્ધકરણઃ શિવવાર્વિગાહ્ય-
બદ્ધ્વાઽઽસનં જિતમરુન્મનસાઽઽહૃતાક્ષઃ ।
સ્થૂલે દધાર ભગવત્પ્રતિરૂપ એત-
દ્ધ્યાયંસ્તદવ્યવહિતો વ્યસૃજત્સમાધૌ ॥ ૧૭॥

ભક્તિં હરૌ ભગવતિ પ્રવહન્નજસ્ર-
માનન્દબાષ્પકલયા મુહુરર્દ્યમાનઃ ।
વિક્લિદ્યમાનહૃદયઃ પુલકાચિતાઙ્ગો
નાત્માનમસ્મરદસાવિતિ મુક્તલિઙ્ગઃ ॥ ૧૮॥

સ દદર્શ વિમાનાગ્ર્યં નભસોઽવતરદ્ધ્રુવઃ ।
વિભ્રાજયદ્દશ દિશો રાકાપતિમિવોદિતમ્ ॥ ૧૯॥

તત્રાનુ દેવપ્રવરૌ ચતુર્ભુજૌ
શ્યામૌ કિશોરાવરુણામ્બુજેક્ષણૌ ।
સ્થિતાવવષ્ટભ્ય ગદાં સુવાસસૌ
કિરીટહારાઙ્ગદચારુકુણ્ડલૌ ॥ ૨૦॥

વિજ્ઞાય તાવુત્તમગાયકિઙ્કરા-
વભ્યુત્થિતઃ સાધ્વસવિસ્મૃતક્રમઃ ।
નનામ નામાનિ ગૃણન્ મધુદ્વિષઃ
પાર્ષત્પ્રધાનાવિતિ સંહતાઞ્જલિઃ ॥ ૨૧॥

તં કૃષ્ણપાદાભિનિવિષ્ટચેતસં
બદ્ધાઞ્જલિં પ્રશ્રયનમ્રકન્ધરમ્ ।
સુનન્દનન્દાવુપસૃત્ય સસ્મિતં
પ્રત્યૂચતુઃ પુષ્કરનાભસમ્મતૌ ॥ ૨૨॥

સુનન્દનન્દાવૂચતુઃ
ભો ભો રાજન્ સુભદ્રં તે વાચં નોઽવહિતઃ શ◌ૃણુ ।
યઃ પઞ્ચવર્ષસ્તપસા ભવાન્ દેવમતીતૃપત્ ॥ ૨૩॥

તસ્યાખિલજગદ્ધાતુરાવાં દેવસ્ય શાર્ઙ્ગિણઃ ।
પાર્ષદાવિહ સમ્પ્રાપ્તૌ નેતું ત્વાં ભગવત્પદમ્ ॥ ૨૪॥

સુદુર્જયં વિષ્ણુપદં જિતં ત્વયા
યત્સૂરયોઽપ્રાપ્ય વિચક્ષતે પરમ્ ।
આતિષ્ઠ તચ્ચન્દ્રદિવાકરાદયો
ગ્રહર્ક્ષતારાઃ પરિયન્તિ દક્ષિણમ્ ॥ ૨૫॥

અનાસ્થિતં તે પિતૃભિરન્યૈરપ્યઙ્ગ કર્હિચિત્ ।
આતિષ્ઠ જગતાં વન્દ્યં તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૨૬॥

એતદ્વિમાનપ્રવરમુત્તમશ્લોકમૌલિના ।
ઉપસ્થાપિતમાયુષ્મન્નધિરોઢું ત્વમર્હસિ ॥ ૨૭॥

મૈત્રેય ઉવાચ
નિશમ્ય વૈકુણ્ઠનિયોજ્યમુખ્યયો-
ર્મધુચ્યુતં વાચમુરુક્રમપ્રિયઃ ।
કૃતાભિષેકઃ કૃતનિત્યમઙ્ગલો

મુનીન્ પ્રણમ્યાશિષમભ્યવાદયત્ ॥ ૨૮॥

પરીત્યાભ્યર્ચ્ય ધિષ્ણ્યાગ્ર્યં પાર્ષદાવભિવન્દ્ય ચ ।
ઇયેષ તદધિષ્ઠાતું બિભ્રદ્રૂપં હિરણ્મયમ્ ॥ ૨૯॥

તદોત્તાનપદઃ પુત્રો દદર્શાન્તકમાગતમ્ ।
મૃત્યોર્મૂર્ધ્નિ પદં દત્ત્વા આરુરોહાદ્ભુતં ગૃહમ્ ॥ ૩૦॥

તદા દુન્દુભયો નેદુર્મૃદઙ્ગપણવાદયઃ ।
ગન્ધર્વમુખ્યાઃ પ્રજગુઃ પેતુઃ કુસુમવૃષ્ટયઃ ॥ ૩૧॥

સ ચ સ્વર્લોકમારોક્ષ્યન્ સુનીતિં જનનીં ધ્રુવઃ ।
અન્વસ્મરદગં હિત્વા દીનાં યાસ્યે ત્રિવિષ્ટપમ્ ॥ ૩૨॥

ઇતિ વ્યવસિતં તસ્ય વ્યવસાય સુરોત્તમૌ ।
દર્શયામાસતુર્દેવીં પુરો યાનેન ગચ્છતીમ્ ॥ ૩૩॥

તત્ર તત્ર પ્રશંસદ્ભિઃ પથિ વૈમાનિકૈઃ સુરૈઃ ।
અવકીર્યમાણો દદૃશે કુસુમૈઃ ક્રમશો ગ્રહાન્ ॥ ૩૪॥

ત્રિલોકીં દેવયાનેન સોઽતિવ્રજ્ય મુનીનપિ ।
પરસ્તાદ્યદ્ધ્રુવગતિર્વિષ્ણોઃ પદમથાભ્યગાત્ ॥ ૩૫॥

યદ્ભ્રાજમાનં સ્વરુચૈવ સર્વતો
લોકાસ્ત્રયો હ્યનુવિભ્રાજન્ત એતે ।
યન્નાવ્રજન્ જન્તુષુ યેઽનનુગ્રહા
વ્રજન્તિ ભદ્રાણિ ચરન્તિ યેઽનિશમ્ ॥ ૩૬॥

શાન્તાઃ સમદૃશઃ શુદ્ધાઃ સર્વભૂતાનુરઞ્જનાઃ ।
યાન્ત્યઞ્જસાચ્યુતપદમચ્યુતપ્રિયબાન્ધવાઃ ॥ ૩૭॥

ઇત્યુત્તાનપદઃ પુત્રો ધ્રુવઃ કૃષ્ણપરાયણઃ ।
અભૂત્ત્રયાણાં લોકાનાં ચૂડામણિરિવામલઃ ॥ ૩૮॥

ગમ્ભીરવેગોઽનિમિષં જ્યોતિષાં ચક્રમાહિતમ્ ।
યસ્મિન્ ભ્રમતિ કૌરવ્ય મેઢ્યામિવ ગવાં ગણઃ ॥ ૩૯॥

મહિમાનં વિલોક્યાસ્ય નારદો ભગવાન્ ઋષિઃ ।
આતોદ્યં વિતુદઞ્શ્લોકાન્ સત્રેઽગાયત્પ્રચેતસામ્ ॥ ૪૦॥

નારદ ઉવાચ

નૂનં સુનીતેઃ પતિદેવતાયા-
સ્તપઃપ્રભાવસ્ય સુતસ્ય તાં ગતિમ્ ।
દૃષ્ટ્વાભ્યુપાયાનપિ વેદવાદિનો
નૈવાધિગન્તું પ્રભવન્તિ કિં નૃપાઃ ॥ ૪૧॥

યઃ પઞ્ચવર્ષો ગુરુદારવાક્શરૈ-
ર્ભિન્નેન યાતો હૃદયેન દૂયતા ।
વનં મદાદેશકરોઽજિતં પ્રભું
જિગાય તદ્ભક્તગુણૈઃ પરાજિતમ્ ॥ ૪૨॥

યઃ ક્ષત્રબન્ધુર્ભુવિ તસ્યાધિરૂઢ-
મન્વારુરુક્ષેદપિ વર્ષપૂગૈઃ ।
ષટ્પઞ્ચવર્ષો યદહોભિરલ્પૈઃ
પ્રસાદ્ય વૈકુણ્ઠમવાપ તત્પદમ્ ॥ ૪૩॥

મૈત્રેય ઉવાચ
એતત્તેઽભિહિતં સર્વં યત્પૃષ્ટોઽહમિહ ત્વયા ।
ધ્રુવસ્યોદ્દામયશસશ્ચરિતં સમ્મતં સતામ્ ॥ ૪૪॥

ધન્યં યશસ્યમાયુષ્યં પુણ્યં સ્વસ્ત્યયનં મહત્ ।
સ્વર્ગ્યં ધ્રૌવ્યં સૌમનસ્યં પ્રશસ્યમઘમર્ષણમ્ ॥ ૪૫॥

શ્રુત્વૈતચ્છ્રદ્ધયાભીક્ષ્ણમચ્યુતપ્રિયચેષ્ટિતમ્ ।
ભવેદ્ભક્તિર્ભગવતિ યયા સ્યાત્ક્લેશસઙ્ક્ષયઃ ॥ ૪૬॥

મહત્ત્વમિચ્છતાં તીર્થં શ્રોતુઃ શીલાદયો ગુણાઃ ।
યત્ર તેજસ્તદિચ્છૂનાં માનો યત્ર મનસ્વિનામ્ ॥ ૪૭॥

પ્રયતઃ કીર્તયેત્પ્રાતઃ સમવાયે દ્વિજન્મનામ્ ।
સાયં ચ પુણ્યશ્લોકસ્ય ધ્રુવસ્ય ચરિતં મહત્ ॥ ૪૮॥

પૌર્ણમાસ્યાં સિનીવાલ્યાં દ્વાદશ્યાં શ્રવણેઽથવા ।
દિનક્ષયે વ્યતીપાતે સઙ્ક્રમેઽર્કદિનેઽપિ વા ॥ ૪૯॥

શ્રાવયેચ્છ્રદ્દધાનાનાં તીર્થપાદપદાશ્રયઃ ।
નેચ્છંસ્તત્રાત્મનાઽઽત્માનં સન્તુષ્ટ ઇતિ સિધ્યતિ ॥ ૫૦॥

જ્ઞાનમજ્ઞાતતત્ત્વાય યો દદ્યાત્સત્પથેઽમૃતમ્ ।
કૃપાલોર્દીનનાથસ્ય દેવાસ્તસ્યાનુગૃહ્ણતે ॥ ૫૧॥

ઇદં મયા તેઽભિહિતં કુરૂદ્વહ
ધ્રુવસ્ય વિખ્યાતવિશુદ્ધકર્મણઃ ।
હિત્વાર્ભકઃ ક્રીડનકાનિ માતુ-
ર્ગૃહં ચ વિષ્ણું શરણં યો જગામ ॥ ૫૨॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે ધ્રુવચરિતં નામ દ્વાદશોઽધ્યાયઃ ॥ ૧૨॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ત્રયોદશોઽધ્યાયઃ - ૧૩॥

સૂત ઉવાચ
નિશમ્ય કૌષારવિણોપવર્ણિતં
ધ્રુવસ્ય વૈકુણ્ઠપદાધિરોહણમ્ ।
પ્રરૂઢભાવો ભગવત્યધોક્ષજે
પ્રષ્ટું પુનસ્તં વિદુરઃ પ્રચક્રમે ॥ ૧॥

વિદુર ઉવાચ
કે તે પ્રચેતસો નામ કસ્યાપત્યાનિ સુવ્રત ।
કસ્યાન્વવાયે પ્રખ્યાતાઃ કુત્ર વા સત્રમાસત ॥ ૨॥

મન્યે મહાભાગવતં નારદં દેવદર્શનમ્ ।
યેન પ્રોક્તઃ ક્રિયાયોગઃ પરિચર્યાવિધિર્હરેઃ ॥ ૩॥

સ્વધર્મશીલૈઃ પુરુષૈર્ભગવાન્ યજ્ઞપૂરુષઃ ।
ઇજ્યમાનો ભક્તિમતા નારદેનેરિતઃ કિલ ॥ ૪॥

યાસ્તા દેવર્ષિણા તત્ર વર્ણિતા ભગવત્કથાઃ ।
મહ્યં શુશ્રૂષવે બ્રહ્મન્ કાર્ત્સ્ન્યેનાચષ્ટુમર્હસિ ॥ ૫॥

મૈત્રેય ઉવાચ
ધ્રુવસ્ય ચોત્કલઃ પુત્રઃ પિતરિ પ્રસ્થિતે વનમ્ ।
સાર્વભૌમશ્રિયં નૈચ્છદધિરાજાસનં પિતુઃ ॥ ૬॥

સ જન્મનોપશાન્તાત્મા નિઃસઙ્ગઃ સમદર્શનઃ ।
દદર્શ લોકે વિતતમાત્માનં લોકમાત્મનિ ॥ ૭॥

આત્માનં બ્રહ્મનિર્વાણં પ્રત્યસ્તમિતવિગ્રહમ્ ।
અવબોધરસૈકાત્મ્યમાનન્દમનુસન્તતમ્ ॥ ૮॥

અવ્યવચ્છિન્નયોગાગ્નિદગ્ધકર્મમલાશયઃ ।
સ્વરૂપમવરુન્ધાનો નાત્મનોઽન્યં તદૈક્ષત ॥ ૯॥

જડાન્ધબધિરોન્મત્તમૂકાકૃતિરતન્મતિઃ ।
લક્ષિતઃ પથિ બાલાનાં પ્રશાન્તાર્ચિરિવાનલઃ ॥ ૧૦॥

મત્વા તં જડમુન્મત્તં કુલવૃદ્ધાઃ સમન્ત્રિણઃ ।
વત્સરં ભૂપતિં ચક્રુર્યવીયાંસં ભ્રમેઃ સુતમ્ ॥ ૧૧॥

સ્વર્વીથિર્વત્સરસ્યેષ્ટા ભાર્યાસૂત ષડાત્મજાન્ ।
પુષ્પાર્ણં તિગ્મકેતું ચ ઇષમૂર્જં વસું જયમ્ ॥ ૧૨॥

પુષ્પાર્ણસ્ય પ્રભા ભાર્યા દોષા ચ દ્વે બભૂવતુઃ ।
પ્રાતર્મધ્યન્દિનં સાયમિતિ હ્યાસન્ પ્રભાસુતાઃ ॥ ૧૩॥

પ્રદોષો નિશિથો વ્યુષ્ટ ઇતિ દોષા સુતાસ્ત્રયઃ ।
વ્યુષ્ટઃ સુતં પુષ્કરિણ્યાં સર્વતેજસમાદધે ॥ ૧૪॥

સ ચક્ષુઃ સુતમાકૂત્યાં પત્ન્યાં મનુમવાપ હ ।
મનોરસૂત મહિષી વિરજાન્ નડ્વલા સુતાન્ ॥ ૧૫॥

પુરું કુત્સં ત્રિતં દ્યુમ્નં સત્યવન્તમૃતં વ્રતમ્ ।
અગ્નિષ્ટોમમતીરાત્રં પ્રદ્યુમ્નં શિબિમુલ્મુકમ્ ॥ ૧૬॥

ઉલ્મુકોઽજનયત્પુત્રાન્ પુષ્કરિણ્યાં ષડુત્તમાન્ ।
અઙ્ગં સુમનસં ખ્યાતિં ક્રતુમઙ્ગિરસં ગયમ્ ॥ ૧૭॥

સુનીથાઙ્ગસ્ય યા પત્ની સુષુવે વેનમુલ્બણમ્ ।
યદ્દૌઃશીલ્યાત્સ રાજર્ષિર્નિર્વિણ્ણો નિરગાત્પુરાત્ ॥ ૧૮॥

યમઙ્ગ શેપુઃ કુપિતા વાગ્વજ્રા મુનયઃ કિલ ।
ગતાસોસ્તસ્ય ભૂયસ્તે મમન્થુર્દક્ષિણં કરમ્ ॥ ૧૯॥

અરાજકે તદા લોકે દસ્યુભિઃ પીડિતાઃ પ્રજાઃ ।

જાતો નારાયણાંશેન પૃથુરાદ્યઃ ક્ષિતીશ્વરઃ ॥ ૨૦॥

વિદુર ઉવાચ

તસ્ય શીલનિધેઃ સાધોર્બ્રહ્મણ્યસ્ય મહાત્મનઃ ।

રાજ્ઞઃ કથમભૂદ્દુષ્ટા પ્રજા યદ્વિમના યયૌ ॥ ૨૧॥

કિં વાંહો વેન ઉદ્દિશ્ય બ્રહ્મદણ્ડમયૂયુજન્ ।

દણ્ડવ્રતધરે રાજ્ઞિ મુનયો ધર્મકોવિદાઃ ॥ ૨૨॥

નાવધ્યેયઃ પ્રજાપાલઃ પ્રજાભિરઘવાનપિ ।

યદસૌ લોકપાલાનાં બિભર્ત્યોજઃ સ્વતેજસા ॥ ૨૩॥

એતદાખ્યાહિ મે બ્રહ્મન્ સુનીથાત્મજચેષ્ટિતમ્ ।

શ્રદ્દધાનાય ભક્તાય ત્વં પરાવરવિત્તમઃ ॥ ૨૪॥

મૈત્રેય ઉવાચ

અઙ્ગોઽશ્વમેધં રાજર્ષિરાજહાર મહાક્રતુમ્ ।

નાજગ્મુર્દેવતાસ્તસ્મિન્નાહૂતા બ્રહ્મવાદિભિઃ ॥ ૨૫॥

તમૂચુર્વિસ્મિતાસ્તત્ર યજમાનમથર્ત્વિજઃ ।

હવીંષિ હૂયમાનાનિ ન તે ગૃહ્ણન્તિ દેવતાઃ ॥ ૨૬॥

રાજન્ હવીંષ્યદુષ્ટાનિ શ્રદ્ધયાસાદિતાનિ તે ।

છન્દાંસ્યયાતયામાનિ યોજિતાનિ ધૃતવ્રતૈઃ ॥ ૨૭॥

ન વિદામેહ દેવાનાં હેલનં વયમણ્વપિ ।

યન્ન ગૃહ્ણન્તિ ભાગાન્ સ્વાન્ યે દેવાઃ કર્મસાક્ષિણઃ ॥ ૨૮॥

મૈત્રેય ઉવાચ

અઙ્ગો દ્વિજવચઃ શ્રુત્વા યજમાનઃ સુદુર્મનાઃ ।

તત્પ્રષ્ટું વ્યસૃજદ્વાચં સદસ્યાંસ્તદનુજ્ઞયા ॥ ૨૯॥

નાગચ્છન્ત્યાહુતા દેવા ન ગૃહ્ણન્તિ ગ્રહાનિહ ।

સદસસ્પતયો બ્રૂત કિમવદ્યં મયા કૃતમ્ ॥ ૩૦॥

સદસસ્પતય ઊચુઃ

નરદેવેહ ભવતો નાઘં તાવન્મનાક્સ્થિતમ્ ।

અસ્ત્યેકં પ્રાક્તનમઘં યદિહેદૃક્ત્વમપ્રજઃ ॥ ૩૧॥

તથા સાધય ભદ્રં તે આત્માનં સુપ્રજં નૃપ ।

ઇષ્ટસ્તે પુત્રકામસ્ય પુત્રં દાસ્યતિ યજ્ઞભુક્ ॥ ૩૨॥

તથા સ્વભાગધેયાનિ ગ્રહીષ્યન્તિ દિવૌકસઃ ।
યદ્યજ્ઞપુરુષઃ સાક્ષાદપત્યાય હરિર્વૃતઃ ॥ ૩૩॥

તાંસ્તાન્ કામાન્ હરિર્દદ્યાદ્યાન્ યાન્ કામયતે જનઃ ।
આરાધિતો યથૈવૈષ તથા પુંસાં ફલોદયઃ ॥ ૩૪॥

ઇતિ વ્યવસિતા વિપ્રાસ્તસ્ય રાજ્ઞઃ પ્રજાતયે ।
પુરોડાશં નિરવપન્ શિપિવિષ્ટાય વિષ્ણવે ॥ ૩૫॥

તસ્માત્પુરુષ ઉત્તસ્થૌ હેમમાલ્યમલામ્બરઃ ।
હિરણ્મયેન પાત્રેણ સિદ્ધમાદાય પાયસમ્ ॥ ૩૬॥

સ વિપ્રાનુમતો રાજા ગૃહીત્વાઞ્જલિનૌદનમ્ ।
અવઘ્રાય મુદા યુક્તઃ પ્રાદાત્પત્ન્યા ઉદારધીઃ ॥ ૩૭॥

સા તત્પુંસવનં રાજ્ઞી પ્રાશ્ય વૈ પત્યુરાદધે ।
ગર્ભં કાલ ઉપાવૃત્તે કુમારં સુષુવેઽપ્રજા ॥ ૩૮॥

સ બાલ એવ પુરુષો માતામહમનુવ્રતઃ ।
અધર્માંશોદ્ભવં મૃત્યું તેનાભવદધાર્મિકઃ ॥ ૩૯॥

સ શરાસનમુદ્યમ્ય મૃગયુર્વનગોચરઃ ।
હન્ત્યસાધુર્મૃગાન્ દીનાન્ વેનોઽસાવિત્યરૌજ્જનઃ ॥ ૪૦॥

આક્રીડે ક્રીડતો બાલાન્ વયસ્યાનતિદારુણઃ ।
પ્રસહ્ય નિરનુક્રોશઃ પશુમારમમારયત્ ॥ ૪૧॥

તં વિચક્ષ્ય ખલં પુત્રં શાસનૈર્વિવિધૈર્નૃપઃ ।
યદા ન શાસિતું કલ્પો ભૃશમાસીત્સુદુર્મનાઃ ॥ ૪૨॥

પ્રાયેણાભ્યર્ચિતો દેવો યેઽપ્રજા ગૃહમેધિનઃ ।
કદપત્યભૃતં દુઃખં યે ન વિન્દન્તિ દુર્ભરમ્ ॥ ૪૩॥

યતઃ પાપીયસી કીર્તિરધર્મશ્ચ મહાન્ નૃણામ્ ।
યતો વિરોધઃ સર્વેષાં યત આધિરનન્તકઃ ॥ ૪૪॥

કસ્તં પ્રજાપદેશં વૈ મોહબન્ધનમાત્મનઃ ।
પણ્ડિતો બહુ મન્યેત યદર્થાઃ ક્લેશદા ગૃહાઃ ॥ ૪૫॥

કદપત્યં વરં મન્યે સદપત્યાચ્છુચાં પદાત્ ।
નિર્વિદ્યેત ગૃહાન્મર્ત્યો યત્ક્લેશનિવહા ગૃહાઃ ॥ ૪૬॥

એવં સ નિર્વિણ્ણમના નૃપો ગૃહાન્
નિશીથ ઉત્થાય મહોદયોદયાત્ ।
અલબ્ધનિદ્રોઽનુપલક્ષિતો નૃભિ-
ર્હિત્વા ગતો વેનસુવં પ્રસુપ્તામ્ ॥ ૪૭॥

વિજ્ઞાય નિર્વિદ્ય ગતં પતિં પ્રજાઃ
પુરોહિતામાત્યસુહૃદ્ગણાદયઃ ।
વિચિક્યુરુર્વ્યામતિશોકકાતરા
યથા નિગૂઢં પુરુષં કુયોગિનઃ ॥ ૪૮॥

અલક્ષયન્તઃ પદવીં પ્રજાપતેઃ
હતોદ્યમાઃ પ્રત્યુપસૃત્ય તે પુરીમ્ ।
ઋષીન્ સમેતાનભિવન્દ્ય સાશ્રવો
ન્યવેદયન્ પૌરવ ભર્તૃવિપ્લવમ્ ॥ ૪૯॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ચતુર્થસ્કન્ધે ત્રયોદશોઽધ્યાયઃ ॥ ૧૩॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ચતુર્દશોઽધ્યાયઃ - ૧૪॥

મૈત્રેય ઉવાચ
ભૃગ્વાદયસ્તે મુનયો લોકાનાં ક્ષેમદર્શિનઃ ।
ગોપ્તર્યસતિ વૈ નૃણાં પશ્યન્તઃ પશુસામ્યતામ્ ॥ ૧॥

વીરમાતરમાહૂય સુનીથાં બ્રહ્મવાદિનઃ ।
પ્રકૃત્યસમ્મતં વેનમભ્યષિઞ્ચન્ પતિં ભુવઃ ॥ ૨॥

શ્રુત્વા નૃપાસનગતં વેનમત્યુગ્રશાસનમ્ ।
નિલિલ્યુર્દસ્યવઃ સદ્યઃ સર્પત્રસ્તા ઇવાખવઃ ॥ ૩॥

સ આરૂઢનૃપસ્થાન ઉન્નદ્ધોઽષ્ટવિભૂતિભિઃ ।
અવમેને મહાભાગાન્ સ્તબ્ધઃ સમ્ભાવિતઃ સ્વતઃ ॥ ૪॥

એવં મદાન્ધ ઉત્સિક્તો નિરઙ્કુશ ઇવ દ્વિપઃ ।
પર્યટન્ રથમાસ્થાય કમ્પયન્નિવ રોદસી ॥ ૫॥

ન યષ્ટવ્યં ન દાતવ્યં ન હોતવ્યં દ્વિજાઃ ક્વચિત્ ।
ઇતિ ન્યવારયદ્ધર્મં ભેરીઘોષેણ સર્વશઃ ॥ ૬॥

વેનસ્યાવેક્ષ્ય મુનયો દુર્વૃત્તસ્ય વિચેષ્ટિતમ્ ।
વિમૃશ્ય લોકવ્યસનં કૃપયોચુઃ સ્મ સત્રિણઃ ॥ ૭॥

અહો ઉભયતઃ પ્રાપ્તં લોકસ્ય વ્યસનં મહત્ ।
દારુણ્યુભયતો દીપ્તે ઇવ તસ્કરપાલયોઃ ॥ ૮॥

અરાજકભયાદેષ કૃતો રાજાતદર્હણઃ ।
તતોઽપ્યાસીદ્ભયં ત્વદ્ય કથં સ્યાત્સ્વસ્તિ દેહિનામ્ ॥ ૯॥

અહેરિવ પયઃ પોષઃ પોષકસ્યાપ્યનર્થભૃત્ ।
વેનઃ પ્રકૃત્યૈવ ખલઃ સુનીથાગર્ભસમ્ભવઃ ॥ ૧૦॥

નિરૂપિતઃ પ્રજાપાલઃ સ જિઘાંસતિ વૈ પ્રજાઃ ।
તથાપિ સાન્ત્વયેમામું નાસ્માંસ્તત્પાતકં સ્પૃશેત્ ॥ ૧૧॥

તદ્વિદ્વદ્ભિરસદ્વૃત્તો વેનોઽસ્માભિઃ કૃતો નૃપઃ ।
સાન્ત્વિતો યદિ નો વાચં ન ગ્રહીષ્યત્યધર્મકૃત્ ॥ ૧૨॥

લોકધિક્કારસન્દગ્ધં દહિષ્યામઃ સ્વતેજસા ।
એવમધ્યવસાયૈનં મુનયો ગૂઢમન્યવઃ ।
ઉપવ્રજ્યાબ્રુવન્ વેનં સાન્ત્વયિત્વા ચ સામભિઃ ॥ ૧૩॥

મુનય ઊચુઃ
નૃપવર્ય નિબોધૈતદ્યત્તે વિજ્ઞાપયામ ભોઃ ।
આયુઃશ્રીબલકીર્તીનાં તવ તાત વિવર્ધનમ્ ॥ ૧૪॥

ધર્મ આચરિતઃ પુંસાં વાઙ્મનઃકાયબુદ્ધિભિઃ ।
લોકાન્ વિશોકાન્ વિતરત્યથાનન્ત્યમસઙ્ગિનામ્ ॥ ૧૫॥

સ તે મા વિનશેદ્વીર પ્રજાનાં ક્ષેમલક્ષણઃ ।
યસ્મિન્ વિનષ્ટે નૃપતિરૈશ્વર્યાદવરોહતિ ॥ ૧૬॥

રાજન્નસાધ્વમાત્યેભ્યશ્ચોરાદિભ્યઃ પ્રજા નૃપઃ ।
રક્ષન્ યથા બલિં ગૃહ્ણન્નિહ પ્રેત્ય ચ મોદતે ॥ ૧૭॥

યસ્ય રાષ્ટ્રે પુરે ચૈવ ભગવાન્ યજ્ઞપૂરુષઃ ।
ઇજ્યતે સ્વેન ધર્મેણ જનૈર્વર્ણાશ્રમાન્વિતૈઃ ॥ ૧૮॥

તસ્ય રાજ્ઞો મહાભાગ ભગવાન્ ભૂતભાવનઃ ।
પરિતુષ્યતિ વિશ્વાત્મા તિષ્ઠતો નિજશાસને ॥ ૧૯॥

તસ્મિંસ્તુષ્ટે કિમપ્રાપ્યં જગતામીશ્વરેશ્વરે ।
લોકાઃ સપાલા હ્યેતસ્મૈ હરન્તિ બલિમાદૃતાઃ ॥ ૨૦॥

તં સર્વલોકામરયજ્ઞસઙ્ગ્રહં
ત્રયીમયં દ્રવ્યમયં તપોમયમ્ ।
યજ્ઞૈર્વિચિત્રૈર્યજતો ભવાય તે
રાજન્ સ્વદેશાનનુરોદ્ધુમર્હસિ ॥ ૨૧॥

યજ્ઞેન યુષ્મદ્વિષયે દ્વિજાતિભિ-
ર્વિતાયમાનેન સુરાઃ કલા હરેઃ ।
સ્વિષ્ટાઃ સુતુષ્ટાઃ પ્રદિશન્તિ વાઞ્છિતં
તદ્ધેલનં નાર્હસિ વીર ચેષ્ટિતુમ્ ॥ ૨૨॥

વેન ઉવાચ
બાલિશા બત યૂયં વા અધર્મે ધર્મમાનિનઃ ।
યે વૃત્તિદં પતિં હિત્વા જારં પતિમુપાસતે ॥ ૨૩॥

અવજાનન્ત્યમી મૂઢા નૃપરૂપિણમીશ્વરમ્ ।
નાનુવિન્દન્તિ તે ભદ્રમિહ લોકે પરત્ર ચ ॥ ૨૪॥

કો યજ્ઞપુરુષો નામ યત્ર વો ભક્તિરીદૃશી ।
ભર્તૃસ્નેહવિદૂરાણાં યથા જારે કુયોષિતામ્ ॥ ૨૫॥

વિષ્ણુર્વિરિઞ્ચો ગિરિશ ઇન્દ્રો વાયુર્યમો રવિઃ ।
પર્જન્યો ધનદઃ સોમઃ ક્ષિતિરગ્નિરપામ્પતિઃ ॥ ૨૬॥

એતે ચાન્યે ચ વિબુધાઃ પ્રભવો વરશાપયોઃ ।
દેહે ભવન્તિ નૃપતેઃ સર્વદેવમયો નૃપઃ ॥ ૨૭॥

તસ્માન્માં કર્મભિર્વિપ્રા યજધ્વં ગતમત્સરાઃ ।

બલિં ચ મહ્યં હરત મત્તોઽન્યઃ કોઽગ્રભુક્ પુમાન્ ॥ ૨૮॥

મૈત્રેય ઉવાચ
ઇત્થં વિપર્યયમતિઃ પાપીયાનુત્પથં ગતઃ ।
અનુનીયમાનસ્તદ્યાચ્ઞાં ન ચક્રે ભ્રષ્ટમઙ્ગલઃ ॥ ૨૯॥

ઇતિ તેઽસત્કૃતાસ્તેન દ્વિજાઃ પણ્ડિતમાનિના ।
ભગ્નાયાં ભવ્યયાચ્ઞાયાં તસ્મૈ વિદુર ચુક્રુધુઃ ॥ ૩૦॥

હન્યતાં હન્યતામેષ પાપઃ પ્રકૃતિદારુણઃ ।
જીવન્ જગદસાવાશુ કુરુતે ભસ્મસાદ્ધ્રુવમ્ ॥ ૩૧॥

નાયમર્હત્યસદ્વૃત્તો નરદેવવરાસનમ્ ।
યોઽધિયજ્ઞપતિં વિષ્ણું વિનિન્દત્યનપત્રપઃ ॥ ૩૨॥

કો વૈનં પરિચક્ષીત વેનમેકમૃતેઽશુભમ્ ।
પ્રાપ્ત ઈદૃશમૈશ્વર્યં યદનુગ્રહભાજનઃ ॥ ૩૩॥

ઇત્થં વ્યવસિતા હન્તું ઋષયો રૂઢમન્યવઃ ।
નિજઘ્નુર્હુઙ્કૃતૈર્વેનં હતમચ્યુતનિન્દયા ॥ ૩૪॥

ઋષિભિઃ સ્વાશ્રમપદં ગતે પુત્રકલેવરમ્ ।
સુનીથા પાલયામાસ વિદ્યાયોગેન શોચતી ॥ ૩૫॥

એકદા મુનયસ્તે તુ સરસ્વત્સલિલાપ્લુતાઃ ।
હુત્વાગ્નીન્ સત્કથાશ્ચક્રુરુપવિષ્ટાઃ સરિત્તટે ॥ ૩૬॥

વીક્ષ્યોત્થિતાન્મહોત્પાતાનાહુર્લોકભયઙ્કરાન્ ।
અપ્યભદ્રમનાથાયા દસ્યુભ્યો ન ભવેદ્ભુવઃ ॥ ૩૭॥

એવં મૃશન્ત ઋષયો ધાવતાં સર્વતોદિશમ્ ।
પાંસુઃ સમુત્થિતો ભૂરિશ્ચોરાણામભિલુમ્પતામ્ ॥ ૩૮॥

તદુપદ્રવમાજ્ઞાય લોકસ્ય વસુ લુમ્પતામ્ ।
ભર્તર્યુપરતે તસ્મિન્નન્યોન્યં ચ જિઘાંસતામ્ ॥ ૩૯॥

ચોરપ્રાયં જનપદં હીનસત્ત્વમરાજકમ્ ।
લોકાન્ નાવારયઞ્છક્તા અપિ તદ્દોષદર્શિનઃ ॥ ૪૦॥

બ્રાહ્મણઃ સમદૃક્ શાન્તો દીનાનાં સમુપેક્ષકઃ ।
સ્રવતે બ્રહ્મ તસ્યાપિ ભિન્નભાણ્ડાત્પયો યથા ॥ ૪૧॥

નાઙ્ગસ્ય વંશો રાજર્ષેરેષ સંસ્થાતુમર્હતિ ।
અમોઘવીર્યા હિ નૃપા વંશેઽસ્મિન્ કેશવાશ્રયાઃ ॥ ૪૨॥

વિનિશ્ચિત્યૈવમૃષયો વિપન્નસ્ય મહીપતેઃ ।
મમન્થુરૂરું તરસા તત્રાસીદ્બાહુકો નરઃ ॥ ૪૩॥

કાકકૃષ્ણોઽતિહ્રસ્વાઙ્ગો હ્રસ્વબાહુર્મહાહનુઃ ।
હ્રસ્વપાન્નિમ્નનાસાગ્રો રક્તાક્ષસ્તામ્રમૂર્ધજઃ ॥ ૪૪॥

તં તુ તેઽવનતં દીનં કિં કરોમીતિ વાદિનમ્ ।
નિષીદેત્યબ્રુવંસ્તાત સ નિષાદસ્તતોઽભવત્ ॥ ૪૫॥

તસ્ય વંશ્યાસ્તુ નૈષાદા ગિરિકાનનગોચરાઃ ।
યેનાહરજ્જાયમાનો વેનકલ્મષમુલ્બણમ્ ॥ ૪૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પૃથુચરિતે નિષાદોત્પત્તિર્નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧૪॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ પઞ્ચદશોઽધ્યાયઃ - ૧૫॥

મૈત્રેય ઉવાચ
અથ તસ્ય પુનર્વિપ્રૈરપુત્રસ્ય મહીપતેઃ ।
બાહુભ્યાં મથ્યમાનાભ્યાં મિથુનં સમપદ્યત ॥ ૧॥

તદ્દૃષ્ટ્વા મિથુનં જાતં ઋષયો બ્રહ્મવાદિનઃ ।
ઊચુઃ પરમસન્તુષ્ટા વિદિત્વા ભગવત્કલામ્ ॥ ૨॥

ઋષય ઊચુઃ
એષ વિષ્ણોર્ભગવતઃ કલા ભુવનપાલિની ।
ઇયં ચ લક્ષ્મ્યાઃ સમ્ભૂતિઃ પુરુષસ્યાનપાયિની ॥ ૩॥

અયં તુ પ્રથમો રાજ્ઞાં પુમાન્ પ્રથયિતા યશઃ ।
પૃથુર્નામ મહારાજો ભવિષ્યતિ પૃથુશ્રવાઃ ॥ ૪॥

ઇયં ચ સુદતી દેવી ગુણભૂષણભૂષણા ।
અર્ચિર્નામ વરારોહા પૃથુમેવાવરુન્ધતી ॥ ૫॥

એષ સાક્ષાદ્ધરેરંશો જાતો લોકરિરક્ષયા ।
ઇયં ચ તત્પરા હિ શ્રીરનુજજ્ઞેઽનપાયિની ॥ ૬॥

મૈત્રેય ઉવાચ
પ્રશંસન્તિ સ્મ તં વિપ્રા ગન્ધર્વપ્રવરા જગુઃ ।
મુમુચુઃ સુમનોધારાઃ સિદ્ધા નૃત્યન્તિ સ્વઃસ્ત્રિયઃ ॥ ૭॥

શઙ્ખતૂર્યમૃદઙ્ગાદ્યા નેદુર્દુન્દુભયો દિવિ ।
તત્ર સર્વ ઉપાજગ્મુર્દેવર્ષિપિતૃણાં ગણાઃ ॥ ૮॥

બ્રહ્મા જગદ્ગુરુર્દેવૈઃ સહાસૃત્ય સુરેશ્વરૈઃ ।
વૈન્યસ્ય દક્ષિણે હસ્તે દૃષ્ટ્વા ચિહ્નં ગદાભૃતઃ ॥ ૯॥

પાદયોરરવિન્દં ચ તં વૈ મેને હરેઃ કલામ્ ।
યસ્યાપ્રતિહતં ચક્રમંશઃ સ પરમેષ્ઠિનઃ ॥ ૧૦॥

તસ્યાભિષેક આરબ્ધો બ્રાહ્મણૈર્બ્રહ્મવાદિભિઃ ।
આભિષેચનિકાન્યસ્મૈ આજહ્રુઃ સર્વતો જનાઃ ॥ ૧૧॥

સરિત્સમુદ્રા ગિરયો નાગા ગાવઃ ખગા મૃગાઃ ।
દ્યૌઃ ક્ષિતિઃ સર્વભૂતાનિ સમાજહ્રુરુપાયનમ્ ॥ ૧૨॥

સોઽભિષિક્તો મહારાજઃ સુવાસાઃ સાધ્વલઙ્કૃતઃ ।
પત્ન્યાર્ચિષાલઙ્કૃતયા વિરેજેઽગ્નિરિવાપરઃ ॥ ૧૩॥

તસ્મૈ જહાર ધનદો હૈમં વીરવરાસનમ્ ।
વરુણઃ સલિલસ્રાવમાતપત્રં શશિપ્રભમ્ ॥ ૧૪॥

વાયુશ્ચ વાલવ્યજને ધર્મઃ કીર્તિમયીં સ્રજમ્ ।
ઇન્દ્રઃ કિરીટમુત્કૃષ્ટં દણ્ડં સંયમનં યમઃ ॥ ૧૫॥

બ્રહ્મા બ્રહ્મમયં વર્મ ભારતી હારમુત્તમમ્ ।
હરિઃ સુદર્શનં ચક્રં તત્પત્ન્યવ્યાહતાં શ્રિયમ્ ॥ ૧૬॥

દશચન્દ્રમસિં રુદ્રઃ શતચન્દ્રં તથામ્બિકા ।
સોમોઽમૃતમયાનશ્વાંસ્ત્વષ્ટા રૂપાશ્રયં રથમ્ ॥ ૧૭॥

અગ્નિરાજગવં ચાપં સૂર્યો રશ્મિમયાનિષૂન્ ।

ભૂઃ પાદુકે યોગમય્યૌ દ્યૌઃ પુષ્પાવલિમન્વહમ્ ॥ ૧૮॥

નાટ્યં સુગીતં વાદિત્રમન્તર્ધાનં ચ ખેચરાઃ ।
ઋષયશ્ચાશિષઃ સત્યાઃ સમુદ્રઃ શઙ્ખમાત્મજમ્ ॥ ૧૯॥

સિન્ધવઃ પર્વતા નદ્યો રથવીથીર્મહાત્મનઃ ।
સૂતોઽથ માગધો વન્દી તં સ્તોતુમુપતસ્થિરે ॥ ૨૦॥

સ્તાવકાંસ્તાનભિપ્રેત્ય પૃથુર્વૈન્યઃ પ્રતાપવાન્ ।
મેઘનિર્હ્રાદયા વાચા પ્રહસન્નિદમબ્રવીત્ ॥ ૨૧॥

પૃથુરુવાચ
ભોઃ સૂત હે માગધ સૌમ્ય વન્દિન્
લોકેઽધુનાસ્પષ્ટગુણસ્ય મે સ્યાત્ ।
કિમાશ્રયો મે સ્તવ એષ યોજ્યતાં
મા મય્યભૂવન્ વિતથા ગિરો વઃ ॥ ૨૨॥

તસ્માત્પરોક્ષેઽસ્મદુપશ્રુતાન્યલં
કરિષ્યથ સ્તોત્રમપીચ્યવાચઃ ।
સત્યુત્તમશ્લોકગુણાનુવાદે
જુગુપ્સિતં ન સ્તવયન્તિ સભ્યાઃ ॥ ૨૩॥

મહદ્ગુણાનાત્મનિ કર્તુમીશઃ
કઃ સ્તાવકૈઃ સ્તાવયતેઽસતોઽપિ ।
તેઽસ્યાભવિષ્યન્નિતિ વિપ્રલબ્ધો
જનાવહાસં કુમતિર્ન વેદ ॥ ૨૪॥

પ્રભવો હ્યાત્મનઃ સ્તોત્રં જુગુપ્સન્ત્યપિ વિશ્રુતાઃ ।
હ્રીમન્તઃ પરમોદારાઃ પૌરુષં વા વિગર્હિતમ્ ॥ ૨૫॥

વયં ત્વવિદિતા લોકે સૂતાદ્યાપિ વરીમભિઃ ।
કર્મભિઃ કથમાત્માનં ગાપયિષ્યામ બાલવત્ ॥ ૨૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પૃથુચરિતે પઞ્ચદશોઽધ્યાયઃ ॥ ૧૫॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ષોડશોઽધ્યાયઃ - ૧૬ ॥

મૈત્રેય ઉવાચ
ઇતિ બ્રુવાણં નૃપતિં ગાયકા મુનિચોદિતાઃ ।
તુષ્ટુવુસ્તુષ્ટમનસસ્તદ્વાગમૃતસેવયા ॥ ૧॥

નાલં વયં તે મહિમાનુવર્ણને
યો દેવવર્યોઽવતતાર માયયા ।
વેનાઙ્ગજાતસ્ય ચ પૌરુષાણિ તે
વાચસ્પતીનામપિ બભ્રમુર્ધિયઃ ॥ ૨॥

અથાપ્યુદારશ્રવસઃ પૃથોર્હરેઃ
કલાવતારસ્ય કથામૃતાદૃતાઃ ।
યથોપદેશં મુનિભિઃ પ્રચોદિતાઃ
શ્લાઘ્યાનિ કર્માણિ વયં વિતન્મહિ ॥ ૩॥

એષ ધર્મભૃતાં શ્રેષ્ઠો લોકં ધર્મેઽનુવર્તયન્ ।
ગોપ્તા ચ ધર્મસેતૂનાં શાસ્તા તત્પરિપન્થિનામ્ ॥ ૪॥

એષ વૈ લોકપાલાનાં બિભર્ત્યેકસ્તનૌ તનૂઃ ।
કાલે કાલે યથા ભાગં લોકયોરુભયોર્હિતમ્ ॥ ૫॥

વસુ કાલ ઉપાદત્તે કાલે ચાયં વિમુઞ્ચતિ ।
સમઃ સર્વેષુ ભૂતેષુ પ્રતપન્ સૂર્યવદ્વિભુઃ ॥ ૬॥

તિતિક્ષત્યક્રમં વૈન્ય ઉપર્યાક્રમતામપિ ।
ભૂતાનાં કરુણઃ શશ્વદાર્તાનાં ક્ષિતિવૃત્તિમાન્ ॥ ૭॥

દેવેઽવર્ષત્યસૌ દેવો નરદેવવપુર્હરિઃ ।
કૃચ્છ્રપ્રાણાઃ પ્રજા હ્યેષ રક્ષિષ્યત્યઞ્જસેન્દ્રવત્ ॥ ૮॥

આપ્યાયયત્યસૌ લોકં વદનામૃતમૂર્તિના ।
સાનુરાગાવલોકેન વિશદસ્મિતચારુણા ॥ ૯॥

અવ્યક્તવર્ત્મૈષ નિગૂઢકાર્યો
ગમ્ભીરવેધા ઉપગુપ્તવિત્તઃ ।

અનન્તમાહાત્મ્યગુણૈકધામા
પૃથુઃ પ્રચેતા ઇવ સંવૃતાત્મા ॥ ૧૦॥

દુરાસદો દુર્વિષહ આસન્નોઽપિ વિદૂરવત્ ।
નૈવાભિભવિતું શક્યો વેનારણ્યુત્થિતોઽનલઃ ॥ ૧૧॥

અન્તર્બહિશ્ચ ભૂતાનાં પશ્યન્ કર્માણિ ચારણૈઃ ।
ઉદાસીન ઇવાધ્યક્ષો વાયુરાત્મેવ દેહિનામ્ ॥ ૧૨॥

નાદણ્ડ્યં દણ્ડયત્યેષ સુતમાત્મદ્વિષામપિ ।
દણ્ડયત્યાત્મજમપિ દણ્ડ્યં ધર્મપથે સ્થિતઃ ॥ ૧૩॥

અસ્યાપ્રતિહતં ચક્રં પૃથોરામાનસાચલાત્ ।
વર્તતે ભગવાનર્કો યાવત્તપતિ ગોગણૈઃ ॥ ૧૪॥

રઞ્જયિષ્યતિ યલ્લોકમયમાત્મવિચેષ્ટિતૈઃ ।
અથામુમાહૂ રાજાનં મનોરઞ્જનકૈઃ પ્રજાઃ ॥ ૧૫॥

દૃઢવ્રતઃ સત્યસન્ધો બ્રહ્મણ્યો વૃદ્ધસેવકઃ ।
શરણ્યઃ સર્વભૂતાનાં માનદો દીનવત્સલઃ ॥ ૧૬॥

માતૃભક્તિઃ પરસ્ત્રીષુ પત્ન્યામર્ધ ઇવાત્મનઃ ।
પ્રજાસુ પિતૃવત્સ્નિગ્ધઃ કિઙ્કરો બ્રહ્મવાદિનામ્ ॥ ૧૭॥

દેહિનામાત્મવત્પ્રેષ્ઠઃ સુહૃદાં નન્દિવર્ધનઃ ।
મુક્તસઙ્ગપ્રસઙ્ગોઽયં દણ્ડપાણિરસાધુષુ ॥ ૧૮॥

અયં તુ સાક્ષાદ્ભગવાંસ્ત્ર્યધીશઃ
કૂટસ્થ આત્મા કલયાવતીર્ણઃ ।
યસ્મિન્નવિદ્યારચિતં નિરર્થકં
પશ્યન્તિ નાનાત્વમપિ પ્રતીતમ્ ॥ ૧૯॥

અયં ભુવો મણ્ડલમોદયાદ્રે-
ર્ગોપ્તૈકવીરો નરદેવનાથઃ ।
આસ્થાય જૈત્રં રથમાત્તચાપઃ
પર્યસ્યતે દક્ષિણતો યથાર્કઃ ॥ ૨૦॥

અસ્મૈ નૃપાલાઃ કિલ તત્ર તત્ર
બલિં હરિષ્યન્તિ સલોકપાલાઃ ।

મંસ્યન્ત એષાં સ્ત્રિય આદિરાજં
ચક્રાયુધં તદ્યશ ઉદ્ધરન્ત્યઃ ॥ ૨૧॥

અયં મહીં ગાં દુદુહેઽધિરાજઃ
પ્રજાપતિર્વૃત્તિકરઃ પ્રજાનામ્ ।
યો લીલયાદ્રીન્ સ્વશરાસકોટ્યા
ભિન્દન્ સમાં ગામકરોદ્યથેન્દ્રઃ ॥ ૨૨॥

વિસ્ફૂર્જયન્નાજગવં ધનુઃ સ્વયં
યદાચરત્ક્ષ્મામવિષહ્યમાજૌ ।
તદા નિલિલ્યુર્દિશિ દિશ્યસન્તો
લાઙ્ગૂલમુદ્યમ્ય યથા મૃગેન્દ્રઃ ॥ ૨૩॥

એષોઽશ્વમેધાઞ્શતમાજહાર
સરસ્વતી પ્રાદુરભાવિ યત્ર ।
અહાર્ષીદ્યસ્ય હયં પુરન્દરઃ
શતક્રતુશ્ચરમે વર્તમાને ॥ ૨૪॥

એષ સ્વસદ્મોપવને સમેત્ય
સનત્કુમારં ભગવન્તમેકમ્ ।
આરાધ્ય ભક્ત્યાલભતામલં તત્
જ્ઞાનં યતો બ્રહ્મ પરં વિદન્તિ ॥ ૨૫॥

તત્ર તત્ર ગિરસ્તાસ્તા ઇતિ વિશ્રુતવિક્રમઃ ।
શ્રોષ્યત્યાત્માશ્રિતા ગાથાઃ પૃથુઃ પૃથુપરાક્રમઃ ॥ ૨૬॥

દિશો વિજિત્યાપ્રતિરુદ્ધચક્રઃ
સ્વતેજસોત્પાટિતલોકશલ્યઃ ।
સુરાસુરેન્દ્રૈરુપગીયમાન-
મહાનુભાવો ભવિતા પતિર્ભુવઃ ॥ ૨૭॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ચતુર્થસ્કન્ધે ષોડશોઽધ્યાયઃ ॥ ૧૬॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ સપ્તદશોઽધ્યાયઃ - ૧૭ ॥

મૈત્રેય ઉવાચ
એવં સ ભગવાન્ વૈન્યઃ ખ્યાપિતો ગુણકર્મભિઃ ।
છન્દયામાસ તાન્ કામૈઃ પ્રતિપૂજ્યાભિનન્દ્ય ચ ॥ ૧॥

બ્રાહ્મણપ્રમુખાન્ વર્ણાન્ ભૃત્યામાત્યપુરોધસઃ ।
પૌરાન્ જાનપદાન્ શ્રેણીઃ પ્રકૃતીઃ સમપૂજયત્ ॥ ૨॥

વિદુર ઉવાચ
કસ્માદ્દધાર ગોરૂપં ધરિત્રી બહુરૂપિણી ।
યાં દુદોહ પૃથુસ્તત્ર કો વત્સો દોહનં ચ કિમ્ ॥ ૩॥

પ્રકૃત્યા વિષમા દેવી કૃતા તેન સમા કથમ્ ।
તસ્ય મેધ્યં હયં દેવઃ કસ્ય હેતોરપાહરત્ ॥ ૪॥

સનત્કુમારાદ્ભગવતો બ્રહ્મન્ બ્રહ્મવિદુત્તમાત્ ।
લબ્ધ્વા જ્ઞાનં સવિજ્ઞાનં રાજર્ષિઃ કાં ગતિં ગતઃ ॥ ૫॥

યચ્ચાન્યદપિ કૃષ્ણસ્ય ભવાન્ ભગવતઃ પ્રભોઃ ।
શ્રવઃ સુશ્રવસઃ પુણ્યં પૂર્વદેહકથાશ્રયમ્ ॥ ૬॥

ભક્તાય મેઽનુરક્તાય તવ ચાધોક્ષજસ્ય ચ ।
વક્તુમર્હસિ યોઽદુહ્યદ્વૈન્યરૂપેણ ગામિમામ્ ॥ ૭॥

સૂત ઉવાચ
ચોદિતો વિદુરેણૈવં વાસુદેવકથાં પ્રતિ ।
પ્રશસ્ય તં પ્રીતમના મૈત્રેયઃ પ્રત્યભાષત ॥ ૮॥

મૈત્રેય ઉવાચ
યદાભિષિક્તઃ પૃથુરઙ્ગ વિપ્રૈ-
રામન્ત્રિતો જનતાયાશ્ચ પાલઃ ।
પ્રજા નિરન્ને ક્ષિતિપૃષ્ઠ એત્ય
ક્ષુત્ક્ષામદેહાઃ પતિમભ્યવોચન્ ॥ ૯॥

વયં રાજઞ્જાઠરેણાભિતપ્તા

યથાગ્નિના કોટરસ્થેન વૃક્ષાઃ ।
ત્વામદ્ય યાતાઃ શરણં શરણ્યં
યઃ સાધિતો વૃત્તિકરઃ પતિર્નઃ ॥ ૧૦॥

તન્નો ભવાનીહતુ રાતવેઽન્નં
ક્ષુધાર્દિતાનાં નરદેવદેવ ।
યાવન્ન નઙ્‌ક્ષ્યામહ ઉજ્ઝિતોર્જા
વાર્તાપતિસ્ત્વં કિલ લોકપાલઃ ॥ ૧૧॥

મૈત્રેય ઉવાચ
પૃથુઃ પ્રજાનાં કરુણં નિશમ્ય પરિદેવિતમ્ ।
દીર્ઘં દધ્યૌ કુરુશ્રેષ્ઠ નિમિત્તં સોઽન્વપદ્યત ॥ ૧૨॥

ઇતિ વ્યવસિતો બુદ્ધ્યા પ્રગૃહીતશરાસનઃ ।
સન્દધે વિશિખં ભૂમેઃ ક્રુદ્ધસ્ત્રિપુરહા યથા ॥ ૧૩॥

પ્રવેપમાના ધરણી નિશામ્યોદાયુધં ચ તમ્ ।
ગૌઃ સત્યપાદ્રવદ્ભીતા મૃગીવ મૃગયુદ્રુતા ॥ ૧૪॥

તામન્વધાવત્તદ્વૈન્યઃ કુપિતોઽત્યરુણેક્ષણઃ ।
શરં ધનુષિ સન્ધાય યત્ર યત્ર પલાયતે ॥ ૧૫॥

સા દિશો વિદિશો દેવી રોદસી ચાન્તરં તયોઃ ।
ધાવન્તી તત્ર તત્રૈનં દદર્શાનૂદ્યતાયુધમ્ ॥ ૧૬॥

લોકે નાવિન્દત ત્રાણં વૈન્યાન્મૃત્યોરિવ પ્રજાઃ ।
ત્રસ્તા તદા નિવવૃતે હૃદયેન વિદૂયતા ॥ ૧૭॥

ઉવાચ ચ મહાભાગં ધર્મજ્ઞાઽઽપન્નવત્સલ ।
ત્રાહિ મામપિ ભૂતાનાં પાલનેઽવસ્થિતો ભવાન્ ॥ ૧૮॥

સ ત્વં જિઘાંસસે કસ્માદ્દીનામકૃતકિલ્બિષામ્ ।
અહનિષ્યત્કથં યોષાં ધર્મજ્ઞ ઇતિ યો મતઃ ॥ ૧૯॥

પ્રહરન્તિ ન વૈ સ્ત્રીષુ કૃતાગઃસ્વપિ જન્તવઃ ।
કિમુત ત્વદ્વિધા રાજન્ કરુણા દીનવત્સલાઃ ॥ ૨૦॥

માં વિપાટ્યાજરાં નાવં યત્ર વિશ્વં પ્રતિષ્ઠિતમ્ ।
આત્માનં ચ પ્રજાશ્ચેમાઃ કથમમ્ભસિ ધાસ્યસિ ॥ ૨૧॥

પૃથુરુવાચ
વસુધે ત્વાં વધિષ્યામિ મચ્છાસનપરાઙ્મુખીમ્ ।
ભાગં બર્હિષિ યા વૃઙ્ક્તે ન તનોતિ ચ નો વસુ ॥ ૨૨॥

યવસં જગ્ધ્યનુદિનં નૈવ દોગ્ધ્યૌધસં પયઃ ।
તસ્યામેવં હિ દુષ્ટાયાં દણ્ડો નાત્ર ન શસ્યતે ॥ ૨૩॥

ત્વં ખલ્વોષધિબીજાનિ પ્રાક્સૃષ્ટાનિ સ્વયમ્ભુવા ।
ન મુઞ્ચસ્યાત્મરુદ્ધાનિ મામવજ્ઞાય મન્દધીઃ ॥ ૨૪॥

અમૂષાં ક્ષુત્પરીતાનામાર્તાનાં પરિદેવિતમ્ ।
શમયિષ્યામિ મદ્બાણૈર્ભિન્નાયાસ્તવ મેદસા ॥ ૨૫॥

પુમાન્ યોષિદુત ક્લીબ આત્મસમ્ભાવનોઽધમઃ ।
ભૂતેષુ નિરનુક્રોશો નૃપાણાં તદ્વધોઽવધઃ ॥ ૨૬॥

ત્વાં સ્તબ્ધાં દુર્મદાં નીત્વા માયાગાં તિલશઃ શરૈઃ ।
આત્મયોગબલેનેમા ધારયિષ્યામ્યહં પ્રજાઃ ॥ ૨૭॥

એવં મન્યુમયીં મૂર્તિં કૃતાન્તમિવ બિભ્રતમ્ ।
પ્રણતા પ્રાઞ્જલિઃ પ્રાહ મહી સઞ્જાતવેપથુઃ ॥ ૨૮॥

ધરોવાચ
નમઃ પરસ્મૈ પુરુષાય માયયા
વિન્યસ્તનાનાતનવે ગુણાત્મને ।
નમઃ સ્વરૂપાનુભવેન નિર્ધુત-
દ્રવ્યક્રિયાકારકવિભ્રમોર્મયે ॥ ૨૯॥

યેનાહમાત્માઽઽયતનં વિનિર્મિતા
ધાત્રા યતોઽયં ગુણસર્ગસઙ્ગ્રહઃ ।
સ એવ માં હન્તુમુદાયુધઃ સ્વરા-
ડુપસ્થિતોઽન્યં શરણં કમાશ્રયે ॥ ૩૦॥

ય એતદાદાવસૃજચ્ચરાચરં
સ્વમાયયાઽઽત્માશ્રયયાવિતર્ક્યયા ।
તયૈવ સોઽયં કિલ ગોપ્તુમુદ્યતઃ
કથં નુ માં ધર્મપરો જિઘાંસતિ ॥ ૩૧॥

નૂનં બતેશસ્ય સમીહિતં જનૈ-

સ્તન્માયયા દુર્જયયાકૃતાત્મભિઃ ।
ન લક્ષ્યતે યસ્ત્વકરોદકારય-
દ્યોઽનેક એકઃ પરતશ્ચ ઈશ્વરઃ ॥ ૩૨॥

સર્ગાદિ યોઽસ્યાનુરુણદ્ધિ શક્તિભિ-
ર્દ્રવ્યક્રિયાકારકચેતનાત્મભિઃ ।
તસ્મૈ સમુન્નદ્ધનિરુદ્ધશક્તયે
નમઃ પરસ્મૈ પુરુષાય વેધસે ॥ ૩૩॥

સ વૈ ભવાનાત્મવિનિર્મિતં જગ-
દ્ભૂતેન્દ્રિયાન્તઃકરણાત્મકં વિભો ।
સંસ્થાપયિષ્યન્નજ માં રસાતલા-
દભ્યુજ્જહારામ્ભસ આદિસૂકરઃ ॥ ૩૪॥

અપામુપસ્થે મયિ નાવ્યવસ્થિતાઃ
પ્રજા ભવાનદ્ય રિરક્ષિષુઃ કિલ ।
સ વીરમૂર્તિઃ સમભૂદ્ધરાધરો
યો માં પયસ્યુગ્રશરો જિઘાંસસિ ॥ ૩૫॥

નૂનં જનૈરીહિતમીશ્વરાણા-
મસ્મદ્વિધૈસ્તદ્ગુણસર્ગમાયયા ।
ન જ્ઞાયતે મોહિતચિત્તવર્ત્મભિ-
સ્તેભ્યો નમો વીરયશસ્કરેભ્યઃ ॥ ૩૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે ધરિત્રીનિગ્રહો નામ સપ્તદશોઽધ્યાયઃ ॥ ૧૭॥

॥ ॐ નમો ભગવતે વાસુદેવાય ॥

॥ અષ્ટાદશોઽધ્યાયઃ - ૧૮॥

મૈત્રેય ઉવાચ
ઇત્થં પૃથુમભિષ્ટૂય રુષા પ્રસ્ફુરિતાધરમ્ ।
પુનરાહાવનિર્ભીતા સંસ્તભ્યાત્માનમાત્મના ॥ ૧॥

સન્નિયચ્છાભિભો મન્યું નિબોધ શ્રાવિતં ચ મે ।
સર્વતઃ સારમાદત્તે યથા મધુકરો બુધઃ ॥ ૨॥

અસ્મિન્ લોકેઽથવામુષ્મિન્ મુનિભિસ્તત્ત્વદર્શિભિઃ ।
દૃષ્ટા યોગાઃ પ્રયુક્તાશ્ચ પુંસાં શ્રેયઃપ્રસિદ્ધયે ॥ ૩॥

તાનાતિષ્ઠતિ યઃ સમ્યગુપાયાન્ પૂર્વદર્શિતાન્ ।
અવરઃ શ્રદ્ધયોપેત ઉપેયાન્ વિન્દતેઽઞ્જસા ॥ ૪॥

તાનનાદૃત્ય યોઽવિદ્વાનર્થાનારભતે સ્વયમ્ ।
તસ્ય વ્યભિચરન્ત્યર્થા આરબ્ધાશ્ચ પુનઃ પુનઃ ॥ ૫॥

પુરા સૃષ્ટા હ્યોષધયો બ્રહ્મણા યા વિશામ્પતે ।
ભુજ્યમાના મયા દૃષ્ટા અસદ્ભિરધૃતવ્રતૈઃ ॥ ૬॥

અપાલિતાનાદૃતા ચ ભવદ્ભિર્લોકપાલકૈઃ ।
ચોરીભૂતેઽથ લોકેઽહં યજ્ઞાર્થેઽગ્રસમોષધીઃ ॥ ૭॥

નૂનં તા વીરુધઃ ક્ષીણા મયિ કાલેન ભૂયસા ।
તત્ર યોગેન દૃષ્ટેન ભવાનાદાતુમર્હતિ ॥ ૮॥

વત્સં કલ્પય મે વીર યેનાહં વત્સલા તવ ।
ધોક્ષ્યે ક્ષીરમયાન્ કામાનનુરૂપં ચ દોહનમ્ ॥ ૯॥

દોગ્ધારં ચ મહાબાહો ભૂતાનાં ભૂતભાવન ।
અન્નમીપ્સિતમૂર્જસ્વદ્ભગવાન્ વાઞ્છતે યદિ ॥ ૧૦॥

સમાં ચ કુરુ માં રાજન્ દેવવૃષ્ટં યથા પયઃ ।
અપર્તાવપિ ભદ્રં તે ઉપાવર્તેત મે વિભો ॥ ૧૧॥

ઇતિ પ્રિયં હિતં વાક્યં ભુવ આદાય ભૂપતિઃ ।
વત્સં કૃત્વા મનું પાણાવદુહત્સકલૌષધીઃ ॥ ૧૨॥

તથાપરે ચ સર્વત્ર સારમાદદતે બુધાઃ ।
તતોઽન્યે ચ યથાકામં દુદુહુઃ પૃથુભાવિતામ્ ॥ ૧૩॥

ઋષયો દુદુહુર્દેવીમિન્દ્રિયેષ્વથ સત્તમ ।
વત્સં બૃહસ્પતિં કૃત્વા પયશ્છન્દોમયં શુચિ ॥ ૧૪॥

કૃત્વા વત્સં સુરગણા ઇન્દ્રં સોમમદૂદુહન્ ।

હિરણ્મયેન પાત્રેણ વીર્યમોજો બલં પયઃ ॥ ૧૫॥

દૈતેયા દાનવા વત્સં પ્રહ્લાદમસુરર્ષભમ્ ।
વિધાયાદૂદુહન્ ક્ષીરમયઃપાત્રે સુરાસવમ્ ॥ ૧૬॥

ગન્ધર્વાપ્સરસોઽધુક્ષન્ પાત્રે પદ્મમયે પયઃ ।
વત્સં વિશ્વાવસું કૃત્વા ગાન્ધર્વં મધુ સૌભગમ્ ॥ ૧૭॥

વત્સેન પિતરોઽર્યમ્ણા કવ્યં ક્ષીરમધુક્ષત ।
આમપાત્રે મહાભાગાઃ શ્રદ્ધયા શ્રાદ્ધદેવતાઃ ॥ ૧૮॥

પ્રકલ્પ્ય વત્સં કપિલં સિદ્ધાઃ સઙ્કલ્પનામયીમ્ ।
સિદ્ધિં નભસિ વિદ્યાં ચ યે ચ વિદ્યાધરાદયઃ ॥ ૧૯॥

અન્યે ચ માયિનો માયામન્તર્ધાનાદ્ભુતાત્મનામ્ ।
મયં પ્રકલ્પ્ય વત્સં તે દુદુહુર્ધારણામયીમ્ ॥ ૨૦॥

યક્ષરક્ષાંસિ ભૂતાનિ પિશાચાઃ પિશિતાશનાઃ ।
ભૂતેશવત્સા દુદુહુઃ કપાલે ક્ષતજાસવમ્ ॥ ૨૧॥

તથાહયો દન્દશૂકાઃ સર્પા નાગાશ્ચ તક્ષકમ્ ।
વિધાય વત્સં દુદુહુર્બિલપાત્રે વિષં પયઃ ॥ ૨૨॥

પશવો યવસં ક્ષીરં વત્સં કૃત્વા ચ ગોવૃષમ્ ।
અરણ્યપાત્રે ચાધુક્ષન્ મૃગેન્દ્રેણ ચ દંષ્ટ્રિણઃ ॥ ૨૩॥

ક્રવ્યાદાઃ પ્રાણિનઃ ક્રવ્યં દુદુહુઃ સ્વે કલેવરે ।
સુપર્ણવત્સા વિહગાશ્ચરં ચાચરમેવ ચ ॥ ૨૪॥

વટવત્સા વનસ્પતયઃ પૃથગ્રસમયં પયઃ ।
ગિરયો હિમવદ્વત્સા નાનાધાતૂન્ સ્વસાનુષુ ॥ ૨૫॥

સર્વે સ્વમુખ્યવત્સેન સ્વે સ્વે પાત્રે પૃથક્પયઃ ।
સર્વકામદુઘાં પૃથ્વીં દુદુહુઃ પૃથુભાવિતામ્ ॥ ૨૬॥

એવં પૃથ્વાદયઃ પૃથ્વીમન્નાદાઃ સ્વન્નમાત્મનઃ ।
દોહવત્સાદિ ભેદેન ક્ષીરભેદં કુરૂદ્વહ ॥ ૨૭॥

તતો મહીપતિઃ પ્રીતઃ સર્વકામદુઘાં પૃથુઃ ।
દુહિતૃત્વે ચકારેમાં પ્રેમ્ણા દુહિતૃવત્સલઃ ॥ ૨૮॥

ચૂર્ણયન્ સ્વધનુષ્કોટ્યા ગિરિકૂટાનિ રાજરાટ્ ।
ભૂમણ્ડલમિદં વૈન્યઃ પ્રાયશ્ચક્રે સમં વિભુઃ ॥ ૨૯॥

અથાસ્મિન્ ભગવાન્ વૈન્યઃ પ્રજાનાં વૃત્તિદઃ પિતા ।
નિવાસાન્ કલ્પયાઞ્ચક્રે તત્ર તત્ર યથાર્હતઃ ॥ ૩૦॥

ગ્રામાન્ પુરઃ પત્તનાનિ દુર્ગાણિ વિવિધાનિ ચ ।
ઘોષાન્ વ્રજાન્ સશિબિરાનાકરાન્ ખેટખર્વટાન્ ॥ ૩૧॥

પ્રાક્પૃથોરિહ નૈવૈષા પુરગ્રામાદિ કલ્પના ।
યથાસુખં વસન્તિ સ્મ તત્ર તત્રાકુતોભયાઃ ॥ ૩૨॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પૃથુવિજયે અષ્ટાદશોઽધ્યાયઃ ॥ ૧૮॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ એકોનવિંશોઽધ્યાયઃ - ૧૯॥

મૈત્રેય ઉવાચ
અથાદીક્ષત રાજા તુ હયમેધશતેન સઃ ।
બ્રહ્માવર્તે મનોઃ ક્ષેત્રે યત્ર પ્રાચી સરસ્વતી ॥ ૧॥

તદભિપ્રેત્ય ભગવાન્ કર્માતિશયમાત્મનઃ ।
શતક્રતુર્ન મમૃષે પૃથોર્યજ્ઞમહોત્સવમ્ ॥ ૨॥

યત્ર યજ્ઞપતિઃ સાક્ષાદ્ભગવાન્ હરિરીશ્વરઃ ।
અન્વભૂયત સર્વાત્મા સર્વલોકગુરુઃ પ્રભુઃ ॥ ૩॥

અન્વિતો બ્રહ્મશર્વાભ્યાં લોકપાલૈઃ સહાનુગૈઃ ।
ઉપગીયમાનો ગન્ધર્વૈર્મુનિભિશ્ચાપ્સરોગણૈઃ ॥ ૪॥

સિદ્ધા વિદ્યાધરા દૈત્યા દાનવા ગુહ્યકાદયઃ ।
સુનન્દનન્દપ્રમુખાઃ પાર્ષદપ્રવરા હરેઃ ॥ ૫॥

કપિલો નારદો દત્તો યોગેશાઃ સનકાદયઃ ।
તમન્વીયુર્ભાગવતા યે ચ તત્સેવનોત્સુકાઃ ॥ ૬॥

યત્ર ધર્મદુઘા ભૂમિઃ સર્વકામદુઘા સતી ।
દોગ્ધિ સ્માભીપ્સિતાનર્થાન્ યજમાનસ્ય ભારત ॥ ૭॥

ઊહુઃ સર્વરસાન્ નદ્યઃ ક્ષીરદધ્યન્નગોરસાન્ ।
તરવો ભૂરિ વર્ષ્માણઃ પ્રાસૂયન્ત મધુચ્યુતઃ ॥ ૮॥

સિન્ધવો રત્નનિકરાન્ ગિરયોઽન્નં ચતુર્વિધમ્ ।
ઉપાયનમુપાજહ્રુઃ સર્વે લોકાઃ સપાલકાઃ ॥ ૯॥

ઇતિ ચાધોક્ષજેશસ્ય પૃથોસ્તુ પરમોદયમ્ ।
અસૂયન્ ભગવાનિન્દ્રઃ પ્રતિઘાતમચીકરત્ ॥ ૧૦॥

ચરમેણાશ્વમેધેન યજમાને યજુષ્પતિમ્ ।
વૈન્યે યજ્ઞપશું સ્પર્ધન્નપોવાહ તિરોહિતઃ ॥ ૧૧॥

તમત્રિર્ભગવાનૈક્ષત્ત્વરમાણં વિહાયસા ।
આમુક્તમિવ પાખણ્ડં યોઽધર્મે ધર્મવિભ્રમઃ ॥ ૧૨॥

અત્રિણા ચોદિતો હન્તું પૃથુપુત્રો મહારથઃ ।
અન્વધાવત સઙ્ક્રુદ્ધસ્તિષ્ઠ તિષ્ઠેતિ ચાબ્રવીત્ ॥ ૧૩॥

તં તાદૃશાકૃતિં વીક્ષ્ય મેને ધર્મં શરીરિણમ્ ।
જટિલં ભસ્મનાઽઽચ્છન્નં તસ્મૈ બાણં ન મુઞ્ચતિ ॥ ૧૪॥

વધાન્નિવૃત્તં તં ભૂયો હન્તવેઽત્રિરચોદયત્ ।
જહિ યજ્ઞહનં તાત મહેન્દ્રં વિબુધાધમમ્ ॥ ૧૫॥

એવં વૈન્યસુતઃ પ્રોક્તસ્ત્વરમાણં વિહાયસા ।
અન્વદ્રવદભિક્રુદ્ધો રાવણં ગૃધ્રરાડિવ ॥ ૧૬॥

સોઽશ્વં રૂપં ચ તદ્ધિત્વા તસ્મા અન્તર્હિતઃ સ્વરાટ્ ।
વીરઃ સ્વપશુમાદાય પિતુર્યજ્ઞમુપેયિવાન્ ॥ ૧૭॥

તત્તસ્ય ચાદ્ભુતં કર્મ વિચક્ષ્ય પરમર્ષયઃ ।
નામધેયં દદુસ્તસ્મૈ વિજિતાશ્વ ઇતિ પ્રભો ॥ ૧૮॥

ઉપસૃજ્ય તમસ્તીવ્રં જહારાશ્વં પુનર્હરિઃ ।
ચષાલ યૂપતશ્છન્નો હિરણ્યરશનં વિભુઃ ॥ ૧૯॥

અત્રિઃ સન્દર્શયામાસ ત્વરમાણં વિહાયસા ।

કપાલખટ્વાઙ્ગધરં વીરો નૈનમબાધત ॥ ૨૦॥

અત્રિણા ચોદિતસ્તસ્મૈ સન્દધે વિશિખં રુષા ।
સોઽશ્વં રૂપં ચ તદ્ધિત્વા તસ્થાવન્તર્હિતઃ સ્વરાટ્ ॥ ૨૧॥

વીરશ્ચાશ્વમુપાદાય પિતૃયજ્ઞમથાવ્રજત્ ।
તદવદ્યં હરે રૂપં જગૃહુર્જ્ઞાનદુર્બલાઃ ॥ ૨૨॥

યાનિ રૂપાણિ જગૃહે ઇન્દ્રો હયજિહીર્ષયા ।
તાનિ પાપસ્ય ખણ્ડાનિ લિઙ્ગં ખણ્ડમિહોચ્યતે ॥ ૨૩॥

એવમિન્દ્રે હરત્યશ્વં વૈન્યયજ્ઞજિઘાંસયા ।
તદ્ગૃહીતવિસૃષ્ટેષુ પાખણ્ડેષુ મતિર્નૃણામ્ ॥ ૨૪॥

ધર્મ ઇત્યુપધર્મેષુ નગ્નરક્તપટાદિષુ ।
પ્રાયેણ સજ્જતે ભ્રાન્ત્યા પેશલેષુ ચ વાગ્મિષુ ॥ ૨૫॥

તદભિજ્ઞાય ભગવાન્ પૃથુઃ પૃથુપરાક્રમઃ ।
ઇન્દ્રાય કુપિતો બાણમાદત્તોદ્યતકાર્મુકઃ ॥ ૨૬॥

તમૃત્વિજઃ શક્રવધાભિસન્ધિતં
વિચક્ષ્ય દુષ્પ્રેક્ષ્યમસહ્યરંહસમ્ ।
નિવારયામાસુરહો મહામતે
ન યુજ્યતેઽત્રાન્યવધઃ પ્રચોદિતાત્ ॥ ૨૭॥

વયં મરુત્વન્તમિહાર્થનાશનં
હ્વયામહે ત્વચ્છ્રવસા હતત્વિષમ્ ।
અયાતયામોપહવૈરનન્તરં
પ્રસહ્ય રાજન્ જુહવામ તેઽહિતમ્ ॥ ૨૮॥

ઇત્યામન્ત્ર્ય ક્રતુપતિં વિદુરાસ્યર્ત્વિજો રુષા ।
સ્રુગ્ઘસ્તાન્ જુહ્વતોઽભ્યેત્ય સ્વયમ્ભૂઃ પ્રત્યષેધત ॥ ૨૯॥

ન વધ્યો ભવતામિન્દ્રો યદ્યજ્ઞો ભગવત્તનુઃ ।
યં જિઘાંસથ યજ્ઞેન યસ્યેષ્ટાસ્તનવઃ સુરાઃ ॥ ૩૦॥

તદિદં પશ્યત મહદ્ધર્મવ્યતિકરં દ્વિજાઃ ।
ઇન્દ્રેણાનુષ્ઠિતં રાજ્ઞઃ કર્મૈતદ્વિજિઘાંસતા ॥ ૩૧॥

પૃથુકીર્તેઃ પૃથોર્ભૂયાત્તર્હ્યેકોનશતક્રતુઃ ।

અલં તે ક્રતુભિઃ સ્વિષ્ટૈર્યદ્ભવાન્ મોક્ષધર્મવિત્ ॥ ૩૨॥

નૈવાત્મને મહેન્દ્રાય રોષમાહર્તુમર્હસિ ।
ઉભાવપિ હિ ભદ્રં તે ઉત્તમશ્લોકવિગ્રહૌ ॥ ૩૩॥

માસ્મિન્ મહારાજ કૃથાઃ સ્મ ચિન્તાં
નિશામયાસ્મદ્વચ આદૃતાત્મા ।
યદ્ધ્યાયતો દૈવહતં નુ કર્તું
મનોઽતિરુષ્ટં વિશતે તમોઽન્ધમ્ ॥ ૩૪॥

ક્રતુર્વિરમતામેષ દેવેષુ દુરવગ્રહઃ ।
ધર્મવ્યતિકરો યત્ર પાખણ્ડૈરિન્દ્રનિર્મિતૈઃ ॥ ૩૫॥

એભિરિન્દ્રોપસંસૃષ્ટૈઃ પાખણ્ડૈર્હારિભિર્જનમ્ ।
હ્રિયમાણં વિચક્ષ્વૈનં યસ્તે યજ્ઞધ્રુગશ્વમુટ્ ॥ ૩૬॥

ભવાન્ પરિત્રાતુમિહાવતીર્ણો
ધર્મં જનાનાં સમયાનુરૂપમ્ ।
વેનાપચારાદવલુપ્તમદ્ય
તદ્દેહતો વિષ્ણુકલાસિ વૈન્ય ॥ ૩૭॥

સ ત્વં વિમૃશ્યાસ્ય ભવં પ્રજાપતે
સઙ્કલ્પનં વિશ્વસૃજાં પિપીપૃહિ ।
ઐન્દ્રીં ચ માયામુપધર્મમાતરં
પ્રચણ્ડપાખણ્ડપથં પ્રભો જહિ ॥ ૩૮॥

મૈત્રેય ઉવાચ
ઇત્થં સ લોકગુરુણા સમાદિષ્ટો વિશામ્પતિઃ ।
તથા ચ કૃત્વા વાત્સલ્યં મઘોનાપિ ચ સન્દધે ॥ ૩૯॥

કૃતાવભૃથસ્નાનાય પૃથવે ભૂરિકર્મણે ।
વરાન્ દદુસ્તે વરદા યે તદ્બર્હિષિ તર્પિતાઃ ॥ ૪૦॥

વિપ્રાઃ સત્યાશિષસ્તુષ્ટાઃ શ્રદ્ધયા લબ્ધદક્ષિણાઃ ।
આશિષો યુયુજુઃ ક્ષત્તરાદિરાજાય સત્કૃતાઃ ॥ ૪૧॥

ત્વયાઽઽહૂતા મહાબાહો સર્વ એવ સમાગતાઃ ।
પૂજિતા દાનમાનાભ્યાં પિતૃદેવર્ષિમાનવાઃ ॥ ૪૨॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પૃથુવિજયે એકોનવિંશોઽધ્યાયઃ ॥ ૧૯॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ વિંશોઽધ્યાયઃ - ૨૦॥

મૈત્રેય ઉવાચ
ભગવાનપિ વૈકુણ્ઠઃ સાકં મઘવતા વિભુઃ ।
યજ્ઞૈર્યજ્ઞપતિસ્તુષ્ટો યજ્ઞભુક્ તમભાષત ॥ ૧॥

શ્રીભગવાનુવાચ
એષ તેઽકાર્ષીદ્ભઙ્ગં હયમેધશતસ્ય હ ।
ક્ષમાપયત આત્માનમમુષ્ય ક્ષન્તુમર્હસિ ॥ ૨॥

સુધિયઃ સાધવો લોકે નરદેવ નરોત્તમાઃ ।
નાભિદ્રુહ્યન્તિ ભૂતેભ્યો યર્હિ નાત્મા કલેવરમ્ ॥ ૩॥

પુરુષા યદિ મુહ્યન્તિ ત્વાદૃશા દેવમાયયા ।
શ્રમ એવ પરં જાતો દીર્ઘયા વૃદ્ધસેવયા ॥ ૪॥

અતઃ કાયમિમં વિદ્વાનવિદ્યાકામકર્મભિઃ ।
આરબ્ધ ઇતિ નૈવાસ્મિન્ પ્રતિબુદ્ધોઽનુષજ્જતે ॥ ૫॥

અસંસક્તઃ શરીરેઽસ્મિન્નમુનોત્પાદિતે ગૃહે ।
અપત્યે દ્રવિણે વાપિ કઃ કુર્યાન્મમતાં બુધઃ ॥ ૬॥

એકઃ શુદ્ધઃ સ્વયઞ્જ્યોતિર્નિર્ગુણોઽસૌ ગુણાશ્રયઃ ।
સર્વગોઽનાવૃતઃ સાક્ષી નિરાત્માઽઽત્માઽઽત્મનઃપરઃ ॥ ૭॥

ય એવં સન્તમાત્માનમાત્મસ્થં વેદ પૂરુષઃ ।
નાજ્યતે પ્રકૃતિસ્થોઽપિ તદ્ગુણૈઃ સ મયિ સ્થિતઃ ॥ ૮॥

યઃ સ્વધર્મેણ માં નિત્યં નિરાશીઃ શ્રદ્ધયાન્વિતઃ ।
ભજતે શનકૈસ્તસ્ય મનો રાજન્ પ્રસીદતિ ॥ ૯॥

પરિત્યક્તગુણઃ સમ્યગ્દર્શનો વિશદાશયઃ ।

શાન્તિં મે સમવસ્થાનં બ્રહ્મકૈવલ્યમશ્નુતે ॥ ૧૦॥

ઉદાસીનમિવાધ્યક્ષં દ્રવ્યજ્ઞાનક્રિયાત્મનામ્ ।
કૂટસ્થમિમમાત્માનં યો વેદાપ્નોતિ શોભનમ્ ॥ ૧૧॥

ભિન્નસ્ય લિઙ્ગસ્ય ગુણપ્રવાહો
દ્રવ્યક્રિયાકારકચેતનાઽઽત્મનઃ ।
દૃષ્ટાસુ સમ્પત્સુ વિપત્સુ સૂરયો
ન વિક્રિયન્તે મયિ બદ્ધસૌહૃદાઃ ॥ ૧૨॥

સમઃ સમાનોત્તમમધ્યમાધમઃ
સુખે ચ દુઃખે ચ જિતેન્દ્રિયાશયઃ ।
મયોપક્લૃપ્તાખિલલોકસંયુતો
વિધત્સ્વ વીરાખિલલોકરક્ષણમ્ ॥ ૧૩॥

શ્રેયઃ પ્રજાપાલનમેવ રાજ્ઞો
યત્સામ્પરાયે સુકૃતાત્ષષ્ઠમંશમ્ ।
હર્તાન્યથા હૃતપુણ્યઃ પ્રજાના-
મરક્ષિતા કરહારોઽઘમત્તિ ॥ ૧૪॥

એવં દ્વિજાગ્ર્યાનુમતાનુવૃત્ત-
ધર્મપ્રધાનોઽન્યતમોઽવિતાસ્યાઃ ।
હ્રસ્વેન કાલેન ગૃહોપયાતાન્
દ્રષ્ટાસિ સિદ્ધાનનુરક્તલોકઃ ॥ ૧૫॥

વરં ચ મત્કઞ્ચન માનવેન્દ્ર
વૃણીષ્વ તેઽહં ગુણશીલયન્ત્રિતઃ ।
નાહં મખૈર્વૈ સુલભસ્તપોભિ-
ર્યોગેન વા યત્સમચિત્તવર્તી ॥ ૧૬॥

મૈત્રેય ઉવાચ
સ ઇત્થં લોકગુરુણા વિષ્વક્સેનેન વિશ્વજિત્ ।
અનુશાસિત આદેશં શિરસા જગૃહે હરેઃ ॥ ૧૭॥

સ્પૃશન્તં પાદયોઃ પ્રેમ્ણા વ્રીડિતં સ્વેન કર્મણા ।
શતક્રતું પરિષ્વજ્ય વિદ્વેષં વિસસર્જ હ ॥ ૧૮॥

ભગવાનથ વિશ્વાત્મા પૃથુનોપહૃતાર્હણઃ ।

સમુજ્જિહાનયા ભક્ત્યા ગૃહીતચરણામ્બુજઃ ॥ ૧૯॥

પ્રસ્થાનાભિમુખોઽપ્યેનમનુગ્રહવિલમ્બિતઃ ।
પશ્યન્ પદ્મપલાશાક્ષો ન પ્રતસ્થે સુહૃત્સતામ્ ॥ ૨૦॥

સ આદિરાજો રચિતાઞ્જલિર્હરિં
વિલોકિતું નાશકદશ્રુલોચનઃ ।
ન કિઞ્ચનોવાચ સ બાષ્પવિક્લવો
હૃદોપગુહ્યામુમધાદવસ્થિતઃ ॥ ૨૧॥

અથાવમૃજ્યાશ્રુકલા વિલોકય-
ન્નતૃપ્તદૃગ્ગોચરમાહ પૂરુષમ્ ।
પદા સ્પૃશન્તં ક્ષિતિમંસ ઉન્નતે
વિન્યસ્તહસ્તાગ્રમુરઙ્ગવિદ્વિષઃ ॥ ૨૨॥

પૃથુરુવાચ
વરાન્વિભો ત્વદ્વરદેશ્વરાદ્બુધઃ
કથં વૃણીતે ગુણવિક્રિયાત્મનામ્ ।
યે નારકાણામપિ સન્તિ દેહિનાં
તાનીશ કૈવલ્યપતે વૃણે ન ચ ॥ ૨૩॥

ન કામયે નાથ તદપ્યહં ક્વચિ-
ન્ન યત્ર યુષ્મચ્ચરણામ્બુજાસવઃ ।
મહત્તમાન્તર્હૃદયાન્મુખચ્યુતો
વિધત્સ્વ કર્ણાયુતમેષ મે વરઃ ॥ ૨૪॥

સ ઉત્તમશ્લોકમહન્મુખચ્યુતો
ભવત્પદામ્ભોજસુધાકણાનિલઃ ।
સ્મૃતિં પુનર્વિસ્મૃતતત્ત્વવર્ત્મનાં
કુયોગિનાં નો વિતરત્યલં વરૈઃ ॥ ૨૫॥

યશઃ શિવં સુશ્રવ આર્યસઙ્ગમે
યદૃચ્છયા ચોપશ◌ૃણોતિ તે સકૃત્ ।
કથં ગુણજ્ઞો વિરમેદ્વિના પશું
શ્રીર્યત્પ્રવવ્રે ગુણસઙ્ગ્રહેચ્છયા ॥ ૨૬॥

અથાભજે ત્વાખિલપૂરુષોત્તમં

ગુણાલયં પદ્મકરેવ લાલસઃ ।
અપ્યાવયોરેકપતિસ્પૃધોઃ કલિ-
ર્ન સ્યાત્કૃતત્વચ્ચરણૈકતાનયોઃ ॥ ૨૭॥

જગજ્જનન્યાં જગદીશ વૈશસં
સ્યાદેવ યત્કર્મણિ નઃ સમીહિતમ્ ।
કરોષિ ફલ્ગ્વપ્યુરુ દીનવત્સલઃ
સ્વ એવ ધિષ્ણ્યેઽભિરતસ્ય કિં તયા ॥ ૨૮॥

ભજન્ત્યથ ત્વામત એવ સાધવઃ
વ્યુદસ્તમાયાગુણવિભ્રમોદયમ્ ।
ભવત્પદાનુસ્મરણાદૃતે સતાં
નિમિત્તમન્યદ્ભગવન્ ન વિદ્મહે ॥ ૨૯॥

મન્યે ગિરં તે જગતાં વિમોહિનીં
વરં વૃણીષ્વેતિ ભજન્તમાત્થ યત્ ।
વાચા નુ તન્ત્યા યદિ તે જનોઽસિતઃ
કથં પુનઃ કર્મ કરોતિ મોહિતઃ ॥ ૩૦॥

ત્વન્માયયાદ્ધા જન ઈશ ખણ્ડિતો
યદન્યદાશાસ્ત ઋતાત્મનોઽબુધઃ ।
યથા ચરેદ્બાલહિતં પિતા સ્વયં
તથા ત્વમેવાર્હસિ નઃ સમીહિતુમ્ ॥ ૩૧॥

મૈત્રેય ઉવાચ
ઇત્યાદિરાજેન નુતઃ સ વિશ્વદૃક્-
તમાહ રાજન્ મયિ ભક્તિરસ્તુ તે ।
દિષ્ટ્યેદૃશી ધીર્મયિ તે કૃતા યયા
માયાં મદીયાં તરતિ સ્મ દુસ્ત્યજામ્ ॥ ૩૨॥

તત્ત્વં કુરુ મયાઽઽદિષ્ટમપ્રમત્તઃ પ્રજાપતે ।
મદાદેશકરો લોકઃ સર્વત્રાપ્નોતિ શોભનમ્ ॥ ૩૩॥

મૈત્રેય ઉવાચ
ઇતિ વૈન્યસ્ય રાજર્ષેઃ પ્રતિનન્દ્યાર્થવદ્વચઃ ।
પૂજિતોઽનુગૃહીત્વૈનં ગન્તું ચક્રેઽચ્યુતો મતિમ્ ॥ ૩૪॥

દેવર્ષિપિતૃગન્ધર્વસિદ્ધચારણપન્નગાઃ ।
કિન્નરાપ્સરસો મર્ત્યાઃ ખગા ભૂતાન્યનેકશઃ ॥ ૩૫॥

યજ્ઞેશ્વરધિયા રાજ્ઞા વાગ્વિત્તાઞ્જલિભક્તિતઃ ।
સભાજિતા યયુઃ સર્વે વૈકુણ્ઠાનુગતાસ્તતઃ ॥ ૩૬॥

ભગવાનપિ રાજર્ષેઃ સોપાધ્યાયસ્ય ચાચ્યુતઃ ।
હરન્નિવ મનોઽમુષ્ય સ્વધામ પ્રત્યપદ્યત ॥ ૩૭॥

અદૃષ્ટાય નમસ્કૃત્ય નૃપઃ સન્દર્શિતાત્મને ।
અવ્યક્તાય ચ દેવાનાં દેવાય સ્વપુરં યયૌ ॥ ૩૮॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ચતુર્થસ્કન્ધે વિંશોઽધ્યાયઃ ॥ ૨૦॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ એકવિંશોઽધ્યાયઃ - ૨૧॥

મૈત્રેય ઉવાચ
મૌક્તિકૈઃ કુસુમસ્રગ્ભિર્દુકૂલૈઃ સ્વર્ણતોરણૈઃ ।
મહાસુરભિભિર્ધૂપૈર્મણ્ડિતં તત્ર તત્ર વૈ ॥ ૧॥

ચન્દનાગુરુતોયાર્દ્રરથ્યાચત્વરમાર્ગવત્ ।
પુષ્પાક્ષતફલૈસ્તોક્મૈર્લાજૈરર્ચિર્ભિરર્ચિતમ્ ॥ ૨॥

સવૃન્દૈઃ કદલીસ્તમ્ભૈઃ પૂગપોતૈઃ પરિષ્કૃતમ્ ।
તરુપલ્લવમાલાભિઃ સર્વતઃ સમલઙ્કૃતમ્ ॥ ૩॥

પ્રજાસ્તં દીપબલિભિઃ સમ્ભૃતાશેષમઙ્ગલૈઃ ।
અભીયુર્મૃષ્ટકન્યાશ્ચ મૃષ્ટકુણ્ડલમણ્ડિતાઃ ॥ ૪॥

શઙ્ખદુન્દુભિઘોષેણ બ્રહ્મઘોષેણ ચર્ત્વિજામ્ ।
વિવેશ ભવનં વીરઃ સ્તૂયમાનો ગતસ્મયઃ ॥ ૫॥

પૂજિતઃ પૂજયામાસ તત્ર તત્ર મહાયશાઃ ।

પૌરાઞ્જાનપદાંસ્તાંસ્તાન્ પ્રીતઃ પ્રિયવરપ્રદઃ ॥ ૬॥

સ એવમાદીન્યનવદ્યચેષ્ટિતઃ
કર્માણિ ભૂયાંસિ મહાન્ મહત્તમઃ ।
કુર્વન્ શશાસાવનિમણ્ડલં યશઃ
સ્ફીતં નિધાયારુરુહે પરં પદમ્ ॥ ૭॥

સૂત ઉવાચ
તદાદિરાજસ્ય યશો વિજૃમ્ભિતં
ગુણૈરશેષૈર્ગુણવત્સભાજિતમ્ ।
ક્ષત્તા મહાભાગવતઃ સદસ્પતે
કૌષારવિં પ્રાહ ગૃણન્તમર્ચયન્ ॥ ૮॥

વિદુર ઉવાચ
સોઽભિષિક્તઃ પૃથુર્વિપ્રૈર્લબ્ધાશેષસુરાર્હણઃ ।
બિભ્રત્સ વૈષ્ણવં તેજો બાહ્વોર્યાભ્યાં દુદોહ ગામ્ ॥ ૯॥

કો ન્વસ્ય કીર્તિં ન શ◌ૃણોત્યભિજ્ઞો
યદ્વિક્રમોચ્છિષ્ટમશેષભૂપાઃ ।
લોકાઃ સપાલા ઉપજીવન્તિ કામ-
મદ્યાપિ તન્મે વદ કર્મ શુદ્ધમ્ ॥ ૧૦॥

મૈત્રેય ઉવાચ
ગઙ્ગાયમુનયોર્નદ્યોરન્તરા ક્ષેત્રમાવસન્ ।
આરબ્ધાનેવ બુભુજે ભોગાન્ પુણ્યજિહાસયા ॥ ૧૧॥

સર્વત્રાસ્ખલિતાદેશઃ સપ્તદ્વીપૈકદણ્ડધૃક્ ।
અન્યત્ર બ્રાહ્મણકુલાદન્યત્રાચ્યુતગોત્રતઃ ॥ ૧૨॥

એકદાઽઽસીન્મહાસત્રદીક્ષા તત્ર દિવૌકસામ્ ।
સમાજો બ્રહ્મર્ષીણાં ચ રાજર્ષીણાં ચ સત્તમ ॥ ૧૩॥

તસ્મિન્નર્હત્સુ સર્વેષુ સ્વર્ચિતેષુ યથાર્હતઃ ।
ઉત્થિતઃ સદસો મધ્યે તારાણામુડુરાડિવ ॥ ૧૪॥

પ્રાંશુઃ પીનાયતભુજો ગૌરઃ કઞ્જારુણેક્ષણઃ ।
સુનાસઃ સુમુખઃ સૌમ્યઃ પીનાંસઃ સુદ્વિજસ્મિતઃ ॥ ૧૫॥

વ્યૂઢવક્ષા બૃહચ્છ્રોણિર્વલિવલ્ગુદલોદરઃ ।

આવર્તનાભિરોજસ્વી કાઞ્ચનોરુરુદગ્રપાત્ ॥ ૧૬॥

સૂક્ષ્મવક્રાસિતસ્નિગ્ધમૂર્ધજઃ કમ્બુકન્ધરઃ ।
મહાધને દુકૂલાગ્ર્યે પરિધાયોપવીય ચ ॥ ૧૭॥

વ્યઞ્જિતાશેષગાત્રશ્રીર્નિયમે ન્યસ્તભૂષણઃ ।
કૃષ્ણાજિનધરઃ શ્રીમાન્ કુશપાણિઃ કૃતોચિતઃ ॥ ૧૮॥

શિશિરસ્નિગ્ધતારાક્ષઃ સમૈક્ષત સમન્તતઃ ।
ઊચિવાનિદમુર્વીશઃ સદઃ સંહર્ષયન્નિવ ॥ ૧૯॥

ચારુચિત્રપદં શ્લક્ષ્ણં મૃષ્ટં ગૂઢમવિક્લવમ્ ।
સર્વેષામુપકારાર્થં તદા અનુવદન્નિવ ॥ ૨૦॥

રાજોવાચ
સભ્યાઃ શ‍ૃણુત ભદ્રં વઃ સાધવો ય ઇહાગતાઃ ।
સત્સુ જિજ્ઞાસુભિર્ધર્મમાવેદ્યં સ્વમનીષિતમ્ ॥ ૨૧॥

અહં દણ્ડધરો રાજા પ્રજાનામિહ યોજિતઃ ।
રક્ષિતા વૃત્તિદઃ સ્વેષુ સેતુષુ સ્થાપિતા પૃથક્ ॥ ૨૨॥

તસ્ય મે તદનુષ્ઠાનાદ્યાનાહુર્બ્રહ્મવાદિનઃ ।
લોકાઃ સ્યુઃ કામસન્દોહા યસ્ય તુષ્યતિ દિષ્ટદૃક્ ॥ ૨૩॥

ય ઉદ્ધરેત્કરં રાજા પ્રજા ધર્મેષ્વશિક્ષયન્ ।
પ્રજાનાં શમલં ભુઙ્ક્તે ભગં ચ સ્વં જહાતિ સઃ ॥ ૨૪॥

તત્પ્રજા ભર્તૃપિણ્ડાર્થં સ્વાર્થમેવાનસૂયવઃ ।
કુરુતાધોક્ષજધિયસ્તર્હિ મેઽનુગ્રહઃ કૃતઃ ॥ ૨૫॥

યૂયં તદનુમોદધ્વં પિતૃદેવર્ષયોઽમલાઃ ।
કર્તુઃ શાસ્તુરનુજ્ઞાતુસ્તુલ્યં યત્પ્રેત્ય તત્ફલમ્ ॥ ૨૬॥

અસ્તિ યજ્ઞપતિર્નામ કેષાઞ્ચિદર્હસત્તમાઃ ।
ઇહામુત્ર ચ લક્ષ્યન્તે જ્યોત્સ્નાવત્યઃ ક્વચિદ્ભુવઃ ॥ ૨૭॥

મનોરુત્તાનપાદસ્ય ધ્રુવસ્યાપિ મહીપતેઃ ।
પ્રિયવ્રતસ્ય રાજર્ષેરઙ્ગસ્યાસ્મત્પિતુઃ પિતુઃ ॥ ૨૮॥

ઈદૃશાનામથાન્યેષામજસ્ય ચ ભવસ્ય ચ ।
પ્રહ્લાદસ્ય બલેશ્ચાપિ કૃત્યમસ્તિ ગદાભૃતા ॥ ૨૯॥

દૌહિત્રાદીન્ ઋતે મૃત્યોઃ શોચ્યાન્ ધર્મવિમોહિતાન્ ।
વર્ગસ્વર્ગાપવર્ગાણાં પ્રાયેણૈકાત્મ્યહેતુના ॥ ૩૦॥

યત્પાદસેવાભિરુચિસ્તપસ્વિના-
મશેષજન્મોપચિતં મલં ધિયઃ ।
સદ્યઃ ક્ષિણોત્યન્વહમેધતી સતી
યથા પદાઙ્ગુષ્ઠવિનિઃસૃતા સરિત્ ॥ ૩૧॥

વિનિર્ધુતાશેષમનોમલઃ પુમા-
નસઙ્ગવિજ્ઞાનવિશેષવીર્યવાન્ ।
યદઙ્ઘ્રિમૂલે કૃતકેતનઃ પુન-
ર્ન સંસૃતિં ક્લેશવહાં પ્રપદ્યતે ॥ ૩૨॥

તમેવ યૂયં ભજતાત્મવૃત્તિભિ-
ર્મનોવચઃકાયગુણૈઃ સ્વકર્મભિઃ ।
અમાયિનઃ કામદુઘાઙ્ઘ્રિપઙ્કજં
યથાધિકારાવસિતાર્થસિદ્ધયઃ ॥ ૩૩॥

અસાવિહાનેકગુણોઽગુણોઽધ્વરઃ
પૃથગ્વિધદ્રવ્યગુણક્રિયોક્તિભિઃ ।
સમ્પદ્યતેઽર્થાશયલિઙ્ગનામભિ-
ર્વિશુદ્ધવિજ્ઞાનઘનઃ સ્વરૂપતઃ ॥ ૩૪॥

પ્રધાનકાલાશયધર્મસઙ્ગ્રહે
શરીર એષ પ્રતિપદ્ય ચેતનામ્ ।
ક્રિયાફલત્વેન વિભુર્વિભાવ્યતે
યથાનલો દારુષુ તદ્ગુણાત્મકઃ ॥ ૩૫॥

અહો મમામી વિતરન્ત્યનુગ્રહં
હરિં ગુરું યજ્ઞભુજામધીશ્વરમ્ ।
સ્વધર્મયોગેન યજન્તિ મામકા
નિરન્તરં ક્ષોણિતલે દૃઢવ્રતાઃ ॥ ૩૬॥

મા જાતુ તેજઃ પ્રભવેન્મહર્દ્ધિભિ-
સ્તિતિક્ષયા તપસા વિદ્યયા ચ ।
દેદીપ્યમાનેઽજિતદેવતાનાં

કુલે સ્વયં રાજકુલાદ્દ્વિજાનામ્ ॥ ૩૭॥

બ્રહ્મણ્યદેવઃ પુરુષઃ પુરાતનો
નિત્યં હરિર્યચ્ચરણાભિવન્દનાત્ ।
અવાપ લક્ષ્મીમનપાયિનીં યશો
જગત્પવિત્રં ચ મહત્તમાગ્રણીઃ ॥ ૩૮॥

યત્સેવયાશેષગુહાશયઃ સ્વરાડ્
વિપ્રપ્રિયસ્તુષ્યતિ કામમીશ્વરઃ ।
તદેવ તદ્ધર્મપરૈર્વિનીતૈઃ
સર્વાત્મના બ્રહ્મકુલં નિષેવ્યતામ્ ॥ ૩૯॥

પુમાન્ લભેતાનતિવેલમાત્મનઃ
પ્રસીદતોઽત્યન્તશમં સ્વતઃ સ્વયમ્ ।
યન્નિત્યસમ્બન્ધનિષેવયા તતઃ
પરં કિમત્રાસ્તિ મુખં હવિર્ભુજામ્ ॥ ૪૦॥

અશ્નાત્યનન્તઃ ખલુ તત્ત્વકોવિદૈઃ
શ્રદ્ધાહુતં યન્મુખ ઇજ્યનામભિઃ ।
ન વૈ તથા ચેતનયા બહિષ્કૃતે
હુતાશને પારમહંસ્યપર્યગુઃ ॥ ૪૧॥

યદ્બ્રહ્મ નિત્યં વિરજં સનાતનં
શ્રદ્ધાતપોમઙ્ગલમૌનસંયમૈઃ ।
સમાધિના બિભ્રતિ હાર્થદૃષ્ટયે
યત્રેદમાદર્શ ઇવાવભાસતે ॥ ૪૨॥

તેષામહં પાદસરોજરેણુ-
માર્યાવહેયાધિકિરીટમાયુઃ ।
યં નિત્યદા બિભ્રત આશુ પાપં
નશ્યત્યમું સર્વગુણા ભજન્તિ ॥ ૪૩॥

ગુણાયનં શીલધનં કૃતજ્ઞં
વૃદ્ધાશ્રયં સંવૃણતેઽનુસમ્પદઃ ।
પ્રસીદતાં બ્રહ્મકુલં ગવાં ચ
જનાર્દનઃ સાનુચરશ્ચ મહ્યમ્ ॥ ૪૪॥

મૈત્રેય ઉવાચ

ઇતિ બ્રુવાણં નૃપતિં પિતૃદેવદ્વિજાતયઃ ।
તુષ્ટુવુર્હૃષ્ટમનસઃ સાધુવાદેન સાધવઃ ॥ ૪૬॥

પુત્રેણ જયતે લોકાનિતિ સત્યવતી શ્રુતિઃ ।
બ્રહ્મદણ્ડહતઃ પાપો યદ્વેનોઽત્યતરત્તમઃ ॥ ૪૭॥

હિરણ્યકશિપુશ્ચાપિ ભગવન્નિન્દયા તમઃ ।
વિવિક્ષુરત્યગાત્સૂનોઃ પ્રહ્લાદસ્યાનુભાવતઃ ॥ ૪૮॥

વીરવર્ય પિતઃ પૃથ્વ્યાઃ સમાઃ સઞ્જીવ શાશ્વતીઃ ।
યસ્યેદૃશ્યચ્યુતે ભક્તિઃ સર્વલોકૈકભર્તરિ ॥ ૪૯॥

અહો વયં હ્યદ્ય પવિત્રકીર્તે
ત્વયૈવ નાથેન મુકુન્દનાથાઃ ।
ય ઉત્તમશ્લોકતમસ્ય વિષ્ણો-
ર્બ્રહ્મણ્યદેવસ્ય કથાં વ્યનક્તિ ॥ ૫૦॥

નાત્યદ્ભુતમિદં નાથ તવાજીવ્યાનુશાસનમ્ ।
પ્રજાનુરાગો મહતાં પ્રકૃતિઃ કરુણાત્મનામ્ ॥ ૫૧॥

અદ્ય નસ્તમસઃ પારસ્ત્વયોપાસાદિતઃ પ્રભો ।
ભ્રામ્યતાં નષ્ટદૃષ્ટીનાં કર્મભિર્દૈવસંજ્ઞિતૈઃ ॥ ૫૨॥

નમો વિવૃદ્ધસત્ત્વાય પુરુષાય મહીયસે ।
યો બ્રહ્મ ક્ષત્રમાવિશ્ય બિભર્તીદં સ્વતેજસા ॥ ૫૩॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ચતુર્થસ્કન્ધે એકવિંશોઽધ્યાયઃ ॥ ૨૧॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ દ્વાવિંશોઽધ્યાયઃ - ૨૨॥

મૈત્રેય ઉવાચ

જનેષુ પ્રગૃણત્સ્વેવં પૃથું પૃથુલવિક્રમમ્ ।

તત્રોપજગ્મુર્મુનયશ્ચત્વારઃ સૂર્યવર્ચસઃ ॥ ૧॥

તાંસ્તુ સિદ્ધેશ્વરાન્ રાજા વ્યોમ્નોઽવતરતોઽર્ચિષા ।
લોકાનપાપાન્ કુર્વત્યા સાનુગોઽચષ્ટ લક્ષિતાન્ ॥ ૨॥

તદ્દર્શનોદ્ગતાન્ પ્રાણાન્ પ્રત્યાદિત્સુરિવોત્થિતઃ ।
સસદસ્યાનુગો વૈન્ય ઇન્દ્રિયેશો ગુણાનિવ ॥ ૩॥

ગૌરવાદ્યન્ત્રિતઃ સભ્યઃ પ્રશ્રયાનતકન્ધરઃ ।
વિધિવત્પૂજયાઞ્ચક્રે ગૃહીતાધ્યર્હણાસનાન્ ॥ ૪॥

તત્પાદશૌચસલિલૈર્માર્જિતાલકબન્ધનઃ ।
તત્ર શીલવતાં વૃત્તમાચરન્ માનયન્નિવ ॥ ૫॥

હાટકાસન આસીનાન્ સ્વધિષ્ણ્યેષ્વિવ પાવકાન્ ।
શ્રદ્ધાસંયમસંયુક્તઃ પ્રીતઃ પ્રાહ ભવાગ્રજાન્ ॥ ૬॥

પૃથુરુવાચ
અહો આચરિતં કિં મે મઙ્ગલં મઙ્ગલાયનાઃ ।
યસ્ય વો દર્શનં હ્યાસીદ્દુર્દર્શાનાં ચ યોગિભિઃ ॥ ૭॥

કિં તસ્ય દુર્લભતરમિહ લોકે પરત્ર ચ ।
યસ્ય વિપ્રાઃ પ્રસીદન્તિ શિવો વિષ્ણુશ્ચ સાનુગઃ ॥ ૮॥

નૈવ લક્ષયતે લોકો લોકાન્ પર્યટતોઽપિ યાન્ ।
યથા સર્વદૃશં સર્વ આત્માનં યેઽસ્ય હેતવઃ ॥ ૯॥

અધના અપિ તે ધન્યાઃ સાધવો ગૃહમેધિનઃ ।
યદ્ગૃહા હ્યર્હવર્યામ્બુતૃણભૂમીશ્વરાવરાઃ ॥ ૧૦॥

વ્યાલાલયદ્રુમા વૈ તેઽપ્યરિક્તાખિલસમ્પદઃ ।
યદ્ગૃહાસ્તીર્થપાદીયપાદતીર્થવિવર્જિતાઃ ॥ ૧૧॥

સ્વાગતં વો દ્વિજશ્રેષ્ઠા યદ્વ્રતાનિ મુમુક્ષવઃ ।
ચરન્તિ શ્રદ્ધયા ધીરા બાલા એવ બૃહન્તિ ચ ॥ ૧૨॥

કચ્ચિન્નઃ કુશલં નાથા ઇન્દ્રિયાર્થાર્થવેદિનામ્ ।
વ્યસનાવાપ એતસ્મિન્ પતિતાનાં સ્વકર્મભિઃ ॥ ૧૩॥

ભવત્સુ કુશલપ્રશ્ન આત્મારામેષુ નેષ્યતે ।
કુશલાકુશલા યત્ર ન સન્તિ મતિવૃત્તયઃ ॥ ૧૪॥

તદહં કૃતવિશ્રમ્ભઃ સુહૃદો વસ્તપસ્વિનામ્ ।
સમ્પૃચ્છે ભવ એતસ્મિન્ ક્ષેમઃ કેનાઞ્જસા ભવેત્ ॥ ૧૫॥

વ્યક્તમાત્મવતામાત્મા ભગવાનાત્મભાવનઃ ।
સ્વાનામનુગ્રહાયેમાં સિદ્ધરૂપી ચરત્યજઃ ॥ ૧૬॥

મૈત્રેય ઉવાચ
પૃથોસ્તત્સૂક્તમાકર્ણ્ય સારં સુષ્ઠુ મિતં મધુ ।
સ્મયમાન ઇવ પ્રીત્યા કુમારઃ પ્રત્યુવાચ હ ॥ ૧૭॥

સનત્કુમાર ઉવાચ
સાધુ પૃષ્ટં મહારાજ સર્વભૂતહિતાત્મના ।
ભવતા વિદુષા ચાપિ સાધૂનાં મતિરીદૃશી ॥ ૧૮॥

સઙ્ગમઃ ખલુ સાધૂનામુભયેષાં ચ સમ્મતઃ ।
યત્સમ્ભાષણસમ્પ્રશ્નઃ સર્વેષાં વિતનોતિ શમ્ ॥ ૧૯॥

અસ્ત્યેવ રાજન્ ભવતો મધુદ્વિષઃ
પાદારવિન્દસ્ય ગુણાનુવાદને ।
રતિર્દુરાપા વિધુનોતિ નૈષ્ઠિકી
કામં કષાયં મલમન્તરાત્મનઃ ॥ ૨૦॥

શાસ્ત્રેષ્વિયાનેવ સુનિશ્ચિતો નૃણાં
ક્ષેમસ્ય સધ્ર્યગ્ વિમૃશેષુ હેતુઃ ।
અસઙ્ગ આત્મવ્યતિરિક્ત આત્મનિ
દૃઢા રતિર્બ્રહ્મણિ નિર્ગુણે ચ યા ॥ ૨૧॥

સા શ્રદ્ધયા ભગવદ્ધર્મચર્યયા
જિજ્ઞાસયાઽઽધ્યાત્મિકયોગનિષ્ઠયા ।
યોગેશ્વરોપાસનયા ચ નિત્યં
પુણ્યશ્રવઃ કથયા પુણ્યયા ચ ॥ ૨૨॥

અર્થેન્દ્રિયારામસગોષ્ઠ્યતૃષ્ણયા
તત્સમ્મતાનામપરિગ્રહેણ ચ ।
વિવિક્તરુચ્યા પરિતોષ આત્મન્
વિના હરેર્ગુણપીયૂષપાનાત્ ॥ ૨૩॥

અહિંસયા પારમહંસ્યચર્યયા
સ્મૃત્યા મુકુન્દાચરિતાગ્ર્યસીધુના ।
યમૈરકામૈર્નિયમૈશ્ચાપ્યનિન્દયા
નિરીહયા દ્વન્દ્વતિતિક્ષયા ચ ॥ ૨૪॥

હરેર્મુહુસ્તત્પરકર્ણપૂર-
ગુણાભિધાનેન વિજૃમ્ભમાણયા ।
ભક્ત્યા હ્યસઙ્ગઃ સદસત્યનાત્મનિ
સ્યાન્નિર્ગુણે બ્રહ્મણિ ચાઞ્જસા રતિઃ ॥ ૨૫॥

યદા રતિર્બ્રહ્મણિ નૈષ્ઠિકી પુમા-
નાચાર્યવાન્ જ્ઞાનવિરાગરંહસા ।
દહત્યવીર્યં હૃદયં જીવકોશં
પઞ્ચાત્મકં યોનિમિવોત્થિતોઽગ્નિઃ ॥ ૨૬॥

દગ્ધાશયો મુક્તસમસ્તતદ્ગુણો
નૈવાત્મનો બહિરન્તર્વિચષ્ટે ।
પરાત્મનોર્યદ્વ્યવધાનં પુરસ્તાત્
સ્વપ્ને યથા પુરુષસ્તદ્વિનાશે ॥ ૨૭॥

આત્માનમિન્દ્રિયાર્થં ચ પરં યદુભયોરપિ ।
સત્યાશય ઉપાધૌ વૈ પુમાન્ પશ્યતિ નાન્યદા ॥ ૨૮॥

નિમિત્તે સતિ સર્વત્ર જલાદાવપિ પૂરુષઃ ।
આત્મનશ્ચ પરસ્યાપિ ભિદાં પશ્યતિ નાન્યદા ॥ ૨૯॥

ઇન્દ્રિયૈર્વિષયાકૃષ્ટૈરાક્ષિપ્તં ધ્યાયતાં મનઃ ।
ચેતનાં હરતે બુદ્ધેઃ સ્તમ્બસ્તોયમિવ હ્રદાત્ ॥ ૩૦॥

ભ્રશ્યત્યનુસ્મૃતિશ્ચિત્તં જ્ઞાનભ્રંશઃ સ્મૃતિક્ષયે ।
તદ્રોધં કવયઃ પ્રાહુરાત્માપહ્નવમાત્મનઃ ॥ ૩૧॥

નાતઃ પરતરો લોકે પુંસઃ સ્વાર્થવ્યતિક્રમઃ ।
યદધ્યન્યસ્ય પ્રેયસ્ત્વમાત્મનઃ સ્વવ્યતિક્રમાત્ ॥ ૩૨॥

અર્થેન્દ્રિયાર્થાભિધ્યાનં સર્વાર્થાપહ્નવો નૃણામ્ ।
ભ્રંશિતો જ્ઞાનવિજ્ઞાનાદ્યેનાવિશતિ મુખ્યતામ્ ॥ ૩૩॥

ન કુર્યાત્કર્હિચિત્સઙ્ગં તમસ્તીવ્રં તિતીરિષુઃ ।

ધર્માર્થકામમોક્ષાણાં યદત્યન્તવિઘાતકમ્ ॥ ૩૪॥

તત્રાપિ મોક્ષ એવાર્થ આત્યન્તિકતયેષ્યતે ।
ત્રૈવર્ગ્યોઽર્થો યતો નિત્યં કૃતાન્તભયસંયુતઃ ॥ ૩૫॥

પરેઽવરે ચ યે ભાવા ગુણવ્યતિકરાદનુ ।
ન તેષાં વિદ્યતે ક્ષેમમીશ વિધ્વંસિતાશિષામ્ ॥ ૩૬॥

તત્ત્વં નરેન્દ્ર જગતામથ તસ્થુષાં ચ
દેહેન્દ્રિયાસુધિષણાત્મભિરાવૃતાનામ્ ।
યઃ ક્ષેત્રવિત્તપતયા હૃદિ વિશ્વગાવિઃ
પ્રત્યક્ ચકાસ્તિ ભગવાંસ્તમવેહિ સોઽસ્મિ ॥ ૩૭॥

યસ્મિન્નિદં સદસદાત્મતયા વિભાતિ
માયાવિવેકવિધુતિ સ્રજિ વાહિબુદ્ધિઃ ।
તં નિત્યમુક્તપરિશુદ્ધવિશુદ્ધતત્ત્વં
પ્રત્યૂઢકર્મકલિલપ્રકૃતિં પ્રપદ્યે ॥ ૩૮॥

યત્પાદપઙ્કજપલાશવિલાસભક્ત્યા
કર્માશયં ગ્રથિતમુદ્ગ્રથયન્તિ સન્તઃ ।
તદ્વન્ન રિક્તમતયો યતયોઽપિ રુદ્ધ-
સ્રોતોગણાસ્તમરણં ભજ વાસુદેવમ્ ॥ ૩૯॥

કૃચ્છ્રો મહાનિહ ભવાર્ણવમપ્લવેશાં
ષડ્વર્ગનક્રમસુખેન તિતીર્ષન્તિ ।
તત્ત્વં હરેર્ભગવતો ભજનીયમઙ્ઘ્રિં
કૃત્વોડુપં વ્યસનમુત્તર દુસ્તરાર્ણમ્ ॥ ૪૦॥

મૈત્રેય ઉવાચ
સ એવં બ્રહ્મપુત્રેણ કુમારેણાત્મમેધસા ।
દર્શિતાત્મગતિઃ સમ્યક્ પ્રશસ્યોવાચ તં નૃપઃ ॥ ૪૧॥

રાજોવાચ
કૃતો મેઽનુગ્રહઃ પૂર્વં હરિણાઽઽર્તાનુકમ્પિના ।
તમાપાદયિતું બ્રહ્મન્ ભગવન્ યૂયમાગતાઃ ॥ ૪૨॥

નિષ્પાદિતશ્ચ કાર્ત્સ્ન્યેન ભગવદ્ભિર્ઘૃણાલુભિઃ ।
સાધૂચ્છિષ્ટં હિ મે સર્વમાત્મના સહ કિં દદે ॥ ૪૩॥

પ્રાણા દારાઃ સુતા બ્રહ્મન્ ગૃહાશ્ચ સપરિચ્છદાઃ ।
રાજ્યં બલં મહી કોશ ઇતિ સર્વં નિવેદિતમ્ ॥ ૪૪॥

સૈનાપત્યં ચ રાજ્યં ચ દણ્ડનેતૃત્વમેવ ચ ।
સર્વલોકાધિપત્યં ચ વેદશાસ્ત્રવિદર્હતિ ॥ ૪૫॥

સ્વમેવ બ્રાહ્મણો ભુઙ્ક્તે સ્વં વસ્તે સ્વં દદાતિ ચ ।
તસ્યૈવાનુગ્રહેણાન્નં ભુઞ્જતે ક્ષત્રિયાદયઃ ॥ ૪૬॥

યૈરીદૃશી ભગવતો ગતિરાત્મવાદ
એકાન્તતો નિગમિભિઃ પ્રતિપાદિતા નઃ ।
તુષ્યન્ત્વદભ્રકરુણાઃ સ્વકૃતેન નિત્યં
કો નામ તત્પ્રતિકરોતિ વિનોદપાત્રમ્ ॥ ૪૭॥

મૈત્રેય ઉવાચ
ત આત્મયોગપતય આદિરાજેન પૂજિતાઃ ।
શીલં તદીયં શંસન્તઃ ખેઽભૂવન્ મિષતાં નૃણામ્ ॥ ૪૮॥

વૈન્યસ્તુ ધુર્યો મહતાં સંસ્થિત્યાધ્યાત્મશિક્ષયા ।
આપ્તકામમિવાત્માનં મેન આત્મન્યવસ્થિતઃ ॥ ૪૯॥

કર્માણિ ચ યથાકાલં યથાદેશં યથાબલમ્ ।
યથોચિતં યથાવિત્તમકરોદ્બ્રહ્મસાત્કૃતમ્ ॥ ૫૦॥

ફલં બ્રહ્મણિ વિન્યસ્ય નિર્વિષઙ્ગઃ સમાહિતઃ ।
કર્માધ્યક્ષં ચ મન્વાન આત્માનં પ્રકૃતેઃ પરમ્ ॥ ૫૧॥

ગૃહેષુ વર્તમાનોઽપિ સ સામ્રાજ્યશ્રિયાન્વિતઃ ।
નાસજ્જતેન્દ્રિયાર્થેષુ નિરહમ્મતિરર્કવત્ ॥ ૫૨॥

એવમધ્યાત્મયોગેન કર્માણ્યનુસમાચરન્ ।
પુત્રાનુત્પાદયામાસ પઞ્ચાર્ચિષ્યાઽઽત્મસમ્મતાન્ ॥ ૫૩॥

વિજિતાશ્વં ધૂમ્રકેશં હર્યક્ષં દ્રવિણં વૃકમ્ ।
સર્વેષાં લોકપાલાનાં દધારૈકઃ પૃથુર્ગુણાન્ ॥ ૫૪॥

ગોપીથાય જગત્સૃષ્ટેઃ કાલે સ્વે સ્વેઽચ્યુતાત્મકઃ ।
મનોવાગ્વૃત્તિભિઃ સૌમ્યૈર્ગુણૈઃ સંરઞ્જયન્ પ્રજાઃ ॥ ૫૫॥

રાજેત્યધાન્નામધેયં સોમરાજ ઇવાપરઃ ।

સૂર્યવદ્વિસૃજન્ ગૃહ્ણન્ પ્રતપંશ્ચ ભુવો વસુ ॥ ૫૬॥

દુર્ધર્ષસ્તેજસેવાગ્નિર્મહેન્દ્ર ઇવ દુર્જયઃ ।
તિતિક્ષયા ધરિત્રીવ દ્યૌરિવાભીષ્ટદો નૃણામ્ ॥ ૫૭॥

વર્ષતિ સ્મ યથાકામં પર્જન્ય ઇવ તર્પયન્ ।
સમુદ્ર ઇવ દુર્બોધઃ સત્ત્વેનાચલરાડિવ ॥ ૫૮॥

ધર્મરાડિવ શિક્ષાયામાશ્ચર્યે હિમવાનિવ ।
કુબેર ઇવ કોશાઢ્યો ગુપ્તાર્થો વરુણો યથા ॥ ૫૯॥

માતરિશ્વેવ સર્વાત્મા બલેન મહસૌજસા ।
અવિષહ્યતયા દેવો ભગવાન્ ભૂતરાડિવ ॥ ૬૦॥

કન્દર્પ ઇવ સૌન્દર્યે મનસ્વી મૃગરાડિવ ।
વાત્સલ્યે મનુવન્નૃણાં પ્રભુત્વે ભગવાનજઃ ॥ ૬૧॥

બૃહસ્પતિર્બ્રહ્મવાદે આત્મવત્ત્વે સ્વયં હરિઃ ।
ભક્ત્યા ગોગુરુવિપ્રેષુ વિષ્વક્સેનાનુવર્તિષુ ।
હ્રિયા પ્રશ્રયશીલાભ્યામાત્મતુલ્યઃ પરોદ્યમે ॥ ૬૨॥

કીર્ત્યોર્ધ્વગીતયા પુમ્ભિસ્ત્રૈલોક્યે તત્ર તત્ર હ ।
પ્રવિષ્ટઃ કર્ણરન્ધ્રેષુ સ્ત્રીણાં રામઃ સતામિવ ॥ ૬૩॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ચતુર્થસ્કન્ધે દ્વાવિંશોઽધ્યાયઃ ॥ ૨૨॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ત્રયોવિંશોઽધ્યાયઃ - ૨૩॥

મૈત્રેય ઉવાચ
દૃષ્ટ્વાઽઽત્માનં પ્રવયસમેકદા વૈન્ય આત્મવાન્ ।
આત્મના વર્ધિતાશેષસ્વાનુસર્ગઃ પ્રજાપતિઃ ॥ ૧॥

જગતસ્તસ્થુષશ્ચાપિ વૃત્તિદો ધર્મભૃત્સતામ્ ।
નિષ્પાદિતેશ્વરાદેશો યદર્થમિહ જજ્ઞિવાન્ ॥ ૨॥

આત્મજેષ્વાત્મજાં ન્યસ્ય વિરહાદ્રુદતીમિવ ।
પ્રજાસુ વિમનઃસ્વેકઃ સદારોઽગાત્તપોવનમ્ ॥ ૩॥

તત્રાપ્યદાભ્યનિયમો વૈખાનસસુસમ્મતે ।
આરબ્ધ ઉગ્રતપસિ યથા સ્વવિજયે પુરા ॥ ૪॥

કન્દમૂલફલાહારઃ શુષ્કપર્ણાશનઃ ક્વચિત્ ।
અબ્ભક્ષઃ કતિચિત્પક્ષાન્ વાયુભક્ષસ્તતઃ પરમ્ ॥ ૫॥

ગ્રીષ્મે પઞ્ચતપા વીરો વર્ષાસ્વાસારષાણ્મુનિઃ ।
આકણ્ઠમગ્નઃ શિશિરે ઉદકે સ્થણ્ડિલેશયઃ ॥ ૬॥

તિતિક્ષુર્યતવાગ્દાન્ત ઊર્ધ્વરેતા જિતાનિલઃ ।
આરિરાધયિષુઃ કૃષ્ણમચરત્તપ ઉત્તમમ્ ॥ ૭॥

તેન ક્રમાનુસિદ્ધેન ધ્વસ્તકર્મમલાશયઃ ।
પ્રાણાયામૈઃ સન્નિરુદ્ધષડ્વર્ગશ્છિન્નબન્ધનઃ ॥ ૮॥

સનત્કુમારો ભગવાન્ યદાહાધ્યાત્મિકં પરમ્ ।
યોગં તેનૈવ પુરુષમભજત્પુરુષર્ષભઃ ॥ ૯॥

ભગવદ્ધર્મિણઃ સાધોઃ શ્રદ્ધયા યતતઃ સદા ।
ભક્તિર્ભગવતિ બ્રહ્મણ્યનન્યવિષયાભવત્ ॥ ૧૦॥

તસ્યાનયા ભગવતઃ પરિકર્મશુદ્ધ-
સત્ત્વાત્મનસ્તદનુસંસ્મરણાનુપૂર્ત્યા ।
જ્ઞાનં વિરક્તિમદભૂન્નિશિતેન યેન
ચિચ્છેદ સંશયપદં નિજજીવકોશમ્ ॥ ૧૧॥

છિન્નાન્યધીરધિગતાત્મગતિર્નિરીહ-
સ્તત્તત્યજેઽચ્છિનદિદં વયુનેન યેન ।
તાવન્ન યોગગતિભિર્યતિરપ્રમત્તો
યાવદ્ગદાગ્રજકથાસુ રતિં ન કુર્યાત્ ॥ ૧૨॥

એવં સ વીરપ્રવરઃ સંયોજ્યાત્માનમાત્મનિ ।
બ્રહ્મભૂતો દૃઢં કાલે તત્યાજ સ્વં કલેવરમ્ ॥ ૧૩॥

સમ્પીડ્ય પાયું પાર્ષ્ણિભ્યાં વાયુમુત્સારયઞ્છનૈઃ ।

નાભ્યાં કોષ્ઠેષ્વવસ્થાપ્ય હૃદુરઃકણ્ઠશીર્ષણિ ॥ ૧૪॥

ઉત્સર્પયંસ્તુ તં મૂર્ધ્નિ ક્રમેણાવેશ્ય નિઃસ્પૃહઃ ।
વાયું વાયૌ ક્ષિતૌ કાયં તેજસ્તેજસ્યયૂયુજત્ ॥ ૧૫॥

ખાન્યાકાશે દ્રવં તોયે યથાસ્થાનં વિભાગશઃ ।
ક્ષિતિમમ્ભસિ તત્તેજસ્યદો વાયૌ નભસ્યમુમ્ ॥ ૧૬॥

ઇન્દ્રિયેષુ મનસ્તાનિ તન્માત્રેષુ યથોદ્ભવમ્ ।
ભૂતાદિનામૂન્યુત્કૃષ્ય મહત્યાત્મનિ સન્દધે ॥ ૧૭॥

તં સર્વગુણવિન્યાસં જીવે માયામયે ન્યધાત્ ।
તં ચાનુશયમાત્મસ્થમસાવનુશયી પુમાન્ ।
જ્ઞાનવૈરાગ્યવીર્યેણ સ્વરૂપસ્થોઽજહાત્પ્રભુઃ ॥ ૧૮॥

અર્ચિર્નામ મહારાજ્ઞી તત્પત્ન્યનુગતા વનમ્ ।
સુકુમાર્યતદર્હા ચ યત્પદ્ભ્યાં સ્પર્શનં ભુવઃ ॥ ૧૯॥

અતીવ ભર્તુર્વ્રતધર્મનિષ્ઠયા
શુશ્રૂષયા ચાર્ષદેહયાત્રયા ।
નાવિન્દતાર્તિં પરિકર્શિતાપિ સા
પ્રેયસ્કરસ્પર્શનમાનનિર્વૃતિઃ ॥ ૨૦॥

દેહં વિપન્નાખિલચેતનાદિકં
પત્યુઃ પૃથિવ્યા દયિતસ્ય ચાત્મનઃ ।
આલક્ષ્ય કિઞ્ચિચ્ચ વિલપ્ય સા સતી
ચિતામથારોપયદદ્રિસાનુનિ ॥ ૨૧॥

વિધાય કૃત્યં હ્રદિનીજલાપ્લુતા
દત્ત્વોદકં ભર્તુરુદારકર્મણઃ ।
નત્વા દિવિસ્થાંસ્ત્રિદશાંસ્ત્રિઃ પરીત્ય
વિવેશ વહ્નિં ધ્યાયતી ભર્તૃપાદૌ ॥ ૨૨॥

વિલોક્યાનુગતાં સાધ્વીં પૃથું વીરવરં પતિમ્ ।
તુષ્ટુવુર્વરદા દેવૈર્દેવપત્ન્યઃ સહસ્રશઃ ॥ ૨૩॥

કુર્વત્યઃ કુસુમાસારં તસ્મિન્ મન્દરસાનુનિ ।
નદત્સ્વમરતૂર્યેષુ ગૃણન્તિ સ્મ પરસ્પરમ્ ॥ ૨૪॥

દેવ્ય ઊચુઃ
અહો ઇયં વધૂર્ધન્યા યા ચૈવં ભૂભુજાં પતિમ્ ।
સર્વાત્મના પતિં ભેજે યજ્ઞેશં શ્રીર્વધૂરિવ ॥ ૨૫॥

સૈષા નૂનં વ્રજત્યૂર્ધ્વમનુ વૈન્યં પતિં સતી ।
પશ્યતાસ્માનતીત્યાર્ચિર્દુર્વિભાવ્યેન કર્મણા ॥ ૨૬॥

તેષાં દુરાપં કિં ત્વન્યન્મર્ત્યાનાં ભગવત્પદમ્ ।
ભુવિ લોલાયુષો યે વૈ નૈષ્કર્મ્યં સાધયન્ત્યુત ॥ ૨૭॥

સ વઞ્ચિતો બતાત્મધ્રુક્ કૃચ્છ્રેણ મહતા ભુવિ ।
લબ્ધ્વાઽઽપવર્ગ્યં માનુષ્યં વિષયેષુ વિષજ્જતે ॥ ૨૮॥

મૈત્રેય ઉવાચ
સ્તુવતીષ્વમરસ્ત્રીષુ પતિલોકં ગતા વધૂઃ ।
યં વા આત્મવિદાં ધુર્યો વૈન્યઃ પ્રાપાચ્યુતાશ્રયઃ ॥ ૨૯॥

ઇત્થમ્ભૂતાનુભાવોઽસૌ પૃથુઃ સ ભગવત્તમઃ ।
કીર્તિતં તસ્ય ચરિતમુદ્દામચરિતસ્ય તે ॥ ૩૦॥

ય ઇદં સુમહત્પુણ્યં શ્રદ્ધયાવહિતઃ પઠેત્ ।
શ્રાવયેચ્છૃણુયાદ્વાપિ સ પૃથોઃ પદવીમિયાત્ ॥ ૩૧॥

બ્રાહ્મણો બ્રહ્મવર્ચસ્વી રાજન્યો જગતીપતિઃ ।
વૈશ્યઃ પઠન્ વિટ્પતિઃ સ્યાચ્છૂદ્રઃ સત્તમતામિયાત્ ॥ ૩૨॥

ત્રિકૃત્વ ઇદમાકર્ણ્ય નરો નાર્યથવાઽઽદૃતા ।
અપ્રજઃ સુપ્રજતમો નિર્ધનો ધનવત્તમઃ ॥ ૩૩॥

અસ્પષ્ટકીર્તિઃ સુયશા મૂર્ખો ભવતિ પણ્ડિતઃ ।
ઇદં સ્વસ્ત્યયનં પુંસામમઙ્ગલ્યનિવારણમ્ ॥ ૩૪॥

ધન્યં યશસ્યમાયુષ્યં સ્વર્ગ્યં કલિમલાપહમ્ ।
ધર્માર્થકામમોક્ષાણાં સમ્યક્ સિદ્ધિમભીપ્સુભિઃ ।
શ્રદ્ધયૈતદનુશ્રાવ્યં ચતુર્ણાં કારણં પરમ્ ॥ ૩૫॥

વિજયાભિમુખો રાજા શ્રુત્વૈતદભિયાતિ યાન્ ।
બલિં તસ્મૈ હરન્ત્યગ્રે રાજાનઃ પૃથવે યથા ॥ ૩૬॥

મુક્તાન્યસઙ્ગો ભગવત્યમલાં ભક્તિમુદ્વહન્ ।

વૈન્યસ્ય ચરિતં પુણ્યં શ‍ૃણુયાચ્છ્રાવયેત્પઠેત્ ॥ ૩૭॥

વૈચિત્રવીર્યાભિહિતં મહન્માહાત્મ્યસૂચકમ્ ।
અસ્મિન્ કૃતમતિર્મર્ત્યઃ પાર્થવીં ગતિમાપ્નુયાત્ ॥ ૩૮॥

અનુદિનમિદમાદરેણ શ‍ૃણ્વન્
પૃથુચરિતં પ્રથયન્ વિમુક્તસઙ્ગઃ ।
ભગવતિ ભવસિન્ધુપોતપાદે
સ ચ નિપુણાં લભતે રતિં મનુષ્યઃ ॥ ૩૯॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ચતુર્થસ્કન્ધે ત્રયોવિંશોઽધ્યાયઃ ॥ ૨૩॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ચતુર્વિંશોઽધ્યાયઃ - ૨૪॥

મૈત્રેય ઉવાચ
વિજિતાશ્વોઽધિરાજાઽઽસીત્પૃથુપુત્રઃ પૃથુશ્રવાઃ ।
યવીયોભ્યોઽદદાત્કાષ્ઠા ભ્રાતૃભ્યો ભ્રાતૃવત્સલઃ ॥ ૧॥

હર્યક્ષાયાદિશત્પ્રાચીં ધૂમ્રકેશાય દક્ષિણામ્ ।
પ્રતીચીં વૃકસંજ્ઞાય તુર્યાં દ્રવિણસે વિભુઃ ॥ ૨॥

અન્તર્ધાનગતિં શક્રાલ્લબ્ધ્વાન્તર્ધાનસંજ્ઞિતઃ ।
અપત્યત્રયમાધત્ત શિખણ્ડિન્યાં સુસમ્મતમ્ ॥ ૩॥

પાવકઃ પવમાનશ્ચ શુચિરિત્યગ્નયઃ પુરા ।
વસિષ્ઠશાપાદુત્પન્નાઃ પુનર્યોગગતિં ગતાઃ ॥ ૪॥

અન્તર્ધાનો નભસ્વત્યાં હવિર્ધાનમવિન્દત ।
ય ઇન્દ્રમશ્વહર્તારં વિદ્વાનપિ ન જઘ્નિવાન્ ॥ ૫॥

રાજ્ઞાં વૃત્તિં કરાદાનદણ્ડશુલ્કાદિદારુણામ્ ।
મન્યમાનો દીર્ઘસત્રવ્યાજેન વિસસર્જ હ ॥ ૬॥

તત્રાપિ હંસં પુરુષં પરમાત્માનમાત્મદૃક્ ।

યજંસ્તલ્લોકતામાપ કુશલેન સમાધિના ॥ ૭॥

હવિર્ધાનાદ્ધવિર્ધાની વિદુરાસૂત ષટ્ સુતાન્ ।
બર્હિષદં ગયં શુક્લં કૃષ્ણં સત્યં જિતવ્રતમ્ ॥ ૮॥

બર્હિષત્સુમહાભાગો હાવિર્ધાનિઃ પ્રજાપતિઃ ।
ક્રિયાકાણ્ડેષુ નિષ્ણાતો યોગેષુ ચ કુરૂદ્વહ ॥ ૯॥

યસ્યેદં દેવયજનમનુયજ્ઞં વિતન્વતઃ ।
પ્રાચીનાગ્રૈઃ કુશૈરાસીદાસ્તૃતં વસુધાતલમ્ ॥ ૧૦॥

સામુદ્રીં દેવદેવોક્તામુપયેમે શતદ્રુતિમ્ ।
યાં વીક્ષ્ય ચારુસર્વાઙ્ગીં કિશોરીં સુષ્ઠ્વલઙ્કૃતામ્ ।
પરિક્રમન્તીમુદ્વાહે ચકમેઽગ્નિઃ શુકીમિવ ॥ ૧૧॥

વિબુધાસુરગન્ધર્વમુનિસિદ્ધનરોરગાઃ ।
વિજિતાઃ સૂર્યયા દિક્ષુ ક્વણયન્ત્યૈવ નૂપુરૈઃ ॥ ૧૨॥

પ્રાચીનબર્હિષઃ પુત્રાઃ શતદ્રુત્યાં દશાભવન્ ।
તુલ્યનામવ્રતાઃ સર્વે ધર્મસ્નાતાઃ પ્રચેતસઃ ॥ ૧૩॥

પિત્રાઽઽદિષ્ટાઃ પ્રજાસર્ગે તપસેઽર્ણવમાવિશન્ ।
દશવર્ષસહસ્રાણિ તપસાર્ચંસ્તપસ્પતિમ્ ॥ ૧૪॥

યદુક્તં પથિ દૃષ્ટેન ગિરિશેન પ્રસીદતા ।
તદ્ધ્યાયન્તો જપન્તશ્ચ પૂજયન્તશ્ચ સંયતાઃ ॥ ૧૫॥

વિદુર ઉવાચ
પ્રચેતસાં ગિરિત્રેણ યથાઽઽસીત્પથિ સઙ્ગમઃ ।
યદુતાહ હરઃ પ્રીતસ્તન્નો બ્રહ્મન્ વદાર્થવત્ ॥ ૧૬॥

સઙ્ગમઃ ખલુ વિપ્રર્ષે શિવેનેહ શરીરિણામ્ ।
દુર્લભો મુનયો દધ્યુરસઙ્ગાદ્યમભીપ્સિતમ્ ॥ ૧૭॥

આત્મારામોઽપિ યસ્ત્વસ્ય લોકકલ્પસ્ય રાધસે ।
શક્ત્યા યુક્તો વિચરતિ ઘોરયા ભગવાન્ ભવઃ ॥ ૧૮॥

મૈત્રેય ઉવાચ
પ્રચેતસઃ પિતુર્વાક્યં શિરસાઽઽદાય સાધવઃ ।
દિશં પ્રતીચીં પ્રયયુસ્તપસ્યાદૃતચેતસઃ ॥ ૧૯॥

સમુદ્રમુપ વિસ્તીર્ણમપશ્યન્ સુમહત્સરઃ ।
મહન્મન ઇવ સ્વચ્છં પ્રસન્નસલિલાશયમ્ ॥ ૨૦॥

નીલરક્તોત્પલામ્ભોજકહ્લારેન્દીવરાકરમ્ ।
હંસસારસચક્રાહ્વકારણ્ડવનિકૂજિતમ્ ॥ ૨૧॥

મત્તભ્રમરસૌસ્વર્યહૃષ્ટરોમલતાઙ્ઘ્રિપમ્ ।
પદ્મકોશરજો દિક્ષુ વિક્ષિપત્પવનોત્સવમ્ ॥ ૨૨॥

તત્ર ગાન્ધર્વમાકર્ણ્ય દિવ્યમાર્ગમનોહરમ્ ।
વિસિસ્મ્યૂ રાજપુત્રાસ્તે મૃદઙ્ગપણવાદ્યનુ ॥ ૨૩॥

તર્હ્યેવ સરસસ્તસ્માન્નિષ્ક્રામન્તં સહાનુગમ્ ।
ઉપગીયમાનમમરપ્રવરં વિબુધાનુગૈઃ ॥ ૨૪॥

તપ્તહેમનિકાયાભં શિતિકણ્ઠં ત્રિલોચનમ્ ।
પ્રસાદસુમુખં વીક્ષ્ય પ્રણેમુર્જાતકૌતુકાઃ ॥ ૨૫॥

સ તાન્ પ્રપન્નાર્તિહરો ભગવાન્ ધર્મવત્સલઃ ।
ધર્મજ્ઞાન્ શીલસમ્પન્નાન્ પ્રીતઃ પ્રીતાનુવાચ હ ॥ ૨૬॥

રુદ્ર ઉવાચ
યૂયં વેદિષદઃ પુત્રા વિદિતં વશ્ચિકીર્ષિતમ્ ।
અનુગ્રહાય ભદ્રં વ એવં મે દર્શનં કૃતમ્ ॥ ૨૭॥

યઃ પરં રંહસઃ સાક્ષાત્ત્રિગુણાજ્જીવસંજ્ઞિતાત્ ।
ભગવન્તં વાસુદેવં પ્રપન્નઃ સ પ્રિયો હિ મે ॥ ૨૮॥

સ્વધર્મનિષ્ઠઃ શતજન્મભિઃ પુમાન્
વિરિઞ્ચતામેતિ તતઃ પરં હિ મામ્ ।
અવ્યાકૃતં ભાગવતોઽથ વૈષ્ણવં
પદં યથાહં વિબુધાઃ કલાત્યયે ॥ ૨૯॥

અથ ભાગવતા યૂયં પ્રિયાઃ સ્થ ભગવાન્ યથા ।
ન મદ્ભાગવતાનાં ચ પ્રેયાનન્યોઽસ્તિ કર્હિચિત્ ॥ ૩૦॥

ઇદં વિવિક્તં જપ્તવ્યં પવિત્રં મઙ્ગલં પરમ્ ।
નિઃશ્રેયસકરં ચાપિ શ્રૂયતાં તદ્વદામિ વઃ ॥ ૩૧॥

મૈત્રેય ઉવાચ

ઇત્યનુક્રોશહૃદયો ભગવાનાહ તાઞ્છિવઃ ।
બદ્ધાઞ્જલીન્ રાજપુત્રાન્ નારાયણપરો વચઃ ॥ ૩૨॥

રુદ્ર ઉવાચ
જિતં ત આત્મવિદ્ધુર્યસ્વસ્તયે સ્વસ્તિરસ્તુ મે ।
ભવતા રાધસા રાદ્ધં સર્વસ્મા આત્મને નમઃ ॥ ૩૩॥

નમઃ પઙ્કજનાભાય ભૂતસૂક્ષ્મેન્દ્રિયાત્મને ।
વાસુદેવાય શાન્તાય કૂટસ્થાય સ્વરોચિષે ॥ ૩૪॥

સઙ્કર્ષણાય સૂક્ષ્માય દુરન્તાયાન્તકાય ચ ।
નમો વિશ્વપ્રબોધાય પ્રદ્યુમ્નાયાન્તરાત્મને ॥ ૩૫॥

નમો નમોઽનિરુદ્ધાય હૃષીકેશેન્દ્રિયાત્મને ।
નમઃ પરમહંસાય પૂર્ણાય નિભૃતાત્મને ॥ ૩૬॥

સ્વર્ગાપવર્ગદ્વારાય નિત્યં શુચિષદે નમઃ ।
નમો હિરણ્યવીર્યાય ચાતુર્હોત્રાય તન્તવે ॥ ૩૭॥

નમ ઊર્જ ઇષે ત્રય્યાઃ પતયે યજ્ઞરેતસે ।
તૃપ્તિદાય ચ જીવાનાં નમઃ સર્વરસાત્મને ॥ ૩૮॥

સર્વસત્ત્વાત્મદેહાય વિશેષાય સ્થવીયસે ।
નમસ્ત્રૈલોક્યપાલાય સહ ઓજો બલાય ચ ॥ ૩૯॥

અર્થલિઙ્ગાય નભસે નમોઽન્તર્બહિરાત્મને ।
નમઃ પુણ્યાય લોકાય અમુષ્મૈ ભૂરિવર્ચસે ॥ ૪૦॥

પ્રવૃત્તાય નિવૃત્તાય પિતૃદેવાય કર્મણે ।
નમોઽધર્મવિપાકાય મૃત્યવે દુઃખદાય ચ ॥ ૪૧॥

નમસ્ત આશિષામીશ મનવે કારણાત્મને ।
નમો ધર્માય બૃહતે કૃષ્ણાયાકુણ્ઠમેધસે ।
પુરુષાય પુરાણાય સાઙ્ખ્યયોગેશ્વરાય ચ ॥ ૪૨॥

શક્તિત્રયસમેતાય મીઢુષેઽહઙ્કૃતાત્મને ।
ચેત આકૂતિરૂપાય નમો વાચો વિભૂતયે ॥ ૪૩॥

દર્શનં નો દિદૃક્ષૂણાં દેહિ ભાગવતાર્ચિતમ્ ।
રૂપં પ્રિયતમં સ્વાનાં સર્વેન્દ્રિયગુણાઞ્જનમ્ ॥ ૪૪॥

સ્નિગ્ધપ્રાવૃટ્ ઘનશ્યામં સર્વસૌન્દર્યસઙ્ગ્રહમ્ ।
ચાર્વાયતચતુર્બાહું સુજાતરુચિરાનનમ્ ॥ ૪૫॥

પદ્મકોશપલાશાક્ષં સુન્દરભ્રૂ સુનાસિકમ્ ।
સુદ્વિજં સુકપોલાસ્યં સમકર્ણવિભૂષણમ્ ॥ ૪૬॥

પ્રીતિપ્રહસિતાપાઙ્ગમલકૈરુપશોભિતમ્ ।
લસત્પઙ્કજકિઞ્જલ્કદુકૂલં મૃષ્ટકુણ્ડલમ્ ॥ ૪૭॥

સ્ફુરત્કિરીટવલયહારનૂપુરમેખલમ્ ।
શઙ્ખચક્રગદાપદ્મમાલામણ્યુત્તમર્દ્ધિમત્ ॥ ૪૮॥

સિંહસ્કન્ધત્વિષો બિભ્રત્સૌભગગ્રીવકૌસ્તુભમ્ ।
શ્રિયાનપાયિન્યા ક્ષિપ્તનિકષાશ્મોરસોલ્લસત્ ॥ ૪૯॥

પૂરરેચકસંવિગ્નવલિવલ્ગુદલોદરમ્ ।
પ્રતિસઙ્ક્રામયદ્વિશ્વં નાભ્યાऽऽવર્તગભીરયા ॥ ૫૦॥

શ્યામશ્રોણ્યધિરોચિષ્ણુ દુકૂલસ્વર્ણમેખલમ્ ।
સમચાર્વઙ્ઘ્રિજઙ્ઘોરુનિમ્નજાનુસુદર્શનમ્ ॥ ૫૧॥

પદા શરત્પદ્મપલાશરોચિષા
નખદ્યુભિર્નોऽન્તરઘં વિધુન્વતા ।
પ્રદર્શય સ્વીયમપાસ્તસાધ્વસં
પદં ગુરો માર્ગગુરુસ્તમોજુષામ્ ॥ ૫૨॥

એતદ્રૂપમનુધ્યેયમાત્મશુદ્ધિમભીપ્સતામ્ ।
યદ્ભક્તિયોગોભયદઃ સ્વધર્મમનુતિષ્ઠતામ્ ॥ ૫૩॥

ભવાન્ ભક્તિમતા લભ્યો દુર્લભઃ સર્વદેહિનામ્ ।
સ્વારાજ્યસ્યાપ્યભિમત એકાન્તેનાત્મવિદ્ગતિઃ ॥ ૫૪॥

તં દુરારાધ્યમારાધ્ય સતામપિ દુરાપયા ।
એકાન્તભક્ત્યા કો વાઞ્છેત્પાદમૂલં વિના બહિઃ ॥ ૫૫॥

યત્ર નિર્વિષ્ટમરણં કૃતાન્તો નાભિમન્યતે ।
વિશ્વં વિધ્વંસયન્ વીર્યશૌર્યવિસ્ફૂર્જિતભ્રુવા ॥ ૫૬॥

ક્ષણાર્ધેનાપિ તુલયે ન સ્વર્ગં નાપુનર્ભવમ્ ।
ભગવત્સઙ્ગિસઙ્ગસ્ય મર્ત્યાનાં કિમુતાશિષઃ ॥ ૫૭॥

અથાનઘાઙ્ઘ્રેસ્તવ કીર્તિતીર્થયો-
રન્તર્બહિઃ સ્નાનવિધૂતપાપ્મનામ્ ।
ભૂતેષ્વનુક્રોશસુસત્ત્વશીલિનાં
સ્યાત્સઙ્ગમોઽનુગ્રહ એષ નસ્તવ ॥ ૫૮॥

ન યસ્ય ચિત્તં બહિરર્થવિભ્રમં
તમોગુહાયાં ચ વિશુદ્ધમાવિશત્ ।
યદ્ભક્તિયોગાનુગૃહીતમઞ્જસા
મુનિર્વિચષ્ટે નનુ તત્ર તે ગતિમ્ ॥ ૫૯॥

યત્રેદં વ્યજ્યતે વિશ્વં વિશ્વસ્મિન્નવભાતિ યત્ ।
તત્ત્વં બ્રહ્મ પરઞ્જ્યોતિરાકાશમિવ વિસ્તૃતમ્ ॥ ૬૦॥

યો માયયેદં પુરુરૂપયાસૃજ-
દ્બિભર્તિ ભૂયઃ ક્ષપયત્યવિક્રિયઃ ।
યદ્ભેદબુદ્ધિઃ સદિવાત્મદુઃસ્થયા
તમાત્મતન્ત્રં ભગવન્ પ્રતીમહિ ॥ ૬૧॥

ક્રિયાકલાપૈરિદમેવ યોગિનઃ
શ્રદ્ધાન્વિતાઃ સાધુ યજન્તિ સિદ્ધયે ।
ભૂતેન્દ્રિયાન્તઃકરણોપલક્ષિતં
વેદે ચ તન્ત્રે ચ ત એવ કોવિદાઃ ॥ ૬૨॥

ત્વમેક આદ્યઃ પુરુષઃ સુપ્તશક્તિ-
સ્તયા રજઃસત્ત્વતમો વિભિદ્યતે ।
મહાનહં ખં મરુદગ્નિવાર્ધરાઃ
સુરર્ષયો ભૂતગણા ઇદં યતઃ ॥ ૬૩॥

સૃષ્ટં સ્વશક્ત્યેદમનુપ્રવિષ્ટ-
શ્ચતુર્વિધં પુરમાત્માંશકેન ।
અથો વિદુસ્તં પુરુષં સન્તમન્ત-
ર્ભુઙ્ક્તે હૃષીકૈર્મધુ સારઘં યઃ ॥ ૬૪॥

સ એષ લોકાનતિચણ્ડવેગો
વિકર્ષસિ ત્વં ખલુ કાલયાનઃ ।
ભૂતાનિ ભૂતૈરનુમેયતત્ત્વો
ઘનાવલીર્વાયુરિવાવિષહ્યઃ ॥ ૬૫॥

પ્રમત્તમુચ્ચૈરિતિકૃત્યચિન્તયા
પ્રવૃદ્ધલોભં વિષયેષુ લાલસમ્ ।
ત્વમપ્રમત્તઃ સહસાભિપદ્યસે
ક્ષુલ્લેલિહાનોઽહિરિવાખુમન્તકઃ ॥ ૬૬॥

કસ્ત્વત્પદાબ્જં વિજહાતિ પણ્ડિતો
યસ્તેઽવમાનવ્યયમાનકેતનઃ ।
વિશઙ્કયાસ્મદ્ગુરુરર્ચતિ સ્મ યદ્-
વિનોપપત્તિં મનવશ્ચતુર્દશ ॥ ૬૭॥

અથ ત્વમસિ નો બ્રહ્મન્ પરમાત્મન્ વિપશ્ચિતામ્ ।
વિશ્વં રુદ્રભયધ્વસ્તમકુતશ્ચિદ્ભયા ગતિઃ ॥ ૬૮॥

ઇદં જપત ભદ્રં વો વિશુદ્ધા નૃપનન્દનાઃ ।
સ્વધર્મમનુતિષ્ઠન્તો ભગવત્યર્પિતાશયાઃ ॥ ૬૯॥

તમેવાત્માનમાત્મસ્થં સર્વભૂતેષ્વવસ્થિતમ્ ।
પૂજયધ્વં ગૃણન્તશ્ચ ધ્યાયન્તશ્ચાસકૃદ્ધરિમ્ ॥ ૭૦॥

યોગાદેશમુપાસાદ્ય ધારયન્તો મુનિવ્રતાઃ ।
સમાહિતધિયઃ સર્વ એતદભ્યસતાદૃતાઃ ॥ ૭૧॥

ઇદમાહ પુરાસ્માકં ભગવાન્ વિશ્વસૃક્પતિઃ ।
ભૃગ્વાદીનામાત્મજાનાં સિસૃક્ષુઃ સંસિસૃક્ષતામ્ ॥ ૭૨॥

તે વયં નોદિતાઃ સર્વે પ્રજાસર્ગે પ્રજેશ્વરાઃ ।
અનેન ધ્વસ્તતમસઃ સિસૃક્ષ્મો વિવિધાઃ પ્રજાઃ ॥ ૭૩॥

અથેદં નિત્યદા યુક્તો જપન્નવહિતઃ પુમાન્ ।
અચિરાચ્છ્રેય આપ્નોતિ વાસુદેવપરાયણઃ ॥ ૭૪॥

શ્રેયસામિહ સર્વેષાં જ્ઞાનં નિઃશ્રેયસં પરમ્ ।
સુખં તરતિ દુષ્પારં જ્ઞાનનૌર્વ્યસનાર્ણવમ્ ॥ ૭૫॥

ય ઇમં શ્રદ્ધયા યુક્તો મદ્ગીતં ભગવત્સ્તવમ્ ।
અધીયાનો દુરારાધ્યં હરિમારાધયત્યસૌ ॥ ૭૬॥

વિન્દતે પુરુષોઽમુષ્માદ્યદ્યદિચ્છત્યસત્વરમ્ ।

મદ્ગીતગીતાત્સુપ્રીતાચ્છ્રેયસામેકવલ્લભાત્ ॥ ૭૭॥

ઇદં યઃ કલ્ય ઉત્થાય પ્રાઞ્જલિઃ શ્રદ્ધયાન્વિતઃ ।
શ઼ૃણુયાચ્છ્રાવયેન્મર્ત્યો મુચ્યતે કર્મબન્ધનૈઃ ॥ ૭૮॥

ગીતં મયેદં નરદેવનન્દનાઃ
પરસ્ય પુંસઃ પરમાત્મનઃ સ્તવમ્ ।
જપન્ત એકાગ્રધિયસ્તપો મહ-
ચ્ચરધ્વમન્તે તત આપ્સ્યથેપ્સિતમ્ ॥ ૭૯॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે રુદ્રગીતં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૨૪॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ પઞ્ચવિંશોઽધ્યાયઃ - ૨૫॥

મૈત્રેય ઉવાચ
ઇતિ સન્દિશ્ય ભગવાન્ બાર્હિષદૈરભિપૂજિતઃ ।
પશ્યતાં રાજપુત્રાણાં તત્રૈવાન્તર્દધે હરઃ ॥ ૧॥

રુદ્રગીતં ભગવતઃ સ્તોત્રં સર્વે પ્રચેતસઃ ।
જપન્તસ્તે તપસ્તેપુર્વર્ષાણામયુતં જલે ॥ ૨॥

પ્રાચીનબર્હિષં ક્ષત્તઃ કર્મસ્વાસક્તમાનસમ્ ।
નારદોઽધ્યાત્મતત્ત્વજ્ઞઃ કૃપાલુઃ પ્રત્યબોધયત્ ॥ ૩॥

શ્રેયસ્ત્વં કતમદ્રાજન્ કર્મણાઽઽત્મન ઈહસે ।
દુઃખહાનિઃ સુખાવાપ્તિઃ શ્રેયસ્તન્નેહ ચેષ્યતે ॥ ૪॥

રાજોવાચ
ન જાનામિ મહાભાગ પરં કર્માપવિદ્ધધીઃ ।
બ્રૂહિ મે વિમલં જ્ઞાનં યેન મુચ્યેય કર્મભિઃ ॥ ૫॥

ગૃહેષુ કૂટધર્મેષુ પુત્રદારધનાર્થધીઃ ।
ન પરં વિન્દતે મૂઢો ભ્રામ્યન્ સંસારવર્ત્મસુ ॥ ૬॥

નારદ ઉવાચ
ભો ભોઃ પ્રજાપતે રાજન્ પશૂન્ પશ્ય ત્વયાધ્વરે ।
સંજ્ઞાપિતાઞ્જીવસઙ્ઘાન્ નિર્ઘૃણેન સહસ્રશઃ ॥ ૭॥

એતે ત્વાં સમ્પ્રતીક્ષન્તે સ્મરન્તો વૈશસં તવ ।
સમ્પરેતમયઃકૂટૈશ્છિન્દન્ત્યુત્થિતમન્યવઃ ॥ ૮॥

અત્ર તે કથયિષ્યેઽમુમિતિહાસં પુરાતનમ્ ।
પુરઞ્જનસ્ય ચરિતં નિબોધ ગદતો મમ ॥ ૯॥

આસીત્પુરઞ્જનો નામ રાજા રાજન્ બૃહચ્છ્રવાઃ ।
તસ્યાવિજ્ઞાતનામાઽઽસીત્સખાવિજ્ઞાતચેષ્ટિતઃ ॥ ૧૦॥

સોઽન્વેષમાણઃ શરણં બભ્રામ પૃથિવીં પ્રભુઃ ।
નાનુરૂપં યદાવિન્દદભૂત્સ વિમના ઇવ ॥ ૧૧॥

ન સાધુ મેને તાઃ સર્વા ભૂતલે યાવતીઃ પુરઃ ।
કામાન્ કામયમાનોઽસૌ તસ્ય તસ્યોપપત્તયે ॥ ૧૨॥

સ એકદા હિમવતો દક્ષિણેષ્વથ સાનુષુ ।
દદર્શ નવભિર્દ્વાર્ભિઃ પુરં લક્ષિતલક્ષણામ્ ॥ ૧૩॥

પ્રાકારોપવનાટ્ટાલપરિખૈરક્ષતોરણૈઃ ।
સ્વર્ણરૌપ્યાયસૈઃ શ‍ૃઙ્ગૈઃ સઙ્કુલાં સર્વતો ગૃહૈઃ ॥ ૧૪॥

નીલસ્ફટિકવૈદૂર્યમુક્તામરકતારુણૈઃ ।
કૢપ્તહર્મ્યસ્થલીં દીપ્તાં શ્રિયા ભોગવતીમિવ ॥ ૧૫॥

સભાચત્વરરથ્યાભિરાક્રીડાયતનાપણૈઃ ।
ચૈત્યધ્વજપતાકાભિર્યુક્તાં વિદ્રુમવેદિભિઃ ॥ ૧૬॥

પુર્યાસ્તુ બાહ્યોપવને દિવ્યદ્રુમલતાકુલે ।
નદદ્વિહઙ્ગાલિકુલકોલાહલજલાશયે ॥ ૧૭॥

હિમનિર્ઝરવિપ્રુષ્મત્કુસુમાકરવાયુના ।
ચલત્પ્રવાલવિટપનલિનીતટસમ્પદિ ॥ ૧૮॥

નાનારણ્યમૃગવ્રાતૈરનાબાધે મુનિવ્રતૈઃ ।
આહૂતં મન્યતે પાન્થો યત્ર કોકિલકૂજિતૈઃ ॥ ૧૯॥

યદૃચ્છયાઽઽગતાં તત્ર દદર્શ પ્રમદોત્તમામ્ ।

ભૃત્યૈર્દશભિરાયાન્તીમેકૈકશતનાયકૈઃ ॥ ૨૦॥

પઞ્ચશીર્ષાહિના ગુપ્તાં પ્રતીહારેણ સર્વતઃ ।
અન્વેષમાણામૃષભમપ્રૌઢાં કામરૂપિણીમ્ ॥ ૨૧॥

સુનાસાં સુદતીં બાલાં સુકપોલાં વરાનનામ્ ।
સમવિન્યસ્તકર્ણાભ્યાં બિભ્રતીં કુણ્ડલશ્રિયમ્ ॥ ૨૨॥

પિશઙ્ગનીવીં સુશ્રોણીં શ્યામાં કનકમેખલામ્ ।
પદ્ભ્યાં ક્વણદ્ભ્યાં ચલતીં નૂપુરૈર્દેવતામિવ ॥ ૨૩॥

સ્તનૌ વ્યઞ્જિતકૈશોરૌ સમવૃત્તૌ નિરન્તરૌ ।
વસ્ત્રાન્તેન નિગૂહન્તીં વ્રીડયા ગજગામિનીમ્ ॥ ૨૪॥

તામાહ લલિતં વીરઃ સવ્રીડસ્મિતશોભનામ્ ।
સ્નિગ્ધેનાપાઙ્ગપુઙ્ખેન સ્પૃષ્ટઃ પ્રેમોદ્ભ્રમદ્ભ્રુવા ॥ ૨૫॥

કા ત્વં કઞ્જપલાશાક્ષિ કસ્યાસીહ કુતઃ સતિ ।
ઇમામુપ પુરીં ભીરુ કિં ચિકીર્ષસિ શંસ મે ॥ ૨૬॥

ક એતેઽનુપથા યે ત એકાદશ મહાભટાઃ ।
એતા વા લલનાઃ સુભ્રુ કોઽયં તેઽહિઃ પુરઃસરઃ ॥ ૨૭॥

ત્વં હ્રીર્ભવાન્યસ્યથવાગ્રમા પતિં
વિચિન્વતી કિં મુનિવદ્રહો વને ।
ત્વદઙ્ઘ્રિકામાપ્તસમસ્તકામં
ક્વ પદ્મકોશઃ પતિતઃ કરાગ્રાત્ ॥ ૨૮॥

નાસાં વરોર્વન્યતમા ભુવિસ્પૃક્
પુરીમિમાં વીરવરેણ સાકમ્ ।
અર્હસ્યલઙ્કર્તુમદભ્રકર્મણા
લોકં પરં શ્રીરિવ યજ્ઞપુંસા ॥ ૨૯॥

યદેષ માપાઙ્ગવિખણ્ડિતેન્દ્રિયં
સવ્રીડભાવસ્મિતવિભ્રમદ્ભ્રુવા ।
ત્વયોપસૃષ્ટો ભગવાન્ મનોભવઃ
પ્રબાધતેઽથાનુગૃહાણ શોભને ॥ ૩૦॥

ત્વદાનનં સુભ્રુ સુતારલોચનં

વ્યાલમ્બિ નીલાલકવૃન્દસંવૃતમ્ ।
ઉન્નીય મે દર્શય વલ્ગુ વાચકં
યદ્વ્રીડયા નાભિમુખં શુચિસ્મિતે ॥ ૩૧॥

નારદ ઉવાચ
ઇત્થં પુરઞ્જનં નારી યાચમાનમધીરવત્ ।
અભ્યનન્દત તં વીરં હસન્તી વીરમોહિતા ॥ ૩૨॥

ન વિદામ વયં સમ્યક્કર્તારં પુરુષર્ષભ ।
આત્મનશ્ચ પરસ્યાપિ ગોત્રં નામ ચ યત્કૃતમ્ ॥ ૩૩॥

ઇહાદ્ય સન્તમાત્માનં વિદામ ન તતઃ પરમ્ ।
યેનેયં નિર્મિતા વીર પુરી શરણમાત્મનઃ ॥ ૩૪॥

એતે સખાયઃ સખ્યો મે નરા નાર્યશ્ચ માનદ ।
સુપ્તાયાં મયિ જાગર્તિ નાગોઽયં પાલયન્ પુરીમ્ ॥ ૩૫॥

દિષ્ટ્યાઽઽગતોઽસિ ભદ્રં તે ગ્રામ્યાન્ કામાનભીપ્સસે ।
ઉદ્વહિષ્યામિ તાંસ્તેઽહં સ્વબન્ધુભિરરિન્દમ ॥ ૩૬॥

ઇમાં ત્વમધિતિષ્ઠસ્વ પુરીં નવમુખીં વિભો ।
મયોપનીતાન્ ગૃહ્ણાનઃ કામભોગાન્ શતં સમાઃ ॥ ૩૭॥

કં નુ ત્વદન્યં રમયે હ્યરતિજ્ઞમકોવિદમ્ ।
અસમ્પરાયાભિમુખમશ્વસ્તનવિદં પશુમ્ ॥ ૩૮॥

ધર્મો હ્યત્રાર્થકામૌ ચ પ્રજાનન્દોઽમૃતં યશઃ ।
લોકા વિશોકા વિરજા યાન્ન કેવલિનો વિદુઃ ॥ ૩૯॥

પિતૃદેવર્ષિમર્ત્યાનાં ભૂતાનામાત્મનશ્ચ હ ।
ક્ષેમ્યં વદન્તિ શરણં ભવેઽસ્મિન્ યદ્ગૃહાશ્રમઃ ॥ ૪૦॥

કા નામ વીર વિખ્યાતં વદાન્યં પ્રિયદર્શનમ્ ।
ન વૃણીત પ્રિયં પ્રાપ્તં માદૃશી ત્વાદૃશં પતિમ્ ॥ ૪૧॥

કસ્યા મનસ્તે ભુવિ ભોગિભોગયોઃ
સ્ત્રિયા ન સજ્જેદ્ભુજયોર્મહાભુજ ।
યોઽનાથવર્ગાધિમલં ઘૃણોદ્ધત-
સ્મિતાવલોકેન ચરત્યપોહિતુમ્ ॥ ૪૨॥

નારદ ઉવાચ
ઇતિ તૌ દમ્પતી તત્ર સમુદ્ય સમયં મિથઃ ।
તાં પ્રવિશ્ય પુરીં રાજન્ મુમુદાતે શતં સમાઃ ॥ ૪૩॥

ઉપગીયમાનો લલિતં તત્ર તત્ર ચ ગાયકૈઃ ।
ક્રીડન્ પરિવૃતઃ સ્ત્રીભિર્હ્રદિનીમાવિશચ્છુચૌ ॥ ૪૪॥

સપ્તોપરિ કૃતા દ્વારઃ પુરસ્તસ્યાસ્તુ દ્વે અધઃ ।
પૃથગ્વિષયગત્યર્થં તસ્યાં યઃ કશ્ચનેશ્વરઃ ॥ ૪૫॥

પઞ્ચદ્વારસ્તુ પૌરસ્ત્યા દક્ષિણૈકા તથોત્તરા ।
પશ્ચિમે દ્વે અમૂષાં તે નામાનિ નૃપ વર્ણયે ॥ ૪૬॥

ખદ્યોતાવિર્મુખી ચ પ્રાગ્દ્વારાવેકત્ર નિર્મિતે ।
વિભ્રાજિતં જનપદં યાતિ તાભ્યાં દ્યુમત્સખઃ ॥ ૪૭॥

નલિની નાલિની ચ પ્રાગ્દ્વારાવેકત્ર નિર્મિતે ।
અવધૂતસખસ્તાભ્યાં વિષયં યાતિ સૌરભમ્ ॥ ૪૮॥

મુખ્યા નામ પુરસ્તાદ્દ્વાસ્તયાપણબહૂદનૌ ।
વિષયૌ યાતિ પુરરાડ્રસજ્ઞવિપણાન્વિતઃ ॥ ૪૯॥

પિતૃહૂર્નૃપ પુર્યા દ્વાર્દક્ષિણેન પુરઞ્જનઃ ।
રાષ્ટ્રં દક્ષિણપઞ્ચાલં યાતિ શ્રુતધરાન્વિતઃ ॥ ૫૦॥

દેવહૂર્નામ પુર્યા દ્વા ઉત્તરેણ પુરઞ્જનઃ ।
રાષ્ટ્રમુત્તરપઞ્ચાલં યાતિ શ્રુતધરાન્વિતઃ ॥ ૫૧॥

આસુરી નામ પશ્ચાદ્દ્વાસ્તયા યાતિ પુરઞ્જનઃ ।
ગ્રામકં નામ વિષયં દુર્મદેન સમન્વિતઃ ॥ ૫૨॥

નિરૃતિર્નામ પશ્ચાદ્દ્વાસ્તયા યાતિ પુરઞ્જનઃ ।
વૈશસં નામ વિષયં લુબ્ધકેન સમન્વિતઃ ॥ ૫૩॥

અન્ધાવમીષાં પૌરાણાં નિર્વાક્પેશસ્કૃતાવુભૌ ।
અક્ષણ્વતામધિપતિસ્તાભ્યાં યાતિ કરોતિ ચ ॥ ૫૪॥

સ યર્હ્યન્તઃપુરગતો વિષૂચીનસમન્વિતઃ ।
મોહં પ્રસાદં હર્ષં વા યાતિ જાયાઽઽત્મજોદ્ભવમ્ ॥ ૫૫॥

એવં કર્મસુ સંસક્તઃ કામાત્મા વઞ્ચિતોઽબુધઃ ।

મહિષી યદ્યદીહેત તત્તદેવાન્વવર્તત ॥ ૫૬॥

ક્વચિત્પિબન્ત્યાં પિબતિ મદિરાં મદવિહ્વલઃ ।
અશ્નન્ત્યાં ક્વચિદશ્નાતિ જક્ષત્યાં સહ જક્ષિતિ ॥ ૫૭॥

ક્વચિદ્ગાયતિ ગાયન્ત્યાં રુદત્યાં રુદતિ ક્વચિત્ ।
ક્વચિદ્ધસન્ત્યાં હસતિ જલ્પન્ત્યામનુ જલ્પતિ ॥ ૫૮॥

ક્વચિદ્ધાવતિ ધાવન્ત્યાં તિષ્ઠન્ત્યામનુ તિષ્ઠતિ ।
અનુ શેતે શયાનાયામન્વાસ્તે ક્વચિદાસતીમ્ ॥ ૫૯॥

ક્વચિચ્છૃણોતિ શ ृણ્વન્ત્યાં પશ્યન્ત્યામનુ પશ્યતિ ।
ક્વચિજ્જિઘ્રતિ જિઘ્રન્ત્યાં સ્પૃશન્ત્યાં સ્પૃશતિ ક્વચિત્ ॥ ૬૦॥

ક્વચિચ્ચ શોચતીં જાયામનુ શોચતિ દીનવત્ ।
અનુ હૃષ્યતિ હૃષ્યન્ત્યાં મુદિતામનુ મોદતે ॥ ૬૧॥

વિપ્રલબ્ધો મહિષ્યૈવં સર્વપ્રકૃતિવઞ્ચિતઃ ।
નેચ્છન્નનુકરોત્યજ્ઞઃ ક્લૈબ્યાત્ક્રીડામૃગો યથા ॥ ૬૨॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પુરઞ્જનોપાખ્યાને પઞ્ચવિંશોઽધ્યાયઃ ॥ ૨૫॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ષડ્વિંશોઽધ્યાયઃ - ૨૬॥

નારદ ઉવાચ
સ એકદા મહેષ્વાસો રથં પઞ્ચાશ્વમાશુગમ્ ।
દ્વીષં દ્વિચક્રમેકાક્ષં ત્રિવેણું પઞ્ચબન્ધુરમ્ ॥ ૧॥

એકરશ્મ્યેકદમનમેકનીડં દ્વિકૂબરમ્ ।
પઞ્ચપ્રહરણં સપ્તવરૂથં પઞ્ચવિક્રમમ્ ॥ ૨॥

હૈમોપસ્કરમારુહ્ય સ્વર્ણવર્માક્ષયેષુધિઃ ।
એકાદશચમૂનાથઃ પઞ્ચપ્રસ્થમગાદ્વનમ્ ॥ ૩॥

ચચાર મૃગયાં તત્ર દૃપ્ત આત્તેષુકાર્મુકઃ ।
વિહાય જાયામતદર્હાં મૃગવ્યસનલાલસઃ ॥ ૪॥

આસુરીં વૃત્તિમાશ્રિત્ય ઘોરાત્મા નિરનુગ્રહઃ ।
ન્યહનન્નિશિતૈર્બાણૈર્વનેષુ વનગોચરાન્ ॥ ૫॥

તીર્થેષુ પ્રતિદૃષ્ટેષુ રાજા મેધ્યાન્ પશૂન્ વને ।
યાવદર્થમલં લુબ્ધો હન્યાદિતિ નિયમ્યતે ॥ ૬॥

ય એવં કર્મ નિયતં વિદ્વાન્ કુર્વીત માનવઃ ।
કર્મણા તેન રાજેન્દ્ર જ્ઞાનેન ન સ લિપ્યતે ॥ ૭॥

અન્યથા કર્મ કુર્વાણો માનારૂઢો નિબધ્યતે ।
ગુણપ્રવાહપતિતો નષ્ટપ્રજ્ઞો વ્રજત્યધઃ ॥ ૮॥

તત્ર નિર્ભિન્નગાત્રાણાં ચિત્રવાજૈઃ શિલીમુખૈઃ ।
વિપ્લવોઽભૂદ્દુઃખિતાનાં દુઃસહઃ કરુણાત્મનામ્ ॥ ૯॥

શશાન્ વરાહાન્ મહિષાન્ ગવયાન્ રુરુશલ્યકાન્ ।
મેધ્યાનન્યાંશ્ચ વિવિધાન્ વિનિઘ્નન્ શ્રમમધ્યગાત્ ॥ ૧૦॥

તતઃ ક્ષુત્તૃટ્પરિશ્રાન્તો નિવૃત્તો ગૃહમેયિવાન્ ।
કૃતસ્નાનોચિતાહારઃ સંવિવેશ ગતક્લમઃ ॥ ૧૧॥

આત્માનમર્હયાઞ્ચક્રે ધૂપાલેપસ્રગાદિભિઃ ।
સાધ્વલઙ્કૃતસર્વાઙ્ગો મહિષ્યામાદધે મનઃ ॥ ૧૨॥

તૃપ્તો હૃષ્ટઃ સુદૃપ્તશ્ચ કન્દર્પાકૃષ્ટમાનસઃ ।
ન વ્યચષ્ટ વરારોહાં ગૃહિણીં ગૃહમેધિનીમ્ ॥ ૧૩॥

અન્તઃપુરસ્ત્રિયોઽપૃચ્છદ્વિમના ઇવ વેદિષત્ ।
અપિ વઃ કુશલં રામાઃ સેશ્વરીણાં યથા પુરા ॥ ૧૪॥

ન તથૈતર્હિ રોચન્તે ગૃહેષુ ગૃહસમ્પદઃ ।
યદિ ન સ્યાદ્ગૃહે માતા પત્ની વા પતિદેવતા ।
વ્યઙ્ગે રથ ઇવ પ્રાજ્ઞઃ કો નામાસીત દીનવત્ ॥ ૧૫॥

ક્વ વર્તતે સા લલના મજ્જન્તં વ્યસનાર્ણવે ।
યા મામુદ્ધરતે પ્રજ્ઞાં દીપયન્તી પદે પદે ॥ ૧૬॥

રામા ઊચુઃ

નરનાથ ન જાનીમસ્ત્વત્પ્રિયા યદ્વ્યવસ્યતિ ।
ભૂતલે નિરવસ્તારે શયાનાં પશ્ય શત્રુહન્ ॥ ૧૭॥

નારદ ઉવાચ
પુરઞ્જનઃ સ્વમહિષીં નિરીક્ષ્યાવધુતાં ભુવિ ।
તત્સઙ્ગોન્મથિતજ્ઞાનો વૈક્લવ્યં પરમં યયૌ ॥ ૧૮॥

સાન્ત્વયન્ શ્લક્ષ્ણયા વાચા હૃદયેન વિદૂયતા ।
પ્રેયસ્યાઃ સ્નેહસંરમ્ભલિઙ્ગમાત્મનિ નાભ્યગાત્ ॥ ૧૯॥

અનુનિન્યેઽથ શનકૈર્વીરોઽનુનયકોવિદઃ ।
પસ્પર્શ પાદયુગલમાહ ચોત્સઙ્ગલાલિતામ્ ॥ ૨૦॥

પુરઞ્જન ઉવાચ
નૂનં ત્વકૃતપુણ્યાસ્તે ભૃત્યા યેષ્વીશ્વરાઃ શુભે ।
કૃતાગઃસ્વાત્મસાત્કૃત્વા શિક્ષા દણ્ડં ન યુઞ્જતે ॥ ૨૧॥

પરમોઽનુગ્રહો દણ્ડો ભૃત્યેષુ પ્રભુણાર્પિતઃ ।
બાલો ન વેદ તત્તન્વિ બન્ધુકૃત્યમમર્ષણઃ ॥ ૨૨॥

સા ત્વં મુખં સુદતિ સુભ્ર્વનુરાગભાર-
વ્રીડાવિલમ્બવિલસદ્ધસિતાવલોકમ્ ।
નીલાલકાલિભિરુપસ્કૃતમુન્નસં નઃ
સ્વાનાં પ્રદર્શય મનસ્વિનિ વલ્ગુ વાક્યમ્ ॥ ૨૩॥

તસ્મિન્ દધે દમમહં તવ વીરપત્નિ
યોઽન્યત્ર ભૂસુરકુલાત્કૃતકિલ્બિષસ્તમ્ ।
પશ્યે ન વીતભયમુન્મુદિતં ત્રિલોક્યા-
મન્યત્ર વૈ મુરરિપોરિતરત્ર દાસાત્ ॥ ૨૪॥

વક્ત્રં ન તે વિતિલકં મલિનં વિહર્ષં
સંરમ્ભભીમમવિમૃષ્ટમપેતરાગમ્ ।
પશ્યે સ્તનાવપિ શુચોપહતૌ સુજાતૌ
બિમ્બાધરં વિગતકુઙ્કુમપઙ્કરાગમ્ ॥ ૨૫॥

તન્મે પ્રસીદ સુહૃદઃ કૃતકિલ્બિષસ્ય
સ્વૈરં ગતસ્ય મૃગયાં વ્યસનાતુરસ્ય ।
કા દેવરં વશગતં કુસુમાસ્ત્રવેગ-

વિસ્રસ્તપૌંસ્નમુશતી ન ભજેત કૃત્યે ॥ ૨૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પુરઞ્જનોપાખ્યાને ષડ્વિંશોઽધ્યાયઃ ॥ ૨૬॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ સપ્તવિંશોઽધ્યાયઃ - ૨૭॥

નારદ ઉવાચ
ઇત્થં પુરઞ્જનં સધ્ર્યગ્ વશમાનીય વિભ્રમૈઃ ।
પુરઞ્જની મહારાજ રેમે રમયતી પતિમ્ ॥ ૧॥

સ રાજા મહિષીં રાજન્ સુસ્નાતાં રુચિરાનનામ્ ।
કૃતસ્વસ્ત્યયનાં તૃપ્તામભ્યનન્દદુપાગતામ્ ॥ ૨॥

તયોપગૂઢઃ પરિરબ્ધકન્ધરો
રહોઽનુમન્ત્રૈરપકૃષ્ટચેતનઃ ।
ન કાલરંહો બુબુધે દુરત્યયં
દિવાનિશેતિ પ્રમદાપરિગ્રહઃ ॥ ૩॥

શયાન ઉન્નદ્ધમદો મહામના
મહાર્હતલ્પે મહિષીભુજોપધિઃ ।
તામેવ વીરો મનુતે પરં યત-
સ્તમોઽભિભૂતો ન નિજં પરં ચ યત્ ॥ ૪॥

તયૈવં રમમાણસ્ય કામકશ્મલચેતસઃ ।
ક્ષણાર્ધમિવ રાજેન્દ્ર વ્યતિક્રાન્તં નવં વયઃ ॥ ૫॥

તસ્યામજનયત્પુત્રાન્ પુરઞ્જન્યાં પુરઞ્જનઃ ।
શતાન્યેકાદશ વિરાડાયુષોઽર્ધમથાત્યગાત્ ॥ ૬॥

દુહિતૄર્દશોત્તરશતં પિતૃમાતૃયશસ્કરીઃ ।
શીલૌદાર્યગુણોપેતાઃ પૌરઞ્જન્યઃ પ્રજાપતે ॥ ૭॥

સ પઞ્ચાલપતિઃ પુત્રાન્ પિતૃવંશવિવર્ધનાન્ ।

દારૈઃ સંયોજયામાસ દુહિતૄઃ સદૃશૈર્વરૈઃ ॥ ૮॥

પુત્રાણાં ચાભવન્ પુત્રા એકૈકસ્ય શતં શતમ્ ।
યૈર્વૈ પૌરઞ્જનો વંશઃ પઞ્ચાલેષુ સમેધિતઃ ॥ ૯॥

તેષુ તદ્રિક્થહારેષુ ગૃહકોશાનુજીવિષુ ।
નિરૂઢેન મમત્વેન વિષયેષ્વન્વબધ્યત ॥ ૧૦॥

ઈજે ચ ક્રતુભિર્ઘોરૈર્દીક્ષિતઃ પશુમારકૈઃ ।
દેવાન્ પિતૄન્ ભૂતપતીન્ નાનાકામો યથા ભવાન્ ॥ ૧૧॥

યુક્તેષ્વેવં પ્રમત્તસ્ય કુટુમ્બાસક્તચેતસઃ ।
આસસાદ સ વૈ કાલો યોઽપ્રિયઃ પ્રિયયોષિતામ્ ॥ ૧૨॥

ચણ્ડવેગ ઇતિ ખ્યાતો ગન્ધર્વાધિપતિર્નૃપ ।
ગન્ધર્વાસ્તસ્ય બલિનઃ ષષ્ટ્યુત્તરશતત્રયમ્ ॥ ૧૩॥

ગન્ધર્વ્યસ્તાદૃશીરસ્ય મૈથુન્યશ્ચ સિતાસિતાઃ ।
પરિવૃત્ત્યા વિલુમ્પન્તિ સર્વકામવિનિર્મિતામ્ ॥ ૧૪॥

તે ચણ્ડવેગાનુચરાઃ પુરઞ્જનપુરં યદા ।
હર્તુમારેભિરે તત્ર પ્રત્યષેધત્પ્રજાગરઃ ॥ ૧૫॥

સ સપ્તભિઃ શતૈરેકો વિંશત્યા ચ શતં સમાઃ ।
પુરઞ્જનપુરાધ્યક્ષો ગન્ધર્વૈર્યુયુધે બલી ॥ ૧૬॥

ક્ષીયમાણે સ્વસમ્બન્ધે એકસ્મિન્ બહુભિર્યુધા ।
ચિન્તાં પરાં જગામાર્તઃ સ રાષ્ટ્રપુરબાન્ધવઃ ॥ ૧૭॥

સ એવ પુર્યાં મધુભુક્ પઞ્ચાલેષુ સ્વપાર્ષદૈઃ ।
ઉપનીતં બલિં ગૃહ્ણન્ સ્ત્રીજિતો નાવિદદ્ભયમ્ ॥ ૧૮॥

કાલસ્ય દુહિતા કાચિત્ત્રિલોકીં વરમિચ્છતી ।
પર્યટન્તી ન બર્હિષ્મન્ પ્રત્યનન્દત કશ્ચન ॥ ૧૯॥

દૌર્ભાગ્યેનાત્મનો લોકે વિશ્રુતા દુર્ભગેતિ સા ।
યા તુષ્ટા રાજર્ષયે તુ વૃતાદાત્પૂરવે વરમ્ ॥ ૨૦॥

કદાચિદટમાના સા બ્રહ્મલોકાન્મહીં ગતમ્ ।
વવ્રે બૃહદ્વ્રતં માં તુ જાનતી કામમોહિતા ॥ ૨૧॥

મયિ સંરભ્ય વિપુલમદાચ્છાપં સુદુઃસહમ્ ।
સ્થાતુમર્હસિ નૈકત્ર મદ્યાચ્ઞાવિમુખો મુને ॥ ૨૨॥

તતો વિહતસઙ્કલ્પા કન્યકા યવનેશ્વરમ્ ।
મયોપદિષ્ટમાસાદ્ય વવ્રે નામ્ના ભયં પતિમ્ ॥ ૨૩॥

ઋષભં યવનાનાં ત્વાં વૃણે વીરેપ્સિતં પતિમ્ ।
સઙ્કલ્પસ્ત્વયિ ભૂતાનાં કૃતઃ કિલ ન રિષ્યતિ ॥ ૨૪॥

દ્વાવિમાવનુશોચન્તિ બાલાવસદવગ્રહૌ ।
યલ્લોકશાસ્ત્રોપનતં ન રાતિ ન તદિચ્છતિ ॥ ૨૫॥

અથો ભજસ્વ માં ભદ્ર ભજન્તીં મે દયાં કુરુ ।
એતાવાન્ પૌરુષો ધર્મો યદાર્તાનનુકમ્પતે ॥ ૨૬॥

કાલકન્યોદિતવચો નિશમ્ય યવનેશ્વરઃ ।
ચિકીર્ષુર્દેવગુહ્યં સ સસ્મિતં તામભાષત ॥ ૨૭॥

મયા નિરૂપિતસ્તુભ્યં પતિરાત્મસમાધિના ।
નાભિનન્દતિ લોકોઽયં ત્વામભદ્રામસમ્મતામ્ ॥ ૨૮॥

ત્વમવ્યક્તગતિર્ભુઙ્ક્ષ્વ લોકં કર્મવિનિર્મિતમ્ ।
યા હિ મે પૃતના યુક્તા પ્રજાનાશં પ્રણેષ્યસિ ॥ ૨૯॥

પ્રજ્વારોઽયં મમ ભ્રાતા ત્વં ચ મે ભગિની ભવ ।
ચરામ્યુભાભ્યાં લોકેઽસ્મિન્નવ્યક્તો ભીમસૈનિકઃ ॥ ૩૦॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પુરઞ્જનોપાખ્યાને સપ્તવિંશોઽધ્યાયઃ ॥ ૨૭॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ અષ્ટાવિંશોઽધ્યાયઃ - ૨૮॥

નારદ ઉવાચ
સૈનિકા ભયનામ્નો યે બર્હિષ્મન્ દિષ્ટકારિણઃ ।
પ્રજ્વારકાલકન્યાભ્યાં વિચેરુરવનીમિમામ્ ॥ ૧॥

ત એકદા તુ રભસા પુરઞ્જનપુરીં નૃપ ।
રુરુધુર્ભૌમભોગાઢ્યાં જરત્પન્નગપાલિતામ્ ॥ ૨॥

કાલકન્યાપિ બુભુજે પુરઞ્જનપુરં બલાત્ ।
યયાભિભૂતઃ પુરુષઃ સદ્યો નિઃસારતામિયાત્ ॥ ૩॥

તયોપભુજ્યમાનાં વૈ યવનાઃ સર્વતોદિશમ્ ।
દ્વાર્ભિઃ પ્રવિશ્ય સુભૃશં પ્રાર્દયન્ સકલાં પુરીમ્ ॥ ૪॥

તસ્યાં પ્રપીડ્યમાનાયામભિમાની પુરઞ્જનઃ ।
અવાપોરુવિધાંસ્તાપાન્ કુટુમ્બી મમતાઽઽકુલઃ ॥ ૫॥

કન્યોપગૂઢો નષ્ટશ્રીઃ કૃપણો વિષયાત્મકઃ ।
નષ્ટપ્રજ્ઞો હૃતૈશ્વર્યો ગન્ધર્વયવનૈર્બલાત્ ॥ ૬॥

વિશીર્ણાં સ્વપુરીં વીક્ષ્ય પ્રતિકૂલાનનાદૃતાન્ ।
પુત્રાન્ પૌત્રાનુગામાત્યાન્ જાયાં ચ ગતસૌહૃદામ્ ॥ ૭॥

આત્માનં કન્યયા ગ્રસ્તં પઞ્ચાલાનરિદૂષિતાન્ ।
દુરન્તચિન્તામાપન્નો ન લેભે તત્પ્રતિક્રિયામ્ ॥ ૮॥

કામાનભિલષન્ દીનો યાતયામાંશ્ચ કન્યયા ।
વિગતાત્મગતિસ્નેહઃ પુત્રદારાંશ્ચ લાલયન્ ॥ ૯॥

ગન્ધર્વયવનાક્રાન્તાં કાલકન્યોપમર્દિતામ્ ।
હાતું પ્રચક્રમે રાજા તાં પુરીમનિકામતઃ ॥ ૧૦॥

ભયનામ્નોઽગ્રજો ભ્રાતા પ્રજ્વારઃ પ્રત્યુપસ્થિતઃ ।
દદાહ તાં પુરીં કૃત્સ્નાં ભ્રાતુઃ પ્રિયચિકીર્ષયા ॥ ૧૧॥

તસ્યાં સન્દહ્યમાનાયાં સપૌરઃ સપરિચ્છદઃ ।
કૌટુમ્બિકઃ કુટુમ્બિન્યા ઉપાતપ્યત સાન્વયઃ ॥ ૧૨॥

યવનોપરુદ્ધાયતનો ગ્રસ્તાયાં કાલકન્યયા ।
પુર્યાં પ્રજ્વારસંસૃષ્ટઃ પુરપાલોઽન્વતપ્યત ॥ ૧૩॥

ન શેકે સોઽવિતું તત્ર પુરુકૃચ્છ્રોરુવેપથુઃ ।
ગન્તુમૈચ્છત્તતો વૃક્ષકોટરાદિવ સાનલાત્ ॥ ૧૪॥

શિથિલાવયવો યર્હિ ગન્ધર્વૈર્હૃતપૌરુષઃ ।

યવનૈરરિભી રાજન્નુપરુદ્ધો રુરોદ હ ॥ ૧૫॥

દુહિતૄઃ પુત્રપૌત્રાંશ્ચ જામિજામાતૃપાર્ષદાન્ ।
સ્વત્વાવશિષ્ટં યત્કિઞ્ચિદ્ગૃહકોશપરિચ્છદમ્ ॥ ૧૬॥

અહં મમેતિ સ્વીકૃત્ય ગૃહેષુ કુમતિર્ગૃહી ।
દધ્યૌ પ્રમદયા દીનો વિપ્રયોગ ઉપસ્થિતે ॥ ૧૭॥

લોકાન્તરં ગતવતિ મય્યનાથા કુટુમ્બિની ।
વર્તિષ્યતે કથં ત્વેષા બાલકાનનુશોચતી ॥ ૧૮॥

ન મય્યનાશિતે ભુઙ્ક્તે નાસ્નાતે સ્નાતિ મત્પરા ।
મયિ રુષ્ટે સુસન્ત્રસ્તા ભર્ત્સિતે યતવાગ્ભયાત્ ॥ ૧૯॥

પ્રબોધયતિ માવિજ્ઞં વ્યુષિતે શોકકર્શિતા ।
વર્ત્મૈતદ્ગૃહમેધીયં વીરસૂરપિ નેષ્યતિ ॥ ૨૦॥

કથં નુ દારકા દીના દારકીર્વાપરાયણાઃ ।
વર્તિષ્યન્તે મયિ ગતે ભિન્નનાવ ઇવોદધૌ ॥ ૨૧॥

એવં કૃપણયા બુદ્ધ્યા શોચન્તમતદર્હણમ્ ।
ગ્રહીતું કૃતધીરેનં ભયનામાભ્યપદ્યત ॥ ૨૨॥

પશુવદ્યવનૈરેષ નીયમાનઃ સ્વકં ક્ષયમ્ ।
અન્વદ્રવન્નનુપથાઃ શોચન્તો ભૃશમાતુરાઃ ॥ ૨૩॥

પુરીં વિહાયોપગત ઉપરુદ્ધો ભુજઙ્ગમઃ ।
યદા તમેવાનુ પુરી વિશીર્ણા પ્રકૃતિં ગતા ॥ ૨૪॥

વિકૃષ્યમાણઃ પ્રસભં યવનેન બલીયસા ।
નાવિન્દત્તમસાઽઽવિષ્ટઃ સખાયં સુહૃદં પુરઃ ॥ ૨૫॥

તં યજ્ઞપશવોઽનેન સંજ્ઞપ્તા યેઽદયાલુના ।
કુઠારૈશ્ચિચ્છિદુઃ ક્રુદ્ધાઃ સ્મરન્તોઽમીવમસ્ય તત્ ॥ ૨૬॥

અનન્તપારે તમસિ મગ્નો નષ્ટસ્મૃતિઃ સમાઃ ।
શાશ્વતીરનુભૂયાર્તિં પ્રમદાસઙ્ગદૂષિતઃ ॥ ૨૭॥

તામેવ મનસા ગૃહ્ણન્ બભૂવ પ્રમદોત્તમા ।
અનન્તરં વિદર્ભસ્ય રાજસિંહસ્ય વેશ્મનિ ॥ ૨૮॥

ઉપયેમે વીર્યપણાં વૈદર્ભીં મલયધ્વજઃ ।
યુધિ નિર્જિત્ય રાજન્યાન્ પાણ્ડ્યઃ પરપુરઞ્જયઃ ॥ ૨૯॥

તસ્યાં સ જનયાઞ્ચક્ર આત્મજામસિતેક્ષણામ્ ।
યવીયસઃ સપ્ત સુતાન્ સપ્ત દ્રવિડભૂભૃતઃ ॥ ૩૦॥

એકૈકસ્યાભવત્તેષાં રાજન્નર્બુદમર્બુદમ્ ।
ભોક્ષ્યતે યદ્વંશધરૈર્મહી મન્વન્તરં પરમ્ ॥ ૩૧॥

અગસ્ત્યઃ પ્રાગ્દુહિતરમુપયેમે ધૃતવ્રતામ્ ।
યસ્યાં દૃઢચ્યુતો જાત ઇધ્મવાહાત્મજો મુનિઃ ॥ ૩૨॥

વિભજ્ય તનયેભ્યઃ ક્ષ્માં રાજર્ષિર્મલયધ્વજઃ ।
આરિરાધયિષુઃ કૃષ્ણં સ જગામ કુલાચલમ્ ॥ ૩૩॥

હિત્વા ગૃહાન્ સુતાન્ ભોગાન્ વૈદર્ભી મદિરેક્ષણા ।
અન્વધાવત પાણ્ડ્યેશં જ્યોત્સ્નેવ રજનીકરમ્ ॥ ૩૪॥

તત્ર ચન્દ્રવસા નામ તામ્રપર્ણી વટોદકા ।
તત્પુણ્યસલિલૈર્નિત્યમુભયત્રાત્મનો મૃજન્ ॥ ૩૫॥

કન્દાષ્ટિભિર્મૂલફલૈઃ પુષ્પપર્ણૈસ્તૃણોદકૈઃ ।
વર્તમાનઃ શનૈર્ગાત્રકર્શનં તપ આસ્થિતઃ ॥ ૩૬॥

શીતોષ્ણવાતવર્ષાણિ ક્ષુત્પિપાસે પ્રિયાપ્રિયે ।
સુખદુઃખે ઇતિ દ્વન્દ્વાન્યજયત્સમદર્શનઃ ॥ ૩૭॥

તપસા વિદ્યયા પક્વકષાયો નિયમૈર્યમૈઃ ।
યુયુજે બ્રહ્મણ્યાત્માનં વિજિતાક્ષાનિલાશયઃ ॥ ૩૮॥

આસ્તે સ્થાણુરિવૈકત્ર દિવ્યં વર્ષશતં સ્થિરઃ ।
વાસુદેવે ભગવતિ નાન્યદ્વેદોદ્વહન્ રતિમ્ ॥ ૩૯॥

સ વ્યાપકતયાઽઽત્માનં વ્યતિરિક્તતયાઽઽત્મનિ ।
વિદ્વાન્ સ્વપ્ન ઇવામર્શસાક્ષિણં વિરરામ હ ॥ ૪૦॥

સાક્ષાદ્ભગવતોક્તેન ગુરુણા હરિણા નૃપ ।
વિશુદ્ધજ્ઞાનદીપેન સ્ફુરતા વિશ્વતોમુખમ્ ॥ ૪૧॥

પરે બ્રહ્મણિ ચાત્માનં પરં બ્રહ્મ તથાઽઽત્મનિ ।
વીક્ષમાણો વિહાયેક્ષામસ્માદુપરરામ હ ॥ ૪૨॥

પતિં પરમધર્મજ્ઞં વૈદર્ભી મલયધ્વજમ્ ।
પ્રેમ્ણા પર્યચરદ્ધિત્વા ભોગાન્ સા પતિદેવતા ॥ ૪૩॥

ચીરવાસા વ્રતક્ષામા વેણીભૂતશિરોરુહા ।
બભાવુપ પતિં શાન્તા શિખા શાન્તમિવાનલમ્ ॥ ૪૪॥

અજાનતી પ્રિયતમં યદોપરતમઙ્ગના ।
સુસ્થિરાસનમાસાદ્ય યથાપૂર્વમુપાચરત્ ॥ ૪૫॥

યદા નોપલભેતાઙ્ઘ્રાવૂષ્માણં પત્યુરર્ચતી ।
આસીત્સંવિગ્નહૃદયા યૂથભ્રષ્ટા મૃગી યથા ॥ ૪૬॥

આત્માનં શોચતી દીનમબન્ધું વિક્લવાશ્રુભિઃ ।
સ્તનાવાસિચ્ય વિપિને સુસ્વરં પ્રરુરોદ સા ॥ ૪૭॥

ઉત્તિષ્ઠોત્તિષ્ઠ રાજર્ષે ઇમામુદધિમેખલામ્ ।
દસ્યુભ્યઃ ક્ષત્રબન્ધુભ્યો બિભ્યતીં પાતુમર્હસિ ॥ ૪૮॥

એવં વિલપતી બાલા વિપિનેઽનુગતા પતિમ્ ।
પતિતા પાદયોર્ભર્તૂ રુદત્યશ્રૂણ્યવર્તયત્ ॥ ૪૯॥

ચિતિં દારુમયીં ચિત્વા તસ્યાં પત્યુઃ કલેવરમ્ ।
આદીપ્ય ચાનુમરણે વિલપન્તી મનો દધે ॥ ૫૦॥

તત્ર પૂર્વતરઃ કશ્ચિત્સખા બ્રાહ્મણ આત્મવાન્ ।
સાન્ત્વયન્ વલ્ગુના સામ્ના તામાહ રુદતીં પ્રભો ॥ ૫૧॥

બ્રાહ્મણ ઉવાચ
કા ત્વં કસ્યાસિ કો વાયં શયાનો યસ્ય શોચસિ ।
જાનાસિ કિં સખાયં માં યેનાગ્રે વિચચર્થ હ ॥ ૫૨॥

અપિ સ્મરસિ ચાત્માનમવિજ્ઞાતસખં સખે ।
હિત્વા માં પદમન્વિચ્છન્ ભૌમભોગરતો ગતઃ ॥ ૫૩॥

હંસાવહં ચ ત્વં ચાર્ય સખાયૌ માનસાયનૌ ।
અભૂતામન્તરા વૌકઃ સહસ્રપરિવત્સરાન્ ॥ ૫૪॥

સ ત્વં વિહાય માં બન્ધો ગતો ગ્રામ્યમતિર્મહીમ્ ।
વિચરન્ પદમદ્રાક્ષીઃ કયાચિન્નિર્મિતં સ્ત્રિયા ॥ ૫૫॥

પઞ્ચારામં નવદ્વારમેકપાલં ત્રિકોષ્ઠકમ્ ।
ષટ્કુલં પઞ્ચવિપણં પઞ્ચપ્રકૃતિ સ્ત્રીધવમ્ ॥ ૫૬॥

પઞ્ચેન્દ્રિયાર્થા આરામા દ્વારઃ પ્રાણા નવ પ્રભો ।
તેજોઽબન્નાનિ કોષ્ઠાનિ કુલમિન્દ્રિયસઙ્ગ્રહઃ ॥ ૫૭॥

વિપણસ્તુ ક્રિયા શક્તિર્ભૂતપ્રકૃતિરવ્યયા ।
શક્ત્યધીશઃ પુમાંસ્ત્વત્ર પ્રવિષ્ટો નાવબુધ્યતે ॥ ૫૮॥

તસ્મિંસ્ત્વં રામયા સ્પૃષ્ટો રમમાણોઽશ્રુતસ્મૃતિઃ ।
તત્સઙ્ગાદીદૃશીં પ્રાપ્તો દશાં પાપીયસીં પ્રભો ॥ ૫૯॥

ન ત્વં વિદર્ભદુહિતા નાયં વીરઃ સુહૃત્તવ ।
ન પતિસ્ત્વં પુરઞ્જન્યા રુદ્ધો નવમુખે યયા ॥ ૬૦॥

માયા હ્યેષા મયા સૃષ્ટા યત્પુમાંસં સ્ત્રિયં સતીમ્ ।
મન્યસે નોભયં યદ્વૈ હંસૌ પશ્યાવયોર્ગતિમ્ ॥ ૬૧॥

અહં ભવાન્ ન ચાન્યસ્ત્વં ત્વમેવાહં વિચક્ષ્વ ભોઃ ।
ન નૌ પશ્યન્તિ કવયશ્છિદ્રં જાતુ મનાગપિ ॥ ૬૨॥

યથા પુરુષ આત્માનમેકમાદર્શચક્ષુષોઃ ।
દ્વિધાભૂતમવેક્ષેત તથૈવાન્તરમાવયોઃ ॥ ૬૩॥

એવં સ માનસો હંસો હંસેન પ્રતિબોધિતઃ ।
સ્વસ્થસ્તદ્વ્યભિચારેણ નષ્ટામાપ પુનઃ સ્મૃતિમ્ ॥ ૬૪॥

બર્હિષ્મન્નેતદધ્યાત્મં પારોક્ષ્યેણ પ્રદર્શિતમ્ ।
યત્પરોક્ષપ્રિયો દેવો ભગવાન્ વિશ્વભાવનઃ ॥ ૬૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પુરઞ્જનોપાખ્યાને અષ્ટાવિંશોઽધ્યાયઃ ॥ ૨૮॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ એકોનત્રિંશોઽધ્યાયઃ - ૨૯ ॥

પ્રાચીનબર્હિરુવાચ
ભગવંસ્તે વચોઽસ્માભિર્ન સમ્યગવગમ્યતે ।
કવયસ્તદ્વિજાનન્તિ ન વયં કર્મમોહિતાઃ ॥ ૧॥

નારદ ઉવાચ
પુરુષં પુરઞ્જનં વિદ્યાદ્યદ્વ્યનક્ત્યાત્મનઃ પુરમ્ ।
એકદ્વિત્રિચતુષ્પાદં બહુ પાદમપાદકમ્ ॥ ૨॥

યોઽવિજ્ઞાતાહૃતસ્તસ્ય પુરુષસ્ય સખેશ્વરઃ ।
યન્ન વિજ્ઞાયતે પુમ્ભિર્નામભિર્વા ક્રિયાગુણૈઃ ॥ ૩॥

યદા જિઘૃક્ષન્ પુરુષઃ કાર્ત્સ્ન્યેન પ્રકૃતેર્ગુણાન્ ।
નવદ્વારં દ્વિહસ્તાઙ્ઘ્રિ તત્રામનુત સાધ્વિતિ ॥ ૪॥

બુદ્ધિં તુ પ્રમદાં વિદ્યાન્મમાહમિતિ યત્કૃતમ્ ।
યામધિષ્ઠાય દેહેઽસ્મિન્ પુમાન્ ભુઙ્ક્તેઽક્ષભિર્ગુણાન્ ॥ ૫॥

સખાય ઇન્દ્રિયગણા જ્ઞાનં કર્મ ચ યત્કૃતમ્ ।
સખ્યસ્તદ્વૃત્તયઃ પ્રાણઃ પઞ્ચવૃત્તિર્યથોરગઃ ॥ ૬॥

બૃહદ્બલં મનો વિદ્યાદુભયેન્દ્રિયનાયકમ્ ।
પઞ્ચાલાઃ પઞ્ચવિષયા યન્મધ્યે નવ ખં પુરમ્ ॥ ૭॥

અક્ષિણી નાસિકે કર્ણૌ મુખં શિશ્નગુદાવિતિ ।
દ્વે દ્વે દ્વારૌ બહિર્યાતિ યસ્તદિન્દ્રિયસંયુતઃ ॥ ૮॥

અક્ષિણી નાસિકે આસ્યમિતિ પઞ્ચ પુરઃ કૃતાઃ ।
દક્ષિણા દક્ષિણઃ કર્ણ ઉત્તરા ચોત્તરઃ સ્મૃતઃ ॥ ૯॥

પશ્ચિમે ઇત્યધો દ્વારૌ ગુદં શિશ્નમિહોચ્યતે ।
ખદ્યોતાવિર્મુખી ચાત્ર નેત્રે એકત્ર નિર્મિતે ।
રૂપં વિભ્રાજિતં તાભ્યાં વિચષ્ટે ચક્ષુષેશ્વરઃ ॥ ૧૦॥

નલિની નાલિની નાસે ગન્ધઃ સૌરભ ઉચ્યતે ।
ઘ્રાણોઽવધૂતો મુખ્યાસ્યં વિપણો વાગ્રસવિદ્રસઃ ॥ ૧૧॥

આપણો વ્યવહારોઽત્ર ચિત્રમન્ધો બહૂદનમ્ ।
પિતૃહૂર્દક્ષિણઃ કર્ણ ઉત્તરો દેવહૂઃ સ્મૃતઃ ॥ ૧૨॥

પ્રવૃત્તં ચ નિવૃત્તં ચ શાસ્ત્રં પઞ્ચાલસંજ્ઞિતમ્ ।
તૃયાનં દેવયાનં શ્રોત્રાચ્છ્રુતધરાદ્વ્રજેત્ ॥ ૧૩॥

આસુરી મેઢ્રમર્વાગ્દ્વાર્વ્યવાયો ગ્રામિણાં રતિઃ ।
ઉપસ્થો દુર્મદઃ પ્રોક્તો નિરૃતિર્ગુદ ઉચ્યતે ॥ ૧૪॥

વૈશસં નરકં પાયુર્લુબ્ધકોઽન્ધૌ તુ મે શૃણુ ।
હસ્તપાદૌ પુમાંસ્તાભ્યાં યુક્તો યાતિ કરોતિ ચ ॥ ૧૫॥

અન્તઃપુરં ચ હૃદયં વિષૂચિર્મન ઉચ્યતે ।
તત્ર મોહં પ્રસાદં વા હર્ષં પ્રાપ્નોતિ તદ્ગુણૈઃ ॥ ૧૬॥

યથા યથા વિક્રિયતે ગુણાક્તો વિકરોતિ વા ।
તથા તથોપદ્રષ્ટાઽઽત્મા તદ્વૃત્તીરનુકાર્યતે ॥ ૧૭॥

દેહો રથસ્ત્વિન્દ્રિયાશ્વઃ સંવત્સરરયોઽગતિઃ ।
દ્વિકર્મચક્રસ્ત્રિગુણધ્વજઃ પઞ્ચાસુબન્ધુરઃ ॥ ૧૮॥

મનોરશ્મિર્બુદ્ધિસૂતો હૃન્નીડો દ્વન્દ્વકૂબરઃ ।
પઞ્ચેન્દ્રિયાર્થપ્રક્ષેપઃ સપ્તધાતુવરૂથકઃ ॥ ૧૯॥

આકૂતિર્વિક્રમો બાહ્યો મૃગતૃષ્ણાં પ્રધાવતિ ।
એકાદશેન્દ્રિયચમૂઃ પઞ્ચસૂના વિનોદકૃત્ ॥ ૨૦॥

સંવત્સરશ્ચણ્ડવેગઃ કાલો યેનોપલક્ષિતઃ ।
તસ્યાહાનીહ ગન્ધર્વા ગન્ધર્વ્યો રાત્રયઃ સ્મૃતાઃ ।
હરન્ત્યાયુઃ પરિક્રાન્ત્યા ષષ્ટ્યુત્તરશતત્રયમ્ ॥ ૨૧॥

કાલકન્યા જરા સાક્ષાલ્લોકસ્તાં નાભિનન્દતિ ।
સ્વસારં જગૃહે મૃત્યુઃ ક્ષયાય યવનેશ્વરઃ ॥ ૨૨॥

આધયો વ્યાધયસ્તસ્ય સૈનિકા યવનાશ્ચરાઃ ।
ભૂતોપસર્ગાશુરયઃ પ્રજ્વારો દ્વિવિધો જ્વરઃ ॥ ૨૩॥

એવં બહુવિધૈર્દુઃખૈર્દૈવભૂતાત્મસમ્ભવૈઃ ।
ક્લિશ્યમાનઃ શતં વર્ષં દેહે દેહી તમોવૃતઃ ॥ ૨૪॥

પ્રાણેન્દ્રિયમનોધર્માનાત્મન્યધ્યસ્ય નિર્ગુણઃ ।
શેતે કામલવાન્ ધ્યાયન્ મમાહમિતિ કર્મકૃત્ ॥ ૨૫॥

યદાઽઽત્માનમવિજ્ઞાય ભગવન્તં પરં ગુરુમ્ ।

પુરુષસ્તુ વિષજ્જેત ગુણેષુ પ્રકૃતેઃ સ્વદૃક્ ॥ ૨૬॥

ગુણાભિમાની સ તદા કર્માણિ કુરુતેઽવશઃ ।
શુક્લં કૃષ્ણં લોહિતં વા યથા કર્માભિજાયતે ॥ ૨૭॥

શુક્લાત્પ્રકાશભૂયિષ્ઠાન્ લોકાનાપ્નોતિ કર્હિચિત્ ।
દુઃખોદર્કાન્ ક્રિયાયાસાંસ્તમઃ શોકોત્કટાન્ ક્વચિત્ ॥ ૨૮॥

ક્વચિત્પુમાન્ ક્વચિચ્ચ સ્ત્રી ક્વચિન્નોભયમન્ધધીઃ ।
દેવો મનુષ્યસ્તિર્યગ્વા યથા કર્મગુણં ભવઃ ॥ ૨૯॥

ક્ષુત્પરીતો યથા દીનઃ સારમેયો ગૃહં ગૃહમ્ ।
ચરન્ વિન્દતિ યદ્દિષ્ટં દણ્ડમોદનમેવ વા ॥ ૩૦॥

તથા કામાશયો જીવ ઉચ્ચાવચપથા ભ્રમન્ ।
ઉપર્યધો વા મધ્યે વા યાતિ દિષ્ટં પ્રિયાપ્રિયમ્ ॥ ૩૧॥

દુઃખેષ્વેકતરેણાપિ દૈવભૂતાત્મહેતુષુ ।
જીવસ્ય ન વ્યવચ્છેદઃ સ્યાચ્ચેત્તત્તત્પ્રતિક્રિયા ॥ ૩૨॥

યથા હિ પુરુષો ભારં શિરસા ગુરુમુદ્વહન્ ।
તં સ્કન્ધેન સ આધત્તે તથા સર્વાઃ પ્રતિક્રિયાઃ ॥ ૩૩॥

નૈકાન્તતઃ પ્રતીકારઃ કર્મણાં કર્મ કેવલમ્ ।
દ્વયં હ્યવિદ્યોપસૃતં સ્વપ્ને સ્વપ્ન ઇવાનઘ ॥ ૩૪॥

અર્થે હ્યવિદ્યમાનેઽપિ સંસૃતિર્ન નિવર્તતે ।
મનસા લિઙ્ગરૂપેણ સ્વપ્ને વિચરતો યથા ॥ ૩૫॥

અથાત્મનોઽર્થભૂતસ્ય યતોઽનર્થપરમ્પરા ।
સંસૃતિસ્તદ્વ્યવચ્છેદો ભક્ત્યા પરમયા ગુરૌ ॥ ૩૬॥

વાસુદેવે ભગવતિ ભક્તિયોગઃ સમાહિતઃ ।
સધ્રીચીનેન વૈરાગ્યં જ્ઞાનં ચ જનયિષ્યતિ ॥ ૩૭॥

સોઽચિરાદેવ રાજર્ષે સ્યાદચ્યુતકથાશ્રયઃ ।
શ‍ૃણ્વતઃ શ્રદ્દધાનસ્ય નિત્યદા સ્યાદધીયતઃ ॥ ૩૮॥

યત્ર ભાગવતા રાજન્ સાધવો વિશદાશયાઃ ।
ભગવદ્ગુણાનુકથનશ્રવણવ્યગ્રચેતસઃ ॥ ૩૯॥

તસ્મિન્ મહન્મુખરિતા મધુભિચ્ચરિત્ર-
પીયૂષશેષસરિતઃ પરિતઃ સ્રવન્તિ ।
તા યે પિબન્ત્યવિતૃષો નૃપ ગાઢકર્ણૈ-
સ્તાન્ ન સ્પૃશન્ત્યશનતૃડ્ભયશોકમોહાઃ ॥ ૪૦॥

એતૈરુપદ્રુતો નિત્યં જીવલોકઃ સ્વભાવજૈઃ ।
ન કરોતિ હરેર્નૂનં કથામૃતનિધૌ રતિમ્ ॥ ૪૧॥

પ્રજાપતિપતિઃ સાક્ષાદ્ભગવાન્ ગિરિશો મનુઃ ।
દક્ષાદયઃ પ્રજાધ્યક્ષા નૈષ્ઠિકાઃ સનકાદયઃ ॥ ૪૨॥

મરીચિરત્ર્યઙ્ગિરસૌ પુલસ્ત્યઃ પુલહઃ ક્રતુઃ ।
ભૃગુર્વસિષ્ઠ ઇત્યેતે મદન્તા બ્રહ્મવાદિનઃ ॥ ૪૩॥

અદ્યાપિ વાચસ્પતયસ્તપોવિદ્યાસમાધિભિઃ ।
પશ્યન્તોઽપિ ન પશ્યન્તિ પશ્યન્તં પરમેશ્વરમ્ ॥ ૪૪॥

શબ્દબ્રહ્મણિ દુષ્પારે ચરન્ત ઉરુ વિસ્તરે ।
મન્ત્રલિઙ્ગૈર્વ્યવચ્છિન્નં ભજન્તો ન વિદુઃ પરમ્ ॥ ૪૫॥

(સર્વેષામેવ જન્તૂનાં સતતં દેહપોષણે ।
અસ્તિ પ્રજ્ઞા સમાયત્તા કો વિશેષસ્તદા નૃણામ્ ॥

લબ્ધ્વેહાન્તે મનુષ્યત્વં હિત્વા દેહાદ્યસદ્ગ્રહમ્ ।
આત્મસૃત્યા વિહાયેદં જીવાત્મા સ વિશિષ્યતે ॥)
યદા યમનુગૃહ્ણાતિ ભગવાનાત્મભાવિતઃ ।
સ જહાતિ મતિં લોકે વેદે ચ પરિનિષ્ઠિતામ્ ॥ ૪૬॥

તસ્માત્કર્મસુ બર્હિષ્મન્નજ્ઞાનાદર્થકાશિષુ ।
માર્થદૃષ્ટિં કૃથાઃ શ્રોત્રસ્પર્શિષ્વસ્પૃષ્ટવસ્તુષુ ॥ ૪૭॥

સ્વં લોકં ન વિદુસ્તે વૈ યત્ર દેવો જનાર્દનઃ ।
આહુર્ધૂમ્રધિયો વેદં સકર્મકમતદ્વિદઃ ॥ ૪૮॥

આસ્તીર્ય દર્ભૈઃ પ્રાગગ્રૈઃ કાર્ત્સ્ન્યેન ક્ષિતિમણ્ડલમ્ ।
સ્તબ્ધો બૃહદ્વધાન્માની કર્મ નાવૈષિ યત્પરમ્ ।
તત્કર્મ હરિતોષં યત્સા વિદ્યા તન્મતિર્યયા ॥ ૪૯॥

હરિર્દેહભૃતામાત્મા સ્વયં પ્રકૃતિરીશ્વરઃ ।

તત્પાદમૂલં શરણં યતઃ ક્ષેમો નૃણામિહ ॥ ૫૦॥

સ વૈ પ્રિયતમશ્ચાત્મા યતો ન ભયમણ્વપિ ।
ઇતિ વેદ સ વૈ વિદ્વાન્ યો વિદ્વાન્ સ ગુરુર્હરિઃ ॥ ૫૧॥

નારદ ઉવાચ
પ્રશ્ન એવં હિ સઞ્છિન્નો ભવતઃ પુરુષર્ષભ ।
અત્ર મે વદતો ગુહ્યં નિશામય સુનિશ્ચિતમ્ ॥ ૫૨॥

ક્ષુદ્રં ચરં સુમનસાં શરણે મિથિત્વા
રક્તં ષડઙ્ઘ્રિગણસામસુ લુબ્ધકર્ણમ્ ।
અગ્રે વૃકાનસુતૃપોઽવિગણય્ય યાન્તં
પૃષ્ઠે મૃગં મૃગયલુબ્ધકબાણભિન્નમ્ ॥ ૫૩॥

અસ્યાર્થઃ - સુમનઃ સમધર્મણાં સ્ત્રીણાં શરણ
આશ્રમે પુષ્પમધુગન્ધવત્ક્ષુદ્રતમં કામ્યકર્મ-
વિપાકજં કામસુખલવં જૈહ્વ્યૌપસ્થ્યાદિ
વિચિન્વન્તં મિથુનીભૂય તદભિનિવેશિતમનસં
ષડઙ્ઘ્રિગણસામગીતવદતિમનોહરવનિતાદિ
જનાલાપેષ્વતિતરામતિપ્રલોભિતકર્ણમગ્રે
વૃકયૂથવદાત્મન આયુર્હરતોઽહોરાત્રાન્ તાન્
કાલલવવિશેષાનવિગણય્ય ગૃહેષુ વિહરન્તં
પૃષ્ઠત એવ પરોક્ષમનુપ્રવૃત્તો લુબ્ધકઃ કૃતાન્તોઽન્તઃ
શરેણ યમિહ પરાવિધ્યતિ તમિમમાત્માનમહો
રાજન્ ભિન્નહૃદયં દ્રષ્ટુમર્હસીતિ ॥ ૫૪॥

સ ત્વં વિચક્ષ્ય મૃગચેષ્ટિતમાત્મનોઽન્ત-
શ્ચિત્તં નિયચ્છ હૃદિ કર્ણધુનીં ચ ચિત્તે ।
જહ્યઙ્ગનાશ્રમમસત્તમયૂથગાથં
પ્રીણીહિ હંસશરણં વિરમ ક્રમેણ ॥ ૫૫॥

રાજોવાચ
શ્રુતમન્વીક્ષિતં બ્રહ્મન્ ભગવાન્ યદભાષત ।
નૈતજ્જાનન્ત્યુપાધ્યાયાઃ કિં ન બ્રૂયુર્વિદુર્યદિ ॥ ૫૬॥

સંશયોઽત્ર તુ મે વિપ્ર સઞ્છિન્નસ્તત્કૃતો મહાન્ ।
ઋષયોઽપિ હિ મુહ્યન્તિ યત્ર નેન્દ્રિયવૃત્તયઃ ॥ ૫૭॥

કર્માણ્યારભતે યેન પુમાનિહ વિહાય તમ્ ।
અમુત્રાન્યેન દેહેન જુષ્ટાનિ સ યદશ્નુતે ॥ ૫૮॥

ઇતિ વેદવિદાં વાદઃ શ્રૂયતે તત્ર તત્ર હ ।
કર્મ યત્ક્રિયતે પ્રોક્તં પરોક્ષં ન પ્રકાશતે ॥ ૫૯॥

નારદ ઉવાચ
યેનૈવારભતે કર્મ તેનૈવામુત્ર તત્પુમાન્ ।
ભુઙ્ક્તે હ્યવ્યવધાનેન લિઙ્ગેન મનસા સ્વયમ્ ॥ ૬૦॥

શયાનમિમમુત્સૃજ્ય શ્વસન્તં પુરુષો યથા ।
કર્માત્મન્યાહિતં ભુઙ્ક્તે તાદૃશેનેતરેણ વા ॥ ૬૧॥

મમૈતે મનસા યદ્યદસાવહમિતિ બ્રુવન્ ।
ગૃહ્ણીયાત્તત્પુમાન્ રાદ્ધં કર્મ યેન પુનર્ભવઃ ॥ ૬૨॥

યથાનુમીયતે ચિત્તમુભયૈરિન્દ્રિયેહિતૈઃ ।
એવં પ્રાગ્દેહજં કર્મ લક્ષ્યતે ચિત્તવૃત્તિભિઃ ॥ ૬૩॥

નાનુભૂતં ક્વ ચાનેન દેહેનાદૃષ્ટમશ્રુતમ્ ।
કદાચિદુપલભ્યેત યદ્રૂપં યાદૃગાત્મનિ ॥ ૬૪॥

તેનાસ્ય તાદૃશં રાજન્ લિઙ્ગિનો દેહસમ્ભવમ્ ।
શ્રદ્ધત્સ્વાનનુભૂતોઽર્થો ન મનઃ સ્પ્રષ્ટુમર્હતિ ॥ ૬૫॥

મન એવ મનુષ્યસ્ય પૂર્વરૂપાણિ શંસતિ ।
ભવિષ્યતશ્ચ ભદ્રં તે તથૈવ ન ભવિષ્યતઃ ॥ ૬૬॥

અદૃષ્ટમશ્રુતં ચાત્ર ક્વચિન્મનસિ દૃશ્યતે ।
યથા તથાનુમન્તવ્યં દેશકાલક્રિયાશ્રયમ્ ॥ ૬૭॥

સર્વે ક્રમાનુરોધેન મનસીન્દ્રિયગોચરાઃ ।
આયાન્તિ વર્ગશો યાન્તિ સર્વે સમનસો જનાઃ ॥ ૬૮॥

સત્ત્વૈકનિષ્ઠે મનસિ ભગવત્પાર્શ્વવર્તિનિ ।
તમશ્ચન્દ્રમસીવેદમુપરજ્યાવભાસતે ॥ ૬૯॥

નાહં મમેતિ ભાવોઽયં પુરુષે વ્યવધીયતે ।
યાવદ્બુદ્ધિમનોઽક્ષાર્થગુણવ્યૂહો હ્યનાદિમાન્ ॥ ૭૦॥

સુપ્તિમૂર્ચ્છોપતાપેષુ પ્રાણાયનવિઘાતતઃ ।
નેહતેઽહમિતિ જ્ઞાનં મૃત્યુપ્રજ્વારયોરપિ ॥ ૭૧॥

ગર્ભે બાલ્યેઽપ્યપૌષ્કલ્યાદેકાદશવિધં તદા ।
લિઙ્ગં ન દૃશ્યતે યૂનઃ કુહ્વાં ચન્દ્રમસો યથા ॥ ૭૨॥

અર્થે હ્યવિદ્યમાનેઽપિ સંસૃતિર્ન નિવર્તતે ।
ધ્યાયતો વિષયાનસ્ય સ્વપ્નેઽનર્થાગમો યથા ॥ ૭૩॥

એવં પઞ્ચવિધં લિઙ્ગં ત્રિવૃત્ષોડશવિસ્તૃતમ્ ।
એષ ચેતનયા યુક્તો જીવ ઇત્યભિધીયતે ॥ ૭૪॥

અનેન પુરુષો દેહાનુપાદત્તે વિમુઞ્ચતિ ।
હર્ષં શોકં ભયં દુઃખં સુખં ચાનેન વિન્દતિ ॥ ૭૫॥

(ભક્તિઃ કૃષ્ણે દયા જીવેષ્વકુણ્ઠજ્ઞાનમાત્મનિ ।
યદિ સ્યાદાત્મનો ભૂયાદપવર્ગસ્તુ સંસૃતેઃ ॥)
યથા તૃણજલૂકેયં નાપયાત્યપયાતિ ચ ।
ન ત્યજેન્મ્રિયમાણોઽપિ પ્રાગ્દેહાભિમતિં જનઃ ॥ ૭૬॥

યાવદન્યં ન વિન્દેત વ્યવધાનેન કર્મણામ્ ।
મન એવ મનુષ્યેન્દ્ર ભૂતાનાં ભવભાવનમ્ ॥ ૭૭॥

યદાક્ષૈશ્ચરિતાન્ ધ્યાયન્ કર્માણ્યાચિનુતેઽસકૃત્ ।
સતિ કર્મણ્યવિદ્યાયાં બન્ધઃ કર્મણ્યનાત્મનઃ ॥ ૭૮॥

અતસ્તદપવાદાર્થં ભજ સર્વાત્મના હરિમ્ ।
પશ્યંસ્તદાત્મકં વિશ્વં સ્થિત્યુત્પત્ત્યપ્યયા યતઃ ॥ ૭૯॥

મૈત્રેય ઉવાચ
ભાગવતમુખ્યો ભગવાન્ નારદો હંસયોર્ગતિમ્ ।
પ્રદર્શ્ય હ્યમુમામન્ત્ર્ય સિદ્ધલોકં તતોઽગમત્ ॥ ૮૦॥

પ્રાચીનબર્હી રાજર્ષિઃ પ્રજાસર્ગાભિરક્ષણે ।
આદિશ્ય પુત્રાનગમત્તપસે કપિલાશ્રમમ્ ॥ ૮૧॥

તત્રૈકાગ્રમના વીરો ગોવિન્દચરણામ્બુજમ્ ।
વિમુક્તસઙ્ગોઽનુભજન્ ભક્ત્યા તત્સામ્યતામગાત્ ॥ ૮૨॥

એતદધ્યાત્મપારોક્ષ્યં ગીતં દેવર્ષિણાનઘ ।

યઃ શ્રાવયેદ્યઃ શ‍ૃણુયાત્સ લિઙ્ગેન વિમુચ્યતે ॥ ૮૩॥

એતન્મુકુન્દયશસા ભુવનં પુનાનં
દેવર્ષિવર્યમુખનિઃસૃતમાત્મશૌચમ્ ।
યઃ કીર્ત્યમાનમધિગચ્છતિ પારમેષ્ઠ્યં
નાસ્મિન્ ભવે ભ્રમતિ મુક્તસમસ્તબન્ધઃ ॥ ૮૪॥

અધ્યાત્મપારોક્ષ્યમિદં મયાધિગતમદ્ભુતમ્ ।
એવં સ્ત્રિયાશ્રમઃ પુંસશ્છિન્નોઽમુત્ર ચ સંશયઃ ॥ ૮૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પ્રાચીનબર્હિર્નારદસંવાદો નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૨૯॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ ત્રિંશોઽધ્યાયઃ - ૩૦॥

વિદુર ઉવાચ
યે ત્વયાભિહિતા બ્રહ્મન્ સુતાઃ પ્રાચીનબર્હિષઃ ।
તે રુદ્રગીતેન હરિં સિદ્ધિમાપુઃ પ્રતોષ્ય કામ્ ॥ ૧॥

કિં બાર્હસ્પત્યેહ પરત્ર વાથ
કૈવલ્યનાથપ્રિયપાર્શ્વવર્તિનઃ ।
આસાદ્ય દેવં ગિરિશં યદૃચ્છયા
પ્રાપુઃ પરં નૂનમથ પ્રચેતસઃ ॥ ૨॥

મૈત્રેય ઉવાચ
પ્રચેતસોઽન્તરુદધૌ પિતુરાદેશકારિણઃ ।
જપયજ્ઞેન તપસા પુરઞ્જનમતોષયન્ ॥ ૩॥

દશવર્ષસહસ્રાન્તે પુરુષસ્તુ સનાતનઃ ।
તેષામાવિરભૂત્કૃચ્છ્રં શાન્તેન શમયન્ રુચા ॥ ૪॥

સુપર્ણસ્કન્ધમારૂઢો મેરુશ‍ૃઙ્ગમિવામ્બુદઃ ।
પીતવાસા મણિગ્રીવઃ કુર્વન્ વિતિમિરા દિશઃ ॥ ૫॥

કાશિષ્ણુના કનકવર્ણવિભૂષણેન
ભ્રાજત્કપોલવદનો વિલસત્કિરીટઃ ।
અષ્ટાયુધૈરનુચરૈર્મુનિભિઃ સુરેન્દ્રૈ-
રાસેવિતો ગરુડકિન્નરગીતકીર્તિઃ ॥ ૬॥

પીનાયતાષ્ટભુજમણ્ડલમધ્યલક્ષ્મ્યા
સ્પર્ધચ્છ્રિયા પરિવૃતો વનમાલયાઽઽદ્યઃ ।
બર્હિષ્મતઃ પુરુષ આહ સુતાન્ પ્રપન્નાન્
પર્જન્યનાદરુતયા સઘૃણાવલોકઃ ॥ ૭॥

શ્રીભગવાનુવાચ
વરં વૃણીધ્વં ભદ્રં વો યૂયં મે નૃપનન્દનાઃ ।
સૌહાર્દેનાપૃથગ્ધર્માસ્તુષ્ટોઽહં સૌહૃદેન વઃ ॥ ૮॥

યોઽનુસ્મરતિ સન્ધ્યાયાં યુષ્માનનુદિનં નરઃ ।
તસ્ય ભ્રાતૃષ્વાત્મસામ્યં તથા ભૂતેષુ સૌહૃદમ્ ॥ ૯॥

યે તુ માં રુદ્રગીતેન સાયં પ્રાતઃ સમાહિતાઃ ।
સ્તુવન્ત્યહં કામવરાન્ દાસ્યે પ્રજ્ઞાં ચ શોભનામ્ ॥ ૧૦॥

યદ્યૂયં પિતુરાદેશમગ્રહીષ્ટ મુદાન્વિતાઃ ।
અથો વ ઉશતી કીર્તિર્લોકાનનુ ભવિષ્યતિ ॥ ૧૧॥

ભવિતા વિશ્રુતઃ પુત્રોઽનવમો બ્રહ્મણો ગુણૈઃ ।
ય એતામાત્મવીર્યેણ ત્રિલોકીં પૂરયિષ્યતિ ॥ ૧૨॥

કણ્ડોઃ પ્રમ્લોચયા લબ્ધા કન્યા કમલલોચના ।
તાં ચાપવિદ્ધાં જગૃહુર્ભૂરુહા નૃપનન્દનાઃ ॥ ૧૩॥

ક્ષુત્ક્ષામાયા મુખે રાજા સોમઃ પીયૂષવર્ષિણીમ્ ।
દેશિનીં રોદમાનાયા નિદધે સ દયાન્વિતઃ ॥ ૪॥

પ્રજાવિસર્ગ આદિષ્ટાઃ પિત્રા મામનુવર્તતા ।
તત્ર કન્યાં વરારોહાં તામુદ્વહત મા ચિરમ્ ॥ ૧૫॥

અપૃથગ્ધર્મશીલાનાં સર્વેષાં વઃ સુમધ્યમા ।
અપૃથગ્ધર્મશીલેયં ભૂયાત્પત્ન્યર્પિતાશયા ॥ ૧૬॥

દિવ્યવર્ષસહસ્રાણાં સહસ્રમહતૌજસઃ ।

ભૌમાન્ ભોક્ષ્યથ ભોગાન્ વૈ દિવ્યાંશ્ચાનુગ્રહાન્મમ ॥ ૧૭॥

અથ મય્યનપાયિન્યા ભક્ત્યા પક્વગુણાશયાઃ ।
ઉપયાસ્યથ મદ્ધામ નિર્વિદ્ય નિરયાદતઃ ॥ ૧૮॥

ગૃહેષ્વાવિશતાં ચાપિ પુંસાં કુશલકર્મણામ્ ।
મદ્વાર્તા યાતયામાનાં ન બન્ધાય ગૃહા મતાઃ ॥ ૧૯॥

ન વ્યવદ્હૃદયે યજ્જ્ઞો બ્રહ્મૈતદ્બ્રહ્મવાદિભિઃ ।
ન મુહ્યન્તિ ન શોચન્તિ ન હૃષ્યન્તિ યતો ગતાઃ ॥ ૨૦॥

મૈત્રેય ઉવાચ
એવં બ્રુવાણં પુરુષાર્થભાજનં
જનાર્દનં પ્રાગ્જલયઃ પ્રચેતસઃ ।
તદ્દર્શનધ્વસ્તતમોરજોમલા
ગિરાગૃણન્ ગદ્ગદયા સુહૃત્તમમ્ ॥ ૨૧॥

પ્રચેતસ ઊચુઃ
નમો નમઃ ક્લેશવિનાશનાય
નિરૂપિતોદારગુણાહ્વયાય ।
મનોવચોવેગપુરોજવાય
સર્વાક્ષમાર્ગૈરગતાધ્વને નમઃ ॥ ૨૨॥

શુદ્ધાય શાન્તાય નમઃ સ્વનિષ્ઠયા
મનસ્યપાર્થં વિલસદ્દ્વયાય ।
નમો જગત્સ્થાનલયોદયેષુ
ગૃહીતમાયાગુણવિગ્રહાય ॥ ૨૩॥

નમો વિશુદ્ધસત્ત્વાય હરયે હરિમેધસે ।
વાસુદેવાય કૃષ્ણાય પ્રભવે સર્વસાત્વતામ્ ॥ ૨૪॥

નમઃ કમલનાભાય નમઃ કમલમાલિને ।
નમઃ કમલપાદાય નમસ્તે કમલેક્ષણ ॥ ૨૫॥

નમઃ કમલકિઞ્જલ્કપિશઙ્ગામલવાસસે ।
સર્વભૂતનિવાસાય નમોઽયુઙ્ક્ષ્મહિ સાક્ષિણે ॥ ૨૬॥

રૂપં ભગવતા ત્વેતદશેષક્લેશસઙ્ક્ષયમ્ ।
આવિષ્કૃતં નઃ ક્લિષ્ટાનાં કિમન્યદનુકમ્પિતમ્ ॥ ૨૭॥

એતાવત્ત્વં હિ વિભુભિર્ભાવ્યં દીનેષુ વત્સલૈઃ ।
યદનુસ્મર્યતે કાલે સ્વબુદ્ધ્યાભદ્રરન્ધન ॥ ૨૮॥

યેનોપશાન્તિર્ભૂતાનાં ક્ષુલ્લકાનામપીહ તામ્ ।
અન્તર્હિતોઽન્તર્હૃદયે કસ્માન્નો વેદ નાશિષઃ ॥ ૨૯॥

અસાવેવ વરોઽસ્માકમીપ્સિતો જગતઃ પતે ।
પ્રસન્નો ભગવાન્ યેષામપવર્ગગુરુર્ગતિઃ ॥ ૩૦॥

વરં વૃણીમહેઽથાપિ નાથ ત્વત્પરતઃ પરાત્ ।
ન હ્યન્તસ્ત્વદ્વિભૂતીનાં સોઽનન્ત ઇતિ ગીયસે ॥ ૩૧॥

પારિજાતેઽઞ્જસા લબ્ધે સારઙ્ગોઽન્યન્ન સેવતે ।
ત્વદઙ્ઘ્રિમૂલમાસાદ્ય સાક્ષાત્કિં કિં વૃણીમહિ ॥ ૩૨॥

યાવત્તે માયયા સ્પૃષ્ટા ભ્રમામ ઇહ કર્મભિઃ ।
તાવદ્ભવત્પ્રસઙ્ગાનાં સઙ્ગઃ સ્યાન્નો ભવે ભવે ॥ ૩૩॥

તુલયામ લવેનાપિ ન સ્વર્ગં નાપુનર્ભવમ્ ।
ભગવત્સઙ્ગિસઙ્ગસ્ય મર્ત્યાનાં કિમુતાશિષઃ ॥ ૩૪॥

યત્રેડ્યન્તે કથા મૃષ્ટાસ્તૃષ્ણાયાઃ પ્રશમો યતઃ ।
નિર્વૈરં યત્ર ભૂતેષુ નોદ્વેગો યત્ર કશ્ચન ॥ ૩૫॥

યત્ર નારાયણઃ સાક્ષાદ્ભગવાન્ ન્યાસિનાં ગતિઃ ।
સંસ્તૂયતે સત્કથાસુ મુક્તસઙ્ગૈઃ પુનઃ પુનઃ ॥ ૩૬॥

તેષાં વિચરતાં પદ્ભ્યાં તીર્થાનાં પાવનેચ્છયા ।
ભીતસ્ય કિં ન રોચેત તાવકાનાં સમાગમઃ ॥ ૩૭॥

વયં તુ સાક્ષાદ્ભગવન્ ભવસ્ય
પ્રિયસ્ય સખ્યુઃ ક્ષણસઙ્ગમેન ।
સુદુશ્ચિકિત્સ્યસ્ય ભવસ્ય મૃત્યો-
ર્ભિષક્તમં ત્વાદ્ય ગતિં ગતાઃ સ્મ ॥ ૩૮॥

યન્નઃ સ્વધીતં ગુરવઃ પ્રસાદિતા
વિપ્રાશ્ચ વૃદ્ધાશ્ચ સદાનુવૃત્ત્યા ।
આર્યા નતાઃ સુહૃદો ભ્રાતરશ્ચ

સર્વાણિ ભૂતાન્યનસૂયયૈવ ॥ ૩૯॥

યન્નઃ સુતપ્તં તપ એતદીશ
નિરન્ધસાં કાલમદભ્રમપ્સુ ।
સર્વં તદેતત્પુરુષસ્ય ભૂમ્નો
વૃણીમહે તે પરિતોષણાય ॥ ૪૦॥

મનુઃ સ્વયમ્ભૂર્ભગવાન્ ભવશ્ચ
યેઽન્યે તપોજ્ઞાનવિશુદ્ધસત્ત્વાઃ ।
અદૃષ્ટપારા અપિ યન્મહિમ્નઃ
સ્તુવન્ત્યથો ત્વાત્મસમં ગૃણીમઃ ॥ ૪૧॥

નમઃ સમાય શુદ્ધાય પુરુષાય પરાય ચ ।
વાસુદેવાય સત્ત્વાય તુભ્યં ભગવતે નમઃ ॥ ૪૨॥

મૈત્રેય ઉવાચ
ઇતિ પ્રચેતોભિરભિષ્ટુતો હરિઃ
પ્રીતસ્તથેત્યાહ શરણ્યવત્સલઃ ।
અનિચ્છતાં યાનમતૃપ્તચક્ષુષાં
યયૌ સ્વધામાનપવર્ગવીર્યઃ ॥ ૪૩॥

અથ નિર્યાય સલિલાત્પ્રચેતસ ઉદન્વતઃ ।
વીક્ષ્યાકુપ્યન્ દ્રુમૈશ્છન્નાં ગાં ગાં રોદ્ધુમિવોચ્છ્રિતૈઃ ॥ ૪૪॥

તતોઽગ્નિમારુતૌ રાજન્નમુઞ્ચન્ મુખતો રુષા ।
મહીં નિર્વીરુધં કર્તું સંવર્તક ઇવાત્યયે ॥ ૪૫॥

ભસ્મસાત્ક્રિયમાણાંસ્તાન્ દ્રુમાન્ વીક્ષ્ય પિતામહઃ ।
આગતઃ શમયામાસ પુત્રાન્ બર્હિષ્મતો નયૈઃ ॥ ૪૬॥

તત્રાવશિષ્ટા યે વૃક્ષા ભીતા દુહિતરં તદા ।
ઉજ્જહ્રુસ્તે પ્રચેતોભ્ય ઉપદિષ્ટાઃ સ્વયમ્ભુવા ॥ ૪૭॥

તે ચ બ્રહ્મણ આદેશાન્મારિષામુપયેમિરે ।
યસ્યાં મહદવજ્ઞાનાદજન્યજનયોનિજઃ ॥ ૪૮॥

ચાક્ષુષે ત્વન્તરે પ્રાપ્તે પ્રાક્સર્ગે કાલવિદ્રુતે ।
યઃ સસર્જ પ્રજા ઇષ્ટાઃ સ દક્ષો દૈવચોદિતઃ ॥ ૪૯॥

યો જાયમાનઃ સર્વેષાં તેજસ્તેજસ્વિનાં રુચા ।
સ્વયોપાદત્ત દાક્ષ્યાચ્ચ કર્મણાં દક્ષમબ્રુવન્ ॥ ૫૦॥

તં પ્રજાસર્ગરક્ષાયામનાદિરભિષિચ્ય ચ ।
યુયોજ યુયુજેઽન્યાંશ્ચ સ વૈ સર્વપ્રજાપતીન્ ॥ ૫૧॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં ચતુર્થસ્કન્ધે ત્રિંશોઽધ્યાયઃ ॥ ૩૦॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

॥ એકત્રિંશોઽધ્યાયઃ - ૩૧॥

મૈત્રેય ઉવાચ
તત ઉત્પન્નવિજ્ઞાના આશ્વધોક્ષજભાષિતમ્ ।
સ્મરન્ત આત્મજે ભાર્યાં વિસૃજ્ય પ્રાવ્રજન્ ગૃહાત્ ॥ ૧॥

દીક્ષિતા બ્રહ્મસત્રેણ સર્વભૂતાત્મમેધસા ।
પ્રતીચ્યાં દિશિ વેલાયાં સિદ્ધોઽભૂદ્યત્ર જાજલિઃ ॥ ૨॥

તાન્નિર્જિતપ્રાણમનોવચોદૃશો
જિતાસનાન્ શાન્તસમાનવિગ્રહાન્ ।
પરેઽમલે બ્રહ્મણિ યોજિતાત્મનઃ
સુરાસુરેડ્યો દદૃશે સ્મ નારદઃ ॥ ૩॥

તમાગતં ત ઉત્થાય પ્રણિપત્યાભિનન્દ્ય ચ ।
પૂજયિત્વા યથાદેશં સુખાસીનમથાબ્રુવન્ ॥ ૪॥

પ્રચેતસ ઊચુઃ
સ્વાગતં તે સુરર્ષેઽદ્ય દિષ્ટ્યા નો દર્શનં ગતઃ ।
તવ ચઙ્ક્રમણં બ્રહ્મન્નભયાય યથા રવેઃ ॥ ૫॥

યદાદિષ્ટં ભગવતા શિવેનાધોક્ષજેન ચ ।
તદ્ગૃહેષુ પ્રસક્તાનાં પ્રાયશઃ ક્ષપિતં પ્રભો ॥ ૬॥

તન્નઃ પ્રદ્યોતયાધ્યાત્મજ્ઞાનં તત્ત્વાર્થદર્શનમ્ ।

યેનાઞ્જસા તરિષ્યામો દુસ્તરં ભવસાગરમ્ ॥ ૭॥

મૈત્રેય ઉવાચ

ઇતિ પ્રચેતસાં પૃષ્ટો ભગવાન્ નારદો મુનિઃ ।
ભગવત્યુત્તમશ્લોક આવિષ્ટાત્માબ્રવીન્નૃપાન્ ॥ ૮॥

નારદ ઉવાચ

તજ્જન્મ તાનિ કર્માણિ તદાયુસ્તન્મનો વચઃ ।
નૃણાં યેનેહ વિશ્વાત્મા સેવ્યતે હરિરીશ્વરઃ ॥ ૯॥

કિં જન્મભિસ્ત્રિભિર્વેહ શૌક્લસાવિત્રયાજ્ઞિકૈઃ ।
કર્મભિર્વા ત્રયીપ્રોક્તૈઃ પુંસોઽપિ વિબુધાયુષા ॥ ૧૦॥

શ્રુતેન તપસા વા કિં વચોભિશ્ચિત્તવૃત્તિભિઃ ।
બુદ્ધ્યા વા કિં નિપુણયા બલેનેન્દ્રિયરાધસા ॥ ૧૧॥

કિં વા યોગેન સાઙ્ખ્યેન ન્યાસસ્વાધ્યાયયોરપિ ।
કિં વા શ્રેયોભિરન્યૈશ્ચ ન યત્રાત્મપ્રદો હરિઃ ॥ ૧૨॥

શ્રેયસામપિ સર્વેષામાત્મા હ્યવધિરર્થતઃ ।
સર્વેષામપિ ભૂતાનાં હરિરાત્માઽઽત્મદઃ પ્રિયઃ ॥ ૧૩॥

યથા તરોર્મૂલનિષેચનેન
તૃપ્યન્તિ તત્સ્કન્ધભુજોપશાખાઃ ।
પ્રાણોપહારાચ્ચ યથેન્દ્રિયાણાં
તથૈવ સર્વાર્હણમચ્યુતેજ્યા ॥ ૧૪॥

યથૈવ સૂર્યાત્પ્રભવન્તિ વારઃ
પુનશ્ચ તસ્મિન્ પ્રવિશન્તિ કાલે ।
ભૂતાનિ ભૂમૌ સ્થિરજઙ્ગમાનિ
તથા હરાવેવ ગુણપ્રવાહઃ ॥ ૧૫॥

એતત્પદં તજ્જગદાત્મનઃ પરં
સકૃદ્વિભાતં સવિતુર્યથા પ્રભા ।
યથાસવો જાગ્રતિ સુપ્તશક્તયો
દ્રવ્યક્રિયાજ્ઞાનભિદા ભ્રમાત્યયઃ ॥ ૧૬॥

યથા નભસ્યભ્રતમઃ પ્રકાશા
ભવન્તિ ભૂપા ન ભવન્ત્યનુક્રમાત્ ।

એવં પરે બ્રહ્મણિ શક્તયસ્ત્વમૂ
રજસ્તમઃસત્ત્વમિતિ પ્રવાહઃ ॥ ૧૭॥

તેનૈકમાત્માનમશેષદેહિનાં
કાલં પ્રધાનં પુરુષં પરેશમ્ ।
સ્વતેજસા ધ્વસ્તગુણપ્રવાહ-
માત્મૈકભાવેન ભજધ્વમદ્ધા ॥ ૧૮॥

દયયા સર્વભૂતેષુ સન્તુષ્ટ્યા યેન કેન વા ।
સર્વેન્દ્રિયોપશાન્ત્યા ચ તુષ્યત્યાશુ જનાર્દનઃ ॥ ૧૯॥

અપહતસકલૈષણામલાત્મ-
ન્યવિરતમેધિતભાવનોપહૂતઃ ।
નિજજનવશગત્વમાત્મનો ય-
ન્ન સરતિ છિદ્રવદક્ષરઃ સતાં હિ ॥ ૨૦॥

ન ભજતિ કુમનીષિણાં સ ઇજ્યાં
હરિરધનાત્મધનપ્રિયો રસજ્ઞઃ ।
શ્રુતધનકુલકર્મણાં મદૈર્યે
વિદધતિ પાપમકિઞ્ચનેષુ સત્સુ ॥ ૨૧॥

શ્રિયમનુચરતીં તદર્થિનશ્ચ
દ્વિપદપતીન્ વિબુધાંશ્ચ યત્સ્વપૂર્ણઃ ।
ન ભજતિ નિજભૃત્યવર્ગતન્ત્રઃ
કથમમુમુદ્વિસૃજેત્પુમાન્ કૃતજ્ઞઃ ॥ ૨૨॥

મૈત્રેય ઉવાચ
ઇતિ પ્રચેતસો રાજન્નન્યાશ્ચ ભગવત્કથાઃ ।
શ્રાવયિત્વા બ્રહ્મલોકં યયૌ સ્વાયમ્ભુવો મુનિઃ ॥ ૨૩॥

તેઽપિ તન્મુખનિર્યાતં યશો લોકમલાપહમ્ ।
હરેર્નિશમ્ય તત્પાદં ધ્યાયન્તસ્તદ્ગતિં યયુઃ ॥ ૨૪॥

એતત્તેઽભિહિતં ક્ષત્તર્યન્માં ત્વં પરિપૃષ્ટવાન્ ।
પ્રચેતસાં નારદસ્ય સંવાદં હરિકીર્તનમ્ ॥ ૨૫॥

શ્રીશુક ઉવાચ
ય એષ ઉત્તાનપદો માનવસ્યાનુવર્ણિતઃ ।

વંશઃ પ્રિયવ્રતસ્યાપિ નિબોધ નૃપસત્તમ ॥ ૨૬॥

યો નારદાદાત્મવિદ્યામધિગમ્ય પુનર્મહીમ્ ।
ભુક્ત્વા વિભજ્ય પુત્રેભ્ય ઐશ્વરં સમગાત્પદમ્ ॥ ૨૭॥

ઇમાં તુ કૌષારવિણોપવર્ણિતાં
ક્ષત્તા નિશમ્યાજિતવાદસત્કથામ્ ।
પ્રવૃદ્ધભાવોઽશ્રુકલાકુલો મુને-
ર્દધાર મૂર્ધ્ના ચરણં હૃદા હરેઃ ॥ ૨૮॥

વિદુર ઉવાચ
સોઽયમદ્ય મહાયોગિન્ ભવતા કરુણાત્મના ।
દર્શિતસ્તમસઃ પારો યત્રાકિઞ્ચનગો હરિઃ ॥ ૨૯॥

શ્રીશુક ઉવાચ
ઇત્યાનમ્ય તમામન્ત્ર્ય વિદુરો ગજસાહ્વયમ્ ।
સ્વાનાં દિદૃક્ષુઃ પ્રયયૌ જ્ઞાતીનાં નિર્વૃતાશયઃ ॥ ૩૦॥

એતદ્યઃ શ‌ૃણુયાદ્રાજન્ રાજ્ઞાં હર્યર્પિતાત્મનામ્ ।
આયુર્ધનં યશઃ સ્વસ્તિ ગતિમૈશ્વર્યમાપ્નુયાત્ ॥ ૩૧॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે વૈયાસક્યામષ્ટાદશસાહસ્ર્યાં
પારમહંસ્યાં સંહિતાયાં ચતુર્થસ્કન્ધે પ્રચેત ઉપાખ્યાનં
નામૈકત્રિંશોઽધ્યાયઃ ॥ ૩૧॥

॥ ઇતિ ચતુર્થસ્કન્ધઃ સમાપ્તઃ ॥

॥ હરિઃ ૐ તત્સત્ ॥

Proofread by PSA Easwaran

pdf was typeset on May 15, 2025

Please send corrections to *sanskrit@cheerful.com*